Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अलङ्कार चन्द्रिका

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आरोपितचरणत्वेन पंकजं कर्तृ कलिकादुरितकदम्बिकादूरीकरणक्रियेति वा पाठः २

कु० चं० ।।श्रीगणेशाय नमः।। अनुचिंत्य महालक्ष्मीं हरिलोचनचंद्रिकां कुर्वे कुवलयानंदसदलंकारचंद्रिकां १ चिकीर्षितस्य विघ्नसिद्धय इष्टदेव
१ तां स्तौति अमरीति अत्र चरणमेव पंकजमिति मयूरव्यंसकादिसमासाश्रयणात् रूपकालंकारः चरणे आरोप्यमाणस्य पंकजस्या
रोपविषयचरणात्मना परिणतिं विना दुरितदूरीकरणक्रियार्थत्वासंभवात् परिणामः क्रियार्थश्चेद्विषयी विषयात्मनेति तल्लक्षणात्

।।श्रीगणेशाय नमः।। ।। अमरीकबरीभारभ्रमरीमु
खरीकृतं दूरीकरोतु दु



रितं गौरीचरणपंकजं १ ।।

न च चरणं पंकजमिवेति पूर्वपदार्थप्रधान उपमितसमास एवास्त्विति शंक्यं

न च पंकजमिव चरणमिति पूर्वपदार्थप्रधान उपमितसमास एवास्त्विति शंक्यं अमरीणां कबरीभारस्य केशपाशस्य संबंधिनी सौगंध्यलोभा
चरणं सूक्ष्म देत्यंतसंश्लेषाद्भ्रमरी तया मुखरीकृतमिति विशेषणस्यानुगुण्याभावात् तस्य पंकजगतत्वेनैव प्रसिद्धेरिति- एतादृशविशेषणोपगतेन चरणा रा०
दपतने ताभिर्व्यज्यमाना गौरीविषया रतिः कविगतां तां पुष्णातीति प्रेयोलंकारो ध्वनितः १ ।। ।। ।। १

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

फलवत्कृतत्वादित्यर्थः
पार्वतीतपःसमृद्धिफलमिव परमेश्वरतपःसमृद्धिफलमिदं॥
परमेश्वरतपःसमृद्धिफलमिव पार्वतीतपःसमृद्धिफलम्
इत्युपमाद्वयं परस्परस्य

परस्परेति प्रांचौ पुरातनौ जायापती अर्थादुमामहेश्वरौ स्तुमः किंभूतौ प्रपंचस्य जीववर्गस्य मातापितृरूपौ निरुपाधिकृपाश्रयत्वाद्धितोपदेष्टृत्वाच्च तथा परस्परसंबंधिन्यास्तपःसंपत्तेः फलवदाचरितं परस्परस्य स्वरूपं ययोस्तौ अत्र परशब्दस्य क्रियाविनिमये द्विवचनं कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये इति वार्त्तिकेन द्विर्भावः समासवच्चाव्ययपूर्वपदस्य सुप्तपःस्तु पूर्वकृतत्वादिनैव तपःस्त्वादेशेच परस्परशब्दः सुप्तत्वेन पार्वतीतपःसमृद्धिफलायितः परमेश्वरः एवं ईश्वरतपःसंपत्फलायिता च पार्वती इत्यर्थो लभ्यते तपःसंपत्तेः फलं निरतिशयानंद इति तदुपमया परस्परं परमप्रेमास्पदत्वलक्षणः शृंगारो व्यज्यमानः सौभाग्यातिशयव्यंजनमुखेन शिवयोर्भावप्रकर्षपर्यवस्यतीति सहृदयैराकलनीयम् मातापितरावितिरूपकात् मुखे कौ पम्ययोः संसृष्टिः परस्परं चोपमयोः फलायितेत्येकवाचकानुप्रवेशलक्षणः संकर इति दिक्॥ १ संप्रतिप्रतिपिपादयिषितानामलंकाराणां युक्तत्वेन उत्तोत्पुरुषार्थतया फलत्वायोगात् तस्याः सामान्य

परस्परतपःसंपत्फलायितपरस्परौ प्रपंचमातापितरौ प्रांचौ जायापती स्तुमः १ उद्घाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुंदः ३॥ ॥ ॥

दौपयिकत्वेन फलत्वं प्रेक्षावतां प्रकृतग्रंथप्रवृत्तये सूचयितुं शृंगाररसाधिदैवतं श्रीकृष्णं प्रतिरसास्वादानंदं प्रार्थयते उद्घाट्येति स मुकुंदो मे मह्यं शाश्वतं भवं शाश्वतिकं भग्नावरणतया सदा प्रकाशमानं श्रेयो निरतिशयं वेदांतरमानंदं रसो वै स इति श्रुतेः रसपदाभिधेयं दिशतु ददातु इत्यर्थः यथा श्रुतेर्मुक्तिप्रार्थनायाः प्रकृतेऽसंगतत्वापत्तेः स कः यो धन्यैर्महामहिमपुण्यशालिभिर्नारदादिमुनिभिर्योगकलया योगकौशलेन हृदयाब्जस्य उदरोदरस्थो मध्यवर्त्तिनो हृदयपुंडरीकस्य कोशं मुकुलं अधोमुखतया विद्यमानं उद्घाट्य रेचकप्राणायामेनोर्ध्वमुखं कृत्वा चिरात् बहुकालं यथारुचि यथेच्छं गृह्यमाणो परामृश्यमानो ध्यानमूर्त्तिर्ध्यानगोचरीक्रियमाणोऽपि परिमितः पूर्णरूपमस्य तथाभूतोऽपरिच्छिन्नब्रह्मरूपः अविरतं निरंतरं मुक्तिदशायां स्फुरति प्रकाशत इति विरोधालंकारः औपासनिकरूपस्य कल्पितत्वेन च तत्परिहारः अथवा योगिभिरप्यचिंत्यस्वरूप इति माहात्म्यातिशयवर्णनं अत्र योगिगतभगवद्विषयकरतिभावस्य क

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ज्ञानस्य

कु॰नं॰ १ चिकीर्षितस्य ग्रंथस्य प्रयोजनाभिधेये प्रदर्शयति अलंकारेष्विति एतच्चोभयान्वयि अलंकारेष्वर्थालंकारेषूपमादिषु विषये बालानामव्युत्पन्नानां ते
ष्ववगाहनस्य बुद्धिप्रवेशस्य सिद्धये इत्यर्थः तेषां ये लक्ष्यलक्षणे तयोः संग्रह इति नित्यसापेक्षत्वात् समासः लक्ष्यमुदाहरणं अलंकारत्वं च रसादिभिन्नव्यंग्यभिन्न
त्वे सति शब्दार्थान्यतरनिष्ठा या विषयितासंबंधावच्छिन्ना चमत्कृतिजनकतावच्छेदकता तदवच्छेदकत्वं अनुप्रासादिविशिष्टशब्दज्ञानादुपमादिविशिष्टार्थ
ज्ञानाच्च चमत्कारोदयात्तेषु लक्षणसमन्वयः शब्दार्थयोर्निष्ठचमत्कृतिजनकता या विषयितयावच्छेदकत्वेन तद्विशेषणीभूता उपास्योपमादेस्त

अलंकारेषु बालानामवगाहनसिद्धये ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः ४
येषां चन्द्रालोके दृश्यन्ते लक्ष्यलक्षणश्लोकाः प्रायस्त एव तेषां त्वभिनवा विरच्यन्ते ५

मितरेषां १

न्निष्ठावच्छेदकतावच्छेदकत्वात् एतेन दाह्यलंकारसंग्रहाय व्यंग्योपमादिवारणाय च भेदद्वयगर्भसत्वं तोपादानं परकीयग्रंथापहारशंकानिरासायाह येषामिति
येषामलंकाराणां चन्द्रालोके चन्द्रालोकाख्यग्रंथे त एवेत्यनंतरं लिख्यंत इति शेषाः तत्रस्थितानामपि केषांचिदलेखनात्प्राय इत्युक्तं यथाऽनंतरश्लो राम॰ १
कस्योत्तरार्धं तत्रैवं दृश्यते त्वद्यशो खेलतो रुचैस्तत्कूलं गीत्वनयोरिवेति स्वयं त्वत्पदेव विरचितमिति एवं चैतदीयत्वेन कथनादाशंकानिरासः ४ ॥ ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[illegible]

उपमेतिपदं लक्ष्यपरम् । शेषं सादृश्यं [illegible] सतीति [illegible]

संप्रत्यर्थालंकारेषु निरूपणीयेषु बहुलालंकारघटकतया [illegible]भिहितया च प्रथमम् उपमालंकारं लक्षयति उपमेति अयं च लक्ष्यनिर्देशः शेषं लक्षणं सादृश्यस्य लक्ष्मीः चमत्कृतिविशेषजनकता तद्विशिष्टं सादृश्यमिति यावत् धर्मधर्मिणोरभेदोपचारात् लक्षणं व्याचष्टे यत्रेति यत्र काव्ये द्वित्वस म्यर्थः तत्त्वशक्तिलक्षणान्यतरसहकारेण स्वबोधकत्वसंबन्धेन उपमानम् अधिकगुणं चन्द्रादि उपमेयं वर्ण्यमानं कामिनीवदनादि तत्त्वद्वयः का

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः । हंसीव कृष्ण ते कीर्त्तिः स्वर्गङ्गामवगाहते ॥ प
यत्रोपमानोपमेययोः सहृदयहृदयाह्लादित्वेन चारु सादृश्यम् उद्भूततया उल्लसति व्यं
ग्यमर्यादां विना स्पष्टं प्रकाशते तत्रोपमालंकारः ५ ॥ ॥ ॥

व्यभावनापरिपक्वबुद्धिः व्यंग्यस्य मर्यादा शतीति नियमरूपां यया सा व्यञ्जनेत्यर्थः अत्र चोपमानोपमेययोरिति स्वरूपकथनं न तु लक्षणान्तर्गतं व्यावर्तनीयाभावात् आत्माश्रयापादकत्वाच्च उपमानत्वोपमेयत्वयोरुपमाघटितत्वात् एतच्चाग्रे व्यक्तीभविष्यति इत्थं च अलंकारत्वे सति सादृश्यत्वमुपमालंकारलक्षणं बोध्यं एवमग्रेऽप्यधिकारशात् अलंकारत्वविशेषणं बोध्यं ५ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वर्गगावगाहनाश्रयत्वं स्वस २ तथा नानार्थं
मानधर्मत्वे सति तस्यापि स्वर्गगा
वगाहनस्यापि धात्वर्थस्य समानधर्मत्वं औचित्येनाश्रयणात् मेवत्तु. तो हेतो यस्मात्स्वर्गगावगाहनाश्रयत्वशरीरे स्वर्गगावगाहनार्थ समकोपात्तं सः प्र विशेषोऽस्ति न प्रत नेतिरोधः ४

कु० नै० ३ हंसीत्यादि अत्र तावदिवार्थसादृश्ये निरूपितत्वसंसर्गेणाहंसपदार्थस्य सादृश्यस्य च प्रयोजकत्वसंसर्गेण स्वर्गगावगाहनाश्रयत्वरूपे साधारणधर्मे
तस्य च स्वरूपसंबंधेन कीर्तौ सादृश्यस्य निपातार्थं प्रतिसार्थसंबंधेन विशेष्यत्वे विशेषणत्वे च बाधकाभावात् तथा च हंसीनिरूपितसादृश्यप्रयो
जकस्वर्गगाकर्मकावगाहनाश्रयत्ववती कीर्तिरिति बोधः न चैवं स्वर्गगावगाहनमिव शाहेस्त्याद्युपमये धात्वर्थस्य समानधर्मत्वोक्ति
र्विरुद्धेति वाच्यं तदाश्रयत्वस्य समानधर्मत्वे तस्य तथात्वस्यौचित्यात्वेन विरोधाभावात् तथा सति तत्रैव कुतो न सादृश्यान्वय इति चेत् न धात्वर्थस्व ४

हंसीवेत्युदाहरणं ६ ॥ । ॥ ॥

धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंसर्गेणाशाब्दबोधे विशेष्यतयाविभक्त्यर्थोपस्थितेर्हेतुत्वात् न च निपातार्थभिन्नवृत्तित्वेन प्रकारतावि
शेषणीयेति वाच्यं घटो न पश्यतीत्यादौ घटाद्यन्विताभावस्य कर्मतासंसर्गेणादर्शनेनान्वयापत्तेः यदि तु धात्वर्थोपितात्पर्यवशात्सादृश्यान्वयो तु राम० ३
भवति तदा धात्वर्थनिष्ठविशेष्यतानिरूपिताप्रकारतासंबंधेनान्वयबुद्धिं प्रति [illegible]ज्ञानोपस्थितेः प्रतिबंधकत्वमात्रपरिकल्प्य घटो न पश्यतीत्या
धात्वर्थनिष्ठविशेष्यतानिरूपितनिपातार्थभिन्नवृत्तिप्रकारतासंस
र्गेणाशाब्दबोधे विशेष्यतयाविभक्त्यर्थोपस्थितेर्हेतुत्वमिति २

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दौष्ट्येनान्वयबोधो निराकरणीय इति दिक्‌ एवमरविंदमिव सुंदरं वदनमित्यादावरविंदादिनिरूपितसादृश्यस्य प्रयोजकतासंसर्गेण सुंदरपदार्थै-
कदेशेऽपि सुंदरत्वेऽनुभवबलादन्वयस्तद्विशिष्टस्य चाभेदेन मुखादौ। इत्थं चारविंदनिरूपितसादृश्यप्रयोजकसौंदर्यवदभिन्नं वदनमित्यन्वयबोधः
अरविंदसुंदरमिति समासे त्वरविंदपदेनारविंदनिरूपितसादृश्यप्रयोजकं लक्ष्यते तस्य चाभेदेन पदार्थैकदेशे सौंदर्येऽन्वय इति एवं चारविंदनिरूपि-
तसादृश्यप्रयोजकाभिन्नसौंदर्यवदभिन्नं वदनमित्यन्वयबोधः एकदेशान्वयायोगादरविंदमेव लक्षणया सदृशार्थबोधकं सुंदरपदं तु तात्पर्य-
ग्राहकमित्येके अरविंदमिव वदनमित्यत्रारविंदनिरूपितसादृश्यवद्वदनमिति बोधः सादृश्यस्य निपातार्थतयाभेदेन नामार्थान्वये बाधकाभा-
वात्‌ अरविंदमिव भातीत्यत्र भाने इवार्थकत्वेऽरविंदपदस्यारविंदनिरूपितसादृश्यप्रकारकज्ञानविषये लक्षणा तस्य चाभेदेन मुखादावन्व-
यः शेषं तात्पर्यग्राहकं प्राचीनोक्तदिशा वा सादृश्यस्यैव प्रकारितासंसर्गेण धात्वर्थेऽन्वयः अत्रैव सौंदर्यगुणेति धर्मोपादाने तृतीयार्थस्य प्रयोज्यत्वस्य
यं सादृश्येऽन्वयात्सौंदर्यप्रयोज्यारविंदनिरूपितसादृश्यप्रकारकज्ञानविषय इति बोधः आद्यकल्पे त्वरविंदपदमेव सदृशार्थबोधकमितरत्तात्प-
र्यग्राहकमिति ध्येयं इयं च सादृश्यस्य पदार्थांतरत्वमते शाब्दबोधरीतिः प्रदर्शिता तस्य समानधर्मरूपत्वे तु चंद्र इव मुखमित्यादौ चंद्रवृत्ति-
धर्मवन्मुखमिति बोधः अत्रैवाह्लादकमिति समानधर्मोपादाने इवार्थस्य धर्मस्याह्लादकत्वे पदार्थैकदेशेऽन्वयः तदसहिष्णूनां तु चंद्र-
निष्ठाह्लादकत्ववतीत्याह्लादकपदस्य लक्षणा चंद्रादिपदं तात्पर्यग्राहकं॥ चंद्रसदृशमित्यत्राप्येकदेशे सादृश्ये चंद्रान्वयः ससंबंधिकत्वा-
त्‌ सदृशपदं वा चंद्रसादृश्यविशिष्टे लाक्षणिकं अत्रैवाह्लादकत्वेनेत्युक्तावभेदस्तृतीयार्थस्तस्य च सदृशपदार्थैकदेशे धर्मेऽन्वयस्तथा चाह्ला-
दकत्वाभिन्नचंद्रवृत्तिधर्मवदभिन्नं मुखमिति बोधः सदृशपदमेव वा सदृशार्थबोधकमितरत्तात्पर्यग्राहकमित्येवंविधान्यन्वयसरणिस्त्रैणापस्त्र
तत्रशाब्दव्युत्पत्तिनिपुणैरनुसंधेयानीत्यलं प्रसक्तानुप्रसक्तपरिचिंतनेन ६ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ ४ पूर्णोपमेतीत्यनंतरमालंकारिकैरिति शेषणीयं तत्वं च विशेषणतउपात्तशब्दशक्तिप्रतिपादितोपमानोपमेयकृत्वे विशेषतः शब्दोपात्तसमानधर्मकत्वे
च सति विशेषणतः स्वनिरूढशब्दगम्यत्वं स्वपदमुपमापरं उपमानलुप्तायामपि लक्षणयोपमानप्रतिपत्तेस्तद्वारणाय शक्तीति उपमेय
लुप्तायामस्मरवधूपंतीत्यादावात्मनउपमेयस्याध्याहृतेनात्मनामितिशब्देन बोधनादुपात्तेति शब्दविशेषणं एवमपितचीत्यनेनात्रोपमे
यस्यकार्वास्यसहदृशंतदृश्यत इत्येवंविधायां लुप्तोपमानायामुपमानस्यचंद्रसदृशपदोपात्तत्वाद्विशेषणतइति उपमेयोपमानतावच्छेदक

इयं च पूर्णोपमेत्युच्यते हंसी कीर्त्तिः स्वर्गगावगाहनमिव शाहस्येत्येतेषामुप
मानोपमेयसाधारणधर्मोपमावाचकानां चतुर्णामप्युपादानात् ७ ॥ ॥

रूपेणेत्यर्थः धर्मलुप्तायामप्युपमावाचकेन सामान्यतो धर्मस्योपात्तत्वाद्विशेषणतइति उपमाप्रयोजकतावच्छेदकरूपेणेत्यर्थः वाचकलुप्ता
यामपि लक्षणयोपमानादिपदेनोपमावगमात्तद्वारणाय विशेषतः स्वनिरूढेति उपमायां च निरूढा इववद्वायथाशब्दास्तुल्याद्यभियुक्तो
क्तिसंगृहीता इवादयः अत्र निपातरूपस्येवादेरूपसर्गवत् द्योतकत्वमेव कथमन्यथा शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिवेत्यादावुक्ता राम॰ ४
दिपदोक्तरस्तत्तीयादिसंगतिः उस्रादेरुद्धरणक्रियां प्रत्यकरणत्वात् इवार्थसादृश्यान्वयित्वेन करणीभूतशरविशेषणत्वाभावाच्च द्योतक

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वे तु मुखादिपदस्योपमानसदृशपरतयोपमानसदृशैः शब्दैरिति शब्दविशेषणत्वेन तृतीयादिसंगतिरिति वैयाकरणमतं तु नादरणीयं उपास्यते गु
रुरित्यादौ धात्वर्थासनक्रियाया अकर्मकतया कर्मलकारानुपपत्तिरूपबाधकस्योपसर्गवाचकताया मिवेवादिवाचकतायाम भावेन दृ
ष्टांतवैषम्यस्यास्फुटत्वात विशेषणविशेष्ययोः समानविभक्तिकतया विशेष्येण सहैकार्थं भवेद्यत्र विशेषणं तत्र लिंगादयः प्रायो विशे
ष्यस्य विशेषणानीत्यनुशासनस्यैवोपमानोपमेययोरपि तस्यां लिंगसंख्याविभेदेपि स्यादुपमानोपमेयता विभक्तिः पुनरेकैव उपमानोपमेय
योरित्यनुशासनस्य सत्वेनोपमानपदोत्तरतृतीयादेः साधुत्वार्थं तयोपपन्नेश्च तस्माद्वाचकत्वमेवेवादीनां युक्तं चैतत् अन्यथा सकला
लंकारिकसंमतस्येव शब्दप्रयोगे श्रौती त्वस्य दत्तजलांजलित्वापत्तेः रूढिप्रयोजनयोरन्यतरस्याभावेन चंद्रादिपदेन चंद्रसदृशलक्षणा
यां निषिद्धलक्षणिकत्वरूपनेयार्थत्वदोषापत्तेश्च अपि च इवादेर्द्योतकत्वनये चंद्रादेरुपमानस्य पदार्थैकदेशतया तत्र साधारणध
र्मान्वयानुपपत्तिः तस्योपमेयमात्रान्वयांगीकारे च लिंगवचनभेदस्य दोषत्वानुपपत्तिरिति दिक् उपमानत्वं चोपमानिरूपकत्वेनाविवक्षि
तत्वं तदाश्रयत्वेन विवक्षितत्वं चोपमेयत्वं साधारणत्वं च धर्मस्य स्वारसिकमौपचारिकं बिंबप्रतिबिंबभावकृतं श्लेषकृतं वस्तुप्रतिवस्तु
भावेन समासभेदाश्रयणेन चेत्यनेकधा चित्रमीमांसायां प्रपंचितं तत्र स्वर्गगामवगाहनस्येव तथात्वमौपचारिकं तस्य कीर्तेः स्वारसिकत्व
भावात् उपादानादिति वाचकस्योपादानं निर्देशः इतरेषां तु शब्देन प्रतिपादनं तदिति चिंतनीयं ७॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्लाघते श्रीदाक्षितेन शिरसा २

स्थापयतीति

कु.नं. ५ साधारणधर्मप्रकारविशेषोपदर्शनायोदाहरणांतरमाह यथावेति गुणदोषाविति गुणदोषावर्थात्परस्य शल्लन्तजानन्बुधः पंडितः पूर्वं पूर्वनिर्दिष्टं गुणं शि
रसा अभिनंदयति परंपरातो निर्दिष्टं दोषं कंठे नियच्छतीति निरुणद्धि वाचा कंठगत एव हि नैर्वाहयतीत्यर्थः कइव इंदुक्ष्वेडौ चंद्रगरले शल्लन्तगुपादाद ईश्वरो हर इव सो
पि हि पूर्वं चंद्रं शिरसा श्लाघते तत्पूर्वकं धारयति परं च गरलं कंठे नियच्छति क्ष्वेडस्तु गरले विषमित्यमरः शंकते अत्र यद्यपीति साधारणत्वेनाभिमतो धर्मः शल्ल
न्तशिरसा श्लाघते पूर्वमित्यादिनोक्तो यद्यपि नैकोन साधारण इति योजना शल्लन्तित्यादिनोक्तस्तकोपि धर्मः साधारणोनेति वा यथाश्रुते साधारणस्य साधारणत्वा
भावोक्तेरसंगतत्वापत्तेः साधारण्याभावे हेतुः उपमानइत्यारभ्य इतिभेदादित्यंतेनोक्तः समाधत्ते तथापीति वस्तुगत्या साधारण्याभावेपीत्यर्थः चंद्रगरलयोरित्या

यथा वा गुणदोषौ बुधो गृह्णन्निंदुक्ष्वेडाविवेश्वरः शिरसा श्लाघते पूर्वं परं कंठे नियच्छति अत्र यद्यप्युपमानोपमेययोर्नैकः साधारणो धर्मः उपमाने ईश्व
रे चंद्रगरलयोर्ग्रहणं उपादानं तयोर्मध्ये पूर्वस्य चंद्रस्य शिरसा श्लाघनं गृहनं उत्तरस्य गरलस्य कंठे नियमनं स्थापनं उपमेये तु बुधे गुणदोषयोर्ग्रहणं
ज्ञानं तयोर्मध्ये पूर्वस्य गुणस्य शिरसा श्लाघनं शिरःकंपेनाभिनंदनं उत्तरस्य दोषस्य कंठे नियमनं कंठादुपरि वाचा अनुद्घाटनमिति भेदात्
॥ तथापि चंद्रगरलयोर्गुणदोषयोश्च बिंबप्रतिबिंबभावेनाभेदादुपादानज्ञानादीनां शल्लन्तित्याद्येकशब्दोपादानेनाभेदाध्यवसायाच्च सा
धारणधर्मतेति पूर्वस्माद्विशेषः ८ ॥ ॥

दि यथाक्रमं चंद्रगुणयोर्गरलदोषयोश्चेत्यर्थः बिंबप्रतिबिंबभावेन प्रतीयमानसादृश्ययोरुपमानोपमेयधर्मयोर्भिन्नशब्दोपात्तत्वरूपेणाभेदात् अभेदा
ध्यवसायात् एतच्च साधारणधर्मतेत्यग्रेतनेनान्वितं ज्ञानादीत्यादिना शिरसा बाहनाभिनंदनयोः कंठस्थापनतदहिरनुद्घाटनयोश्च संग्रहः शल्लन्तित्यादी
त्यादिना च शिरसा श्लाघते कंठे नियच्छतीत्यनयोः संग्रहः अभेदाध्यवसायादिति अभेदस्याध्यवसायादाहार्यनिश्चयादित्यर्थः साधारणधर्मतेतीति साधार
णधर्मत्वाभिमानविषयतेतीत्यर्थः पूर्वस्मात्पूर्वोक्तोदाहरणात् इतिविशेष इत्यन्वयः न चैवं साधर्म्यप्रतीत्युपपादनेपि वस्तुतस्तदभावात्कथमुपमालंकार रामं० ५
समन्वय इति वाच्यं चमत्कारविशेषप्रयोजकसाधारणत्वाध्यवसायविषयधर्मत्वस्यैवोपमालंकारत्वमित्यभिप्रायादिति ८ ॥ ॥ ॥

V

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोके बिंबप्रतिबिंबभावव्यपदेशस्य गगनजलाशयादिगतचंद्रादिविषयतया प्रसिद्धेः कथं प्रकृते तद्व्यपदेश इत्याशंकायामाह वस्तुत इत्यादि अभिन्नयोः न
यावद्व्यवस्थितयोः पृथगिति भिन्नशब्देनेत्यर्थः बिंबप्रतिबिंबभाव इति बिंबप्रतिबिंबभावापन्नावेवमित्यर्थः समय इति संकेत इत्यर्थः पूर्णाया उपमाया नादिसम
यतानियमप्रसिद्धेस्तद्विपरीतायां लुप्तोपमायां सर्वलोपनियमाशंकानिरासाय लक्षणपूर्वकं तां विभजते वर्णेत्यादिना चकारो वाशब्दार्थे तदनंतरं चलो
पे इत्यध्याहार्यं एवं चेतरेतरयोगाविवक्षया वर्ण्यस्योपमानस्य धर्मस्योपमावाचकस्य वा लोपे अन्यतमानुपादाने लुप्तोपमा सा च एकद्वित्र्यनुपादानैरष्ट

वस्तुतो भिन्नयोरप्युपमानोपमेयधर्मयोः परस्परसादृश्याद् अभिन्नयोः पृथगुपादानं बिंबप्रतिबिंबभाव इत्यालंकारिकसमयः वर्ण्योपमान
धर्माणामुपमावाचकस्य च एकद्वित्र्यनुपादानैर्भिन्ना लुप्तोपमाष्टधा ६ तडिद्गौरीन्दुतुल्यास्या कर्पूरंती दृशोर्मम कांत्या स्मरवधूयंती दृ
ष्टा तन्वी रहो मया ७ यन्नयामेलनं तत्र लाभो मे यश्च तद्रतेः तदेतत्काकतालीयमवितर्कितसंभवम् ८ उपमेयादीनां चतुर्णां मध्ये एकस्य द्व
योस्त्रयाणां च प्रतिपादकशब्दाभावेन लुप्तोपमेत्युच्यते सा चाष्टधा यथा वाचकलुप्ता धर्मलुप्ता धर्मवाचकलुप्ता वाचकोपमेयलुप्ता उपमा
नलुप्ता वाचकोपमानलुप्ता धर्मोपमानलुप्ता धर्मोपमानवाचकलुप्ता चेति तत्रोपमानलोपरहितास्त्वारो भेदास्तडिद्गौरीत्यादिनाश्लोके
न दर्शिताः तद्रहितो भेदा उत्तरश्लोकेन दर्शिताः तडिद्गौरीत्यत्र वाचकलोपः तडिदिव गौरीत्यर्थे उपमानानि सामान्यवचनैरिति समासविधाय
कशास्त्रकृतः इंदुतुल्यास्येत्यत्र धर्मलोपस्तत्रैकदेशिकः अन्न शास्त्रकृतः कांत्या इंदुतुल्यास्येत्यपि वक्तुं शक्यत्वात ९॥॥

धा भिन्नेति पूर्वापराभ्यां उक्तं भवति तडिदित्यादीन्युदाहरणानि अर्थतोप्याचष्टे उपमेयादीनामिति वस्तुतो लाघवात्पूर्णाभिन्नत्वं लक्षणं बोध्यं लक्षणवाक्य
गतं क्रममुपेक्ष्योदाहरणक्रमानुसारेण विभागं दर्शयति यथेत्यादि वाचकलुप्तेति वाचकत्वं चात्र पूर्वाविशेषवत्त्वयोपमाबोधे निरूढत्वं तच्च शब्दानिरू
ढलक्षणया वा तत्राद्यमिवादेर्द्वितीयं तत्सदृशत्वादेरिति तदभावात्तडिद्गौरीत्यादौ वाचकलोपः समासानुशासनेन तन्निरूढलक्षणावगमेपि आनुपूर्वीवि
शेषवत्त्वाभावाद्विशेषस्य तदवबोधनात् शास्त्रकृत इति शास्त्रप्रयुक्त इत्यर्थः ९॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ ८ कर्पूरंतीत्यत्रेति अत्र सर्व प्रातिपदिकेभ्यः क्विब्वा वक्तव्य इत्यनेन विहितः क्विप् लुप्तोपि स्मर्यमाणो धर्ममात्ररूपं आचारं गोधयति कर्पूरपदं चलक्षणया
कर्पूरसादृश्यं तस्य चातिरिक्तत्वे पूर्ववत्प्रयोजकतामसंगेण चास्त्वयो धर्मरूपत्वेन भेदेन वस्तुतस्तु क्विप् लोपात इति संधानेपि तथा वोधात् कर्पूरा
दिशब्दा एव कर्पूरादिसादृश्यप्रयोजकाभिन्नत्वात् दृश्याभिन्नेवाऽचारं लक्षयंतीति युक्तं ननु वाचकस्येवादेरनुपादानाल्लोपो युक्तः साधारणधर्म
स्य तदाचाररूपस्य क्विवुपात्तत्वात् कथं लोप इत्यत आह कर्पूरवदानंदात्मकाचारार्थस्य क्विप इति कर्पूरस्येवेति गार्धवृत्तिः आनंदात्मकः जनकतासं

कर्पूरंतीत्यत्र धर्मवाचकलोपः कर्पूरमिवाचरंतीत्यर्थे विहितस्य कर्पूरवदानंदात्मकाचारार्थकस्य क्विप इवशब्देन सह लोपात् अत्र धर्मलोप ऐच्छिकः नयत्नयो रानंदात्मकतया कर्पूरंतीति तदुपादानस्यापि संभवात् १०

बंधेन वस्तुगत्या आनंदस्वरूपो य आचारस्तद्बोधकस्येत्यर्थः ननु क्विप्लोपाज्ञानेप्याचारप्रतीतेः कर्पूरादिपदानामेव तद्बोधकत्वप्रत्येकथं धर्मलो
पः संगमनीय इतिचेत् अत्रन्यचः एवमपि तद्वाचकतया विहितस्य क्विपो लोपात् तल्लोपव्यपदेशः अत एवात्र समानार्थकः क्यचू नोपात्तः तस्या लु
प्तत्वादित्याहुः तथा स्तु धर्ममात्ररूपस्याचारस्योपादानेपि आनंदत्वादिना विशेषरूपेणानुपादानाद्धर्मलोपो युक्त एव अन्यथा इदुत्तुल्यासोत्तादे राम॰
धर्मलुप्तोदाहरणस्यासंगतत्वापत्तेः नचैवं काव्यादावपि धर्मलुप्तास्यादिति वाच्यं इष्टापत्तेरित्याहुः १० ॥ ॥ ॥ ६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

तस्य·उपमेयस्य·अद्वितीयांततयार्

त्व

स्मरवधूयंतीत्यत्रेति· नन्वपमानादाचारे इति कर्मभूतादुपमानादाचारे क्यचो विधानात्स्मरवधूं रतिमिवाचरंतीत्यवगमे पत्यात्मानमन्यां वेति कथं निर्णय स्तत्राह विशेषणेति एतत्तु रूपाचरणस्य कांतिकरणकत्वरूपविशेषणसामर्थ्यादित्यर्थः कांतेः स्वस्मतः स्त्रीयत्वावगमादिति भावः नचात्मन उपमेयस्यात्वीपदेनोपादानात्कथं लोप इति वाच्यं तस्याद्वितीयांततया कर्मभूतोपमेयासमर्पकत्वात् आत्मानमित्यध्याहृतेनैव तद्बोधात्॥ अत्र च स्मरवधूपदेन स्मरवधूसादृश्यं लक्ष्यते तस्य च प्रयोजकत्वसंसर्गेणाभेदेनाचारेन्वयः तथा च स्मरवधूसादृश्यप्रयोजकाभिन्नात्मकर्मकोन्यैराचारस्तदाश्रयस्त्वीति बोधः काकतालीयेति वृत्तिविषये समासविषये ज्ञापकादिति इवार्थे समासाभावेत द्विवचनादित्यनेनेवार्थविषयसमा

कांतां स्मरवधूयंतीत्यत्र वाचकोपमेयलोपः अत्र कांत्येति विशेषणसामर्थ्यात्स्वात्मानं कामवधूमिवाचरंतीत्यस्यार्थस्य गम्यमानतया स्वात्मन उपमेयस्य सहोपमावाचकेनानुपादानात् क्वचित्तु कः स्वात्मानं स्मरवधूयंतीत्युपमेयोपादानस्यापि संभवात् काकतालीयमित्यत्र काकतालशब्दौ वृत्तिविषये काकतालसमवेतक्रियावर्तिनौ तेन काकागमनमिव तालपतनमिव काकतालमिति इवार्थे समासा ज्ञातद्विवचनादिति ज्ञापकात्समासः उभयत्रोपमेयं त्वस्य कस्यचित्समनंतनैव रहसि तन्व्याऽवस्थानं चैतेन स्वस्य तत्राज्ञसमागमः काकतालसमागमसदृश इति फलति ॥ ॥॥

सान्तुवादोऽनुपपन्नस्तत्ज्ञापकद्वयमित्यर्थः उभयत्र काकागमनतालपतनयोः उपमेयमित्यनंतरं क्रमेणेति शेषः तेनेति काकतालसमवेतक्रियापरयोः काकतालपदयोरिवार्थे समासेनेत्यर्थः काकतालसमागमेति अयं भावः काकागमनतालपतनयोरुपमानत्वेन उपमेययोः स्त्रीयगमनतत्त्वावस्थानयोः पृथगनुपात्तत्वेनोपमेयतया च या योगात्काकतालगमनप्रतोपमानं इत्थं च काकतालसमागमसदृशं काकतालपदार्थस्य चाभेदेन स्त्रीयतवी समागमरूप उपमेयेन्वय इति ॥ ॥ ॥ ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततइति तादृशसमासोऽन्तरमित्यर्थः इतितदर्थइति काकतालपदलक्षितस्य काकक्षततालफलोपभोगसदृशस्याभेदे ततश्चेतिलाभरूपेणोपमेयेनान्व
यादितिभावः अत्रपतनदलितमिति रहोदर्शनक्षुभितहृदयेनेति चांशेवप्रतिबिंबभावापन्नधर्मस्वरूपकथनं तत्त्वेवमन्वयाकारइति बोध्यं नचसकृदुच्चरिताभ्यां
काकतालपदाभ्यां कथमुपमानद्वयावगमइतिवाच्यं अनुभवानुसार्यनुशासनेनमुख्यत्वेनैवचित्र्यस्यस्फुटंप्रतिपत्तेरिति एवंदुरूहत्वात्पद्यंव्याख्यायतत्रोपमा
नलुप्तादीत्युत्तरोऽपिभेदान्प्रदर्शयितुमाह ततश्चेति काकागमनेत्यादि काकागमनतालपतनरूपोयःसमागमस्तद्रूपस्येत्यर्थः इदंचकाकागमनमिव

ततःकाकतालमिवकाकतालीयमितिद्वितीयास्मिन्निवार्थेसमासाच्चतद्विषयादितिसूत्रेणोचेषतिकृतादित्यधिकारस्थेनछप्रत्ययः ते
धाचपतनदलितंतालफलंयथाकाकेनोपभुक्तमेवंरहोदर्शनक्षुभितहृदयातन्वीत्वयोपभुक्तेतितदर्थः ततश्चकाकागमनतालपत
नसमागमरूपस्यकाककृततालफलोपभोगरूपस्यचोपमानस्यानुपादानात्प्रत्ययार्थोपमायामुपमानलोपः समासार्थोपमायांवा
चकोपमानलोपः सर्वोपमेयलोपश्चप्रत्ययविधायकशास्त्रकृतः अविचारितमिदंसंभवमितिसाधारणधर्मस्यानुपादानेप्रत्ययार्थोपमा
यांधर्मोपमानलोपः समासार्थोपमायांधर्मोपमानवाचकलोपइतीदमिहावधातव्यं एतेषामुदाहरणानिविस्तरभयान्न
लिख्यते १२ ॥ ॥

तालपतनमिवेतिमहाभाष्यगतविग्रहवाक्यविरोधशंकापरिहारायोक्तं समागमस्यतादृशक्रियाद्वयाभिन्नत्वेनोक्तयुक्त्यातस्योक्तार्थएवपर्यवसा
नात् विशिष्टोपमायांविशेषणोपमावगतिवत्समागमोपमायामपितदवयवक्रिययोर्यथायोग्यंगम्यमानामुपमामभिप्रेत्यमहाभाष्यकृतांता
दृशविग्रहवाक्यप्रणयनमित्याशयः धर्मस्यानुपादानइति ततस्थानेअभवत्किंब्रवीमितेइतिपाठइतिभावः १२॥ ॥इतिश्रीकुवलयानंदटीकाया
मुपमाप्रकरणंसंपूर्णम्॥ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यद्यप्युपमानिरूपणानंतरं तन्मूलालंकारेषु संभवत्सादृश्या उपमेयोपमैव प्रथमं निरूपयितुमुचिता तत्रारोपितसादृश्यनिबंधनोनन्वयस्तथापि तं हित्वा
यसदृशव्यवच्छेदफलकतया तृतीयसदृशव्यवच्छेदफलिकामुपमेयोपमामपेक्ष्य शीघ्रोपस्थितिकमभिप्रेत्य प्रथमं निरूपयति उपमानोपमेयत्वमि
ति उपमानत्वं उपमेयत्वं चेत्यर्थः द्वंद्वांते श्रूयमाणत्वात् विवक्षितमिति शेषः एवं चैकस्यैव वस्तुन उपमानत्वं उपमेयत्वं च विवक्षितं तदनन्वय इत्यन्वयः
॥ असंभवशंकानिरासायमध्ये उदाहरणोक्तिः नन्वेकत्र लक्षणस्य भगिनीति रिव मतिर्मतिरिव चेष्टेत्यादिरशनोपमायामतिव्याप्तिः तन्मतेत्यादेरेकस्यैव व
स्तुन उपमानत्वस्योपमेयत्वस्य च वर्णनात् अथैकस्य वस्तुन एकनिरूपितमुपमानत्वमुपमेयत्वं चेति विवक्षितं एकपदस्यावृत्तिकल्पनात् इत्थं च र

उपमानोपमेयत्वं यदेकस्यैव वस्तुनः इंदुरिंदुरिव श्रीमानित्यादौ तदनन्वयः ९ ॥
एकस्यैव वस्तुनः उपमानोपमेयत्ववर्णनमनन्वयः १ ॥ ॥ ॥

शनोपमायां मत्यादेश्चेष्टादिनिरूपितमुपमानत्वं भगिन्यादिनिरूपितं तूपमेयत्वमित्येकनिरूपितोपमानोपमेयत्वविरहान्नातिव्याप्तिरित्युच्यते तदा गगनमि
व जलं जलमिव खमित्युपमेयोपमायामतिव्याप्तिः तत्रैकस्यैव वस्तुनो गगनस्य एकजलनिरूपितस्योपमानत्वस्योपमेयत्वस्य च वर्णनादिति चेत् मैवं
एकस्यैवेति विरोधद्योतकेवकारबलेन स्वाश्रयनिरूपितयोरुपमानोपमेयत्वयोर्लाभेन क्वाप्यतिप्रसंगाभावात् अस्ति हि इंदुरिंदुरिवेत्यनन्वये उपमान ॥
त्वं उपमेयत्वं च स्वाश्रयेंदुनिरूपितं न तु रशनोपमायां उपमेयोपमायां वेति संक्षेपः १ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु॰टी॰ अनन्वयपदप्रवृत्तिनिमित्तमाह वर्ण्यमानमपीति नान्वेतीति तमेवान्वेतीत्यर्थः साधर्म्यस्य भेदघटितत्वादिति भावः नन्वेवं सत्यसंबद्धप्रलापत्वापत्तिरित्य
८ त आह अनन्वयिनोपीति वाच्यभितस्यापीत्यर्थः अर्थस्य साधर्म्यस्य अभिधानं आहार्यारोपरूपतया प्रतिपादनं सदृशांतरव्यवच्छेदेन सदृशांत
रव्यावृत्तिबोधद्वारेण एतदेव विशदयति इंदुरित्यादिना इत्थं च सदृशांतरव्यावृत्तिस्तवनद्वारानुपमत्वद्योतनरूपप्रयोजनवत्त्वादायाततोरूढ्रो

वर्ण्यमानमपि स्वस्य स्वेन साधर्म्येनान्वेतीति युक्तेः अनन्वयिनोप्यर्थस्याभिधानं सदृशांतरव्यवच्छेदेनानुपमेयत्व
द्योतनाय इंदुरिंदुरिव श्रीमानित्युक्तौ श्रीमत्त्वे चंद्रस्य नान्यः सदृशोस्तीति सदृशांतरव्यवच्छेदो लभ्यते तत्र स्वस्ये
नापि सादृश्याभावादनुपमेयत्वे पर्यवसानं यथा वा गगनं गगनाकारं सागरः सागरोपमः रामरावणयोर्यु
द्धं रामरावणयोरिव पूर्वोदाहरणे श्रीमत्त्वस्य धर्मस्योपादानमस्ति इह तु गगनादिषु वैपुल्यादेर्धर्मस्योपादानं
नास्तीति विशेषः १॥ ॥

दृनार्थवादवत्तद्द्वारमात्रतया सादृश्यप्रतिपादनेपि नासंबद्धप्रलापत्वापत्तिरिति भावः उदाहरणांतरमाह यथा वेति गगनाकारं गगनसदृ
शं इवेत्यतः प्राक् युद्धमित्यध्याहार्यम् उदाहरणांतरप्रदर्शनबीजमाह पूर्वोदाहरणेति वैपुल्यादेरित्यादिपदात् गांभीर्यदारुणत्वयोः सं राम॰
ग्रहः १॥ ॥ इत्यनन्वयःप्रकरणं॥ ॥२॥ ॥ ॥ ॥ ॥ ८

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथोपमेयोपमां लक्षयति पर्यायेणेति अयौगपद्येनेत्यर्थः वाक्यभेदेनेति यावत् तत् उपमानोपमेयत्वं विवक्षितमिति शेषोऽपि बोध्यः उपमेयोपमेति लक्षणनिर्देशः उपमेयेनोपमेति व्युत्पत्तेः धर्मोऽर्थ इवेत्युदाहरणं अर्थो धनं पूर्णा श्रीः पूर्णा समृद्धिः अत्र च धर्मार्थयोर्द्वयोर्वाक्यभेदेन उपमानत्व उपमेयत्वं च वर्णितं तत्राद्यवाक्येऽर्थस्योपमानत्वं धर्मस्योपमेयत्वं द्वितीये तु तद्विपर्यासेन धर्मस्योपमानत्वमर्थस्योपमेयत्वमिति लक्षणसमन्वयः उपमानोपमेयत्वमात्रोक्तावनन्वयेऽतिव्याप्तेर्द्वयोरित्युक्तं एवमपि समत्वं शारदेन्दावुरहो कुमुदतारका इत्युभयविश्रान्तसा

पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि १ ॥ ॥ ॥

दृशायामुपमायामतिव्याप्तिः तत्र द्वयोः कुमुदतारकयोः सादृश्याश्रयत्वरूपोपमेयत्वस्यैव तत्प्रतियोगित्वरूपस्योपमानत्वस्याप्यर्थतः प्रतीतेरतः पर्यायेणेत्युक्तं ननु भाति मतिरिव मतिः मतिरिव चेष्टा चेष्टेव कीर्त्तिरतिविमलेति रशनोपमायामतिव्याप्तिः तत्र द्वयोर्मतिचेष्टयोर्वाक्यभेदेनोपमानोपमेयत्ववर्णनादिति चेन्न द्वयोरित्यनेन परस्परमुपमानोपमेयत्वस्य विवक्षितत्वात् अन्यथा पर्यायपदेनैवानन्वयवारणेन द्वैयर्थ्यापत्तेरिति संक्षेपः १ ॥ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु०नं० ननूपमाप्रतीयोमयरूपाया उपमाद्वयरूपायाश्चोपमेयोपमाया अलंकारांतरत्वे किं बीजमित्यत आह द्वयोरिति तथा चार्थविशेषद्योतकतया चमत्कृ
९ तिवैलक्षण्यमेव तत्र बीजमिति भावः कथं तृतीयसदृशव्यवच्छेदलाभस्तत्राह धर्मार्थयोरिति धर्मार्थयोर्मध्य इत्यर्थः मुखतः शब्देन तथा च शब्दस्पष्टप्र
तिवचनेन तदितरपरिसंख्यार्थमिति न्यायादिहापि तृतीयसदृशव्यवच्छेदलाभ इति भावः खमिवेति शरद्वर्णनमिदं खमाकाशमिव जलं कालुष्या

द्वयोः पर्याययोरेणोपमानोपमेयत्वकल्पनं तत्तृतीयसादृश्यव्यवच्छेदार्थं धर्मार्थयोर्हि कस्यचित्केनचित्सादृश्ये वर्णिते तस्याप्यनेन सादृश्यमर्थसिद्धमपि मुखतो वर्ण्यमानं तृतीयसादृश्यव्यवच्छेदार्थं फलति यथा वा खमिव जलं जलमिव खं हंस इव चंद्रश्चंद्र इव हंसः कुमुदाकारास्ताराः ताराकाराणि कुमुदानि स्वर्वेश्मभूमीरिति धर्म उपात्त इह तु निर्मलत्वादिधर्मो नोपात्त इति भेदः उदाहरणद्वयेपि प्रकृतयोरेवोपमानोपमेयत्वकल्पनं शब्दिधर्मार्थसमृद्धेः शरदि गगनसलिलादीनां नैर्मल्यस्य वर्णनीयत्वात् प्रकृताप्रकृतयोरप्येषा संभवति यथा गिरिरिव गजराजोयं गजराज इवोच्चकैर्विभाति गिरिः निर्झर इव मदधारा मदधारेवास्य निर्झरः स्रवति १॥॥

पगमेन निर्मलत्वातिशयात् शेषं स्पष्टं निर्मलत्वादीत्यादिपदेन स्वच्छत्वातिशयपरिग्रहः गिरिरिवेति अत्र गजः प्रकृतः अयमिति प्रकृतपरामर्शिसर्व राम०
नामनिर्दिष्टत्वात् अत एवोपक्रमादग्रेप्यस्य मदधारेत्यत्रयो बोध्यः अत्र पूर्वार्द्धे उच्चकैर्विभातीति समानधर्म उपात्तः उत्तरार्द्धे च स्रवतीति स उक्त इति दि ९
क् १ ॥ ॥इत्युपमेयोपमाप्रकरणं॥ १॥ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रतीपमिति लक्ष्यनिर्देशः ननूपमानोपमेयभावस्यैव वक्रिकतया मुखादेरप्युपमानत्वसंभवाच्चंद्र इव मुखमित्युपमायामतिव्याप्तिरित्यत आह प्रसिद्धेति प्रसि-
द्धोपमानस्य उपमेयभावः उपमेयत्वं प्रतीपं प्रतीपपदवाच्यं कुतः प्रातिलोम्यात् प्रसिद्धोपमानप्रतिकूलत्वात् उपमेयभावप्रातिलोम्यादित्यविसर्गपाठेऽपि
प्रसिद्धोपमानस्य य उपमेयभावस्तस्य प्रातिलोम्यादुपमानप्रतिकूलत्वादुपमानस्योपमेयत्वकल्पनं प्रतीपमित्युच्यत इति व्याख्येयं ननु प्रसिद्धस्योपमानो-
पमेयभावस्य वैपरीत्यादिति यथाश्रुतरीत्या एवंविधप्रातिलोम्यस्य तृतीयपंचमप्रतीपभेदाव्याप्तिस्तेन प्रतीपपदप्रवृत्तिनिमित्तत्वायोगादिति एवं चोक्त-
प्रकारेणोपमानप्रतिकूल्यस्य प्रतीपपदप्रवृत्तिनिमित्तत्वकथनेन प्रसिद्धोपमानप्रतिकूलत्वधर्मः प्रतीपमिति प्रतीपपंचकसाधारणं सामान्यलक्षणमिति
सूचितं अत एव पंचमप्रतीपव्याख्यानावसरे वक्ष्यति उपमानप्रातिलोम्यादिति प्रतिकूलत्वं च तिरस्कारप्रयोजकत्वं एतस्य च सकलप्रतीपभेदसाधार-

प्रतीपमुपमानस्योपमेयत्वप्रकल्पनं त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः ॥ प्रसिद्धोपमानोपमेयत्वप्रातिलोम्यात्प्रतीपं यथा वा यत्त्व-
न्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी येऽपि त्वद्गमनानुसारिगतयस्ते राजहंसा गतास्त्वत्सादृ-
श्यविनोदमात्रमपि मे दैवेन न क्षम्यते १ ॥॥

णं तत्तत्र स्फुटीकरिष्यते यथा वेति प्रोषितस्य प्रियां प्रति वियोगवेदनानिवेदनमिदं अयि प्रिये त्वदीयसादृश्येन विनोदनं विनोदो विरहस्यापनं तन्मात्रम-
पि मम दैवेन न क्षम्यते एतदेव प्रदर्शयति यदित्यादिना त्वन्नेत्रयोः समाना साधारणी कांतिः शोभा यस्य तथाविधं यदिंदीवरं तत्सलिले मग्नं वर्षर्तुना जलप्र-
वृद्धेः तव मुखस्य छायया कान्त्या अनुकारी सदृशः शशी मेघैरन्तरितस्तिरोहितः येऽपीत्यपि भिन्नक्रमः त्वद्गमनसदृशगतयो ये राजहंसास्तेऽपि गता इति अत्र कां-
न्त्यादिधर्मोपादानात्सर्वोदाहरणवैलक्षण्यं बोध्यं ननूपमानादुपमेयस्याधिक्यवर्णनारूपात् व्यतिरेकालंकारादस्य को भेदः उच्यते तत्रैव धर्म्यप्रयुक्त-
उपमेयस्याधिक्यं विवक्षितमिह तूपमानतामात्रप्रयुक्तत्वात्साधर्म्यप्रयुक्तमिति १॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ प्रतीपांतरमाह अन्योपमेयेति अन्यद्वर्ण्यंउपमानं तद्रूपं यदुपमेयं तस्य लाभेन वर्णनीयस्य मुखादेरनादरोगर्वपरिहारोपितत्प्रतीपमित्यर्थः तस्य
१० गर्वप्रसक्तिपूर्वकत्वेनोपमेयतायाअपिपूर्वमप्राप्ताउपमानतिरस्कृति विशेषप्रयोजकत्वादितिभावः अत एव लाभेनेत्युक्तं न तु समत्वेनेति अप्र
प्रप्रामेलाभशब्दार्थत्वात विच्छित्तिविशेषेति चमत्कारोत्कर्षेत्यर्थः उक्तरीत्योपमानतिरस्कारातिशयप्रतीतेरितिभावः गर्वमिति असंक्रा

अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत् अलं गर्वेण ते वक्त्र कान्त्या चंद्रोऽपि तादृशः १२ अन्तुत्कृष्टगुणतयावर्ण्यमानस्यान्यत्रस्व
सादृश्यमसहमानस्योपमेयं किंचित्प्रदर्श्यतावन्नातस्यतिरस्कारोहितीयंप्रतीपं पूर्वस्मादपिविच्छित्तिविशेषशालि यथावा॥
गर्वमसंभाव्यमिमंलोचनयुगलेन किंवहसिभद्रे संतीदृशानिदिशिदिशिसरस्सु ननु नीलनलिनानि वर्ण्योपमेयलाभेन त
थान्यस्याप्यनादरः कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्याः संतिहि स्त्रियः १३ अन्तुत्कृष्टगुणतया क्वाचिदप्युपमानभावमसहमानस्य
वर्ण्यस्य वर्ण्यमुपमेयंपरिकल्प्यतावृत्तातस्यातिरस्कारः पूर्वप्रतीपवैपरीत्येनतृतीयंप्रतीपं यथावा अहमेव गुरुः सुदारुणानामि
तिहालाहलमास्मतातदृप्यः ननु संति भवादृशानि भूयो भुवनेऽस्मिन्वचनानिदुर्जनानां १॥॥

त्यं संवहनायोग्यंअपरिमितमितियावत् भद्रेशोभनेइतिसंबोधनं नन्विति हेत्वर्थः अव्ययानामनेकार्थकत्वात पूर्वोदाहरणोक्तात्वेतिसमानधर्मोपा
दानमिहतुनेतिभेदः वर्ण्योपमेयेति अन्यस्यावर्ण्यस्य अनादरोपितथाप्रतीपमित्यर्थः अहमेवेति सुदारुणानां अतितीव्राणां गुरुः श्रे राम॰
ष्ठः तातेतिसानुकंपसंबोधनेमास्मदृप्य इति दर्पमाकृथाइत्यर्थः १॥ ॥ ॥ ॥ १०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

वर्ण्येनान्यस्येति निरूपितत्वं तृतीयार्थः वर्ण्यनिरूपिता यान्यस्या वर्ण्येतरस्योपमानस्य इत्यर्थः अनिष्पत्तिवचः उच्यमानाऽनिष्पत्तिः कृदभिहितइतिन्याया
त् तत्प्रतीपं सुधेति किलेति वार्तायां त्वन्मुखाभमम्बुजमिति वार्ता सुधानिष्प्रयोजनोऽपवादः अलीकार्थकत्वेनापवादस्यानिष्प्रयोजनत्वे उत्कर्षेति उ
पमानतिरस्कारातिशयप्रयोजकत्वरूपेत्यर्थः सुधापवादोक्तेति उक्तार्थेनैतत् आकर्णयेति वचनीयं अलीकतया निदिते अतएव धुवीत्युक्तं लोका
न्तरे सुखाम्बुसन्निधाने न विशेषादर्शनादलीकत्वग्रहायोगात् संनिधानेऽपि विशेषाग्रहणात्पामरैरित्युक्तं अत्र वचनीयं पामरैरित्येताभ्यामुपमितेरनिष्पत्तिः प्र
काश्यते प्रतीपमितिः कः अर्थः प्रयोजनं यस्य तत्तथा अनर्थकमिति यावत्तस्य भावः कैमर्थ्यं तदपि प्रतीपमन्वते आलंकारिका इति शेषः न्वत्रपमानस्य वैद्य

वर्ण्येनान्यस्योपमाया अनिष्पत्तिवचश्च तत् सुधापवादो मुग्धाक्षि त्वन्मुखाभं किलाम्बुजं १४ अत्रोर्ण्येव वर्ण्योपमित्यनिष्पत्तिवचनं पूर्ववदु
त्कर्षशालि चतुर्थं प्रतीपं उदाहरणे सुधापवादत्वोक्त्योपमित्यनिष्पत्तिरुद्घाटिता यथा वा आकर्णय सरोजाक्षि वचनीयमिदं भुवि॥
शशांकस्तव वक्त्रेण पामरैरुपमीयते प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिन्दुना १५ उपमेय
स्यैवोपमानप्रयोजननिर्वहत्वेनोपमानप्रातिलोम्यात्पञ्चमं प्रतीपं ३॥ ॥

देशाह्लादविशेषरूपप्रयोजनसत्त्वात्कथमनर्थकत्वमत आह उपमेयस्यैवेति उपमाननिर्वर्हत्वेन उपमानकार्यकारित्वेन अयं चोपमानकैमर्थ्ये हेतुः अत
एवोपमानकैमर्थ्यमित्यध्याहार्यं आह्लादविशेषादेरन्यलभ्यत्वेन प्रयोजनत्वासंभवात्कैमर्थ्यमिति भावः उपमानप्रयोजकनिर्वहत्वेनेति पाठे उपमानं प्रयो
जकं यस्या इति वक्रव्रीहिः नन्वसमस्य कैमर्थ्यस्योपमानाक्षेपस्याक्षेप इति वामनमते आक्षेपालंकारत्वेनोक्तत्वात्कथं प्रतीपत्वमत आह उपमानप्रातिलो
म्यादिति उपमानप्रतिकूलत्वादित्यर्थः प्रतिकूलत्वं च तिरस्कारप्रयोजकत्वमित्युक्तं तथा च प्रतीपसामान्यलक्षणाक्रान्तत्वात्प्रतीपान्तर्भावः एवोचित इति
भावः ३॥ ॥ ॥ ॥ प्र॰ ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ तदोजस इति नैषधीये नैषधवर्णनमिदं विभिन्नस्थानस्य नलस्यौजसः प्रतापस्य तद्यशसश्च स्थितौ सत्यां इमौ सूर्यचंद्रौ वृथा प्रतापज्योत्स्नादेः कार्यस्य
११ ताभ्यामेवोपपत्तेर्निरर्थकाविति चित्ते यदा यदा कुरुते तदा भानोर्विधोश्च परिवेषस्य परिधेः केतनात् छलात् कुंडलनां वैयर्थ्यसूचिकां रेखां धत्ते एनां क
रोतीत्यन्वयः अत्र तत्राप्यपरिवेषः किंतु कुंडलनेत्यपह्नुतौ कैमर्थ्यरूपप्रतीपस्यांगत्वात्तयोरंगांगिभावलक्षणः संकरः यद्यप्यापमित्यादिवद्यत्
तत्पदे वीप्सायाः प्रकरणं न दोष इति बोध्यं केचित्तु दंडिप्रभृतयः अनन्वयोपमेयोपमाप्रतीपानामिति प्रतीपपदेन चाद्याद्यभेदत्रयमेव गृह्यते न तु तत्प्रभेदद्वय
मपि तत्रोपमितिक्रियानिष्पत्तेरभावेनोपमांतर्भावस्यासंभवात् चरमतत्द्वयाद्यभेदत्रयस्यापि नोपमांतर्गतिर्युक्ता चमत्कारं प्रति साधर्म्यस्य प्राधान्येनाप्र

यथा वा तदोजसस्तद्यशसः स्थितावि मौ वृथेति चित्ते कुरुते यदा यदा तनोति भानोः परिवेषकैतवात्तदा विधिः कुंडलनां विधोरपि केचिदनन्वयोपमेयोपमाप्रतीपानामुपमाविशेषत्वेन तदंतर्भावं मन्यंते अन्ये तु पंचमप्रतीपप्रकारमुपमानाक्षेपरूपत्वादाक्षेपालंकारमाहुः ५ ॥ ॥

योजकत्वात् साधर्म्यनिबंधनस्योपमानतिरस्कारस्य च हि तत्र चमत्कृतिप्रयोजकतया विवक्षितो न तु साधर्म्यमेव प्रत्युत तस्य प्रसंक्ताऽरितया विवक्षितमिति सहृदय
साक्षिकं एवमनन्वयोपमेयोपमयोरपि तत्सादृश्यस्य चमत्कारितया प्राधान्येन विवक्षितत्वादित्यत्र तृतीय सदृशव्यवच्छेदोपपत्तयेति न तयोरप्युपमांतर्ग
तिर्युज्यते अन्यथा सादृश्यवर्णनमात्रे रूपकोपमांतर्भावे धैर्यलावण्यगांभीर्यप्रमुखैस्त्वमुदन्वतः गुणैः समस्त्वोभिभेदः समवपुषैवेदृशोनत्वेइति व्यतिरेकालंका
रस्याप्युपमांतर्गतिः स्यात् तत्र साधर्म्ये समानाधिकरणां वैधर्म्यमेव चमत्कारे प्रधानं न तु साधर्म्यमिति चेत् तुल्यमिदं प्रतीपादिष्वपीति सहृदयैराकल राम॰
नीयं एतदेवास्य रसवीजमभिसंधायोक्तं केचिदिति अन्ये वामनादयः अत्र चास्य रसवीजं प्रागेवावेदितम् ॥ ॥इति प्रतीपप्रकरणं॥ ॥४॥ ॥ ११

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उपमानस्य यत् विशेषणं तत् बिंबपदवाच्यं॥ उपमेयस्य यत् विशेषणं तत् प्रतिबिंबपदवाच्यं॥ बाधकालीनं इष्टा तत्वं स्वानं प्राहार्य॥
उपात्तो यो बिंबाविशिष्टविषयस्तद्धर्मिको यः आहार्यो निश्चयः आरोपात्मको निश्चयस्तस्य विषयीभूतं उपमानस्याभेदरूपं रूपकं ता
रूपकं पं रूपकं तदन्यतरदिति स्वर्थः ३
धा ३ उपमानाभेदताद्रूप्यान्यतरद्बुद्धिविषयीकरणं २ मुखं चंद्र इति यस्तस्य सर्वत्र चंद्राभेदो मुखमिति मुखविरोध
रूपको ग्र: ३

रूपकं लक्षयति विषय्यभेदेति रूप्यते इतरथा वर्णतया ज्ञायते धर्मी अनेनेति रूपं तत्र रूपमस्यास्तीति रूपवत् तस्य भावस्ताद्रूप्यं चंद्रकार्यकारित्वादि विषयिणा
उपमानस्य अभेदताद्रूप्याभ्यां विषयस्योपमेयस्य यत् रंजनमिव रंजनं स्वोपरक्तबुद्धिविषयीकरणमिति यावत् तत् रूपकमित्यर्थः रूपकं तदितोऽपपाठः रूप
कं तदिति पाठे तु तदित्यस्याहार्यं उपात्तबिंबाविशिष्टविषयधर्मिकाहार्यारोपनिश्चयविषयीभूतं उपमानाभेदताद्रूप्यान्यतरत् रूपकमिति निष्कर्षः मुखं चंद्र
इत्यादौ नामार्थयोरभेदान्वयव्युत्पत्तिवशादाहार्यं चंद्राभेदनिश्चयात्मकरणसमन्वयः मुखमपरश्चंद्र इत्यत्र तु न चंद्राभेदो विषयः अपर इति भेदस्य विवक्षितत्वा
त् अपितु चंद्रकार्यकारित्वरूपं ताद्रूप्यमिति तत्रापि लक्षणसंगतिः न च तस्य मुखे सत्वात् कथमारोप इति वाच्यं चंद्रकार्यसजातीयकारित्वस्यैव मुखे स
त्वादिति यद्यपि नामार्थयोरभेदान्वयानुरोधादिहापि चंद्रपदलक्षितस्य तत्कार्यकारिणोऽभेदसंसर्गेणैव मुखेऽन्वयादभेदरूपकमेव तथाप्युपमानतावच्छे
विषय्यभेदरूपा यां रंजनं विषयस्य यदिति प्राचीनपाठे दृष्टा दीक्षितैर्व्याख्यातं चंद्रतादि

विषय्यभेदताद्रूप्यरंजनं विषयस्य यत् रूपकं तत् त्रिधा
धिक्यन्यूनत्वानुभयोक्तिभिः १६ ॥ ॥ ॥ नं १

दकरूपेणाभेदभाने एवाभेदरूपकत्वं तत्कार्यकारित्वादिरूपेणाभेदभाने तु ताद्रूप्यरूपकत्वमिति तात्पर्यम् अत्र कमलमेंभसि कमलेच कुवलये तानि क
नकलतिकायामित्याद्यतिशयोक्तिवारणाय उपात्तेति विषयविशेषणं आरोपपदनिषेधानंगकत्वेन विशेषणीयः तेनापन्हुतेर्भ्रांतिमान्भ्रांतिवारणा
याहार्येति त्वत्पादनखरत्नानां यदलक्तकमार्जनं इदं श्रीखंडलेपेन पांडुरीकरणं विधोरिति निदर्शनावारणाय बिंबाविशिष्टेति संशयोत्प्रेक्षयोर्निरासा
य निश्चयेत्युक्तमिति संक्षेपः आधिक्येत्यादि आधिक्यमुपमानस्यस्वाभाविकीमवस्थामपेक्ष्योपमेयतादात्म्यावस्थायां बोध्यं एवं न्यूनत्वमपि अनुभयं आ
धिक्यन्यूनत्वोभयरहितं अभेदताद्रूप्यान्यतरमात्रं १ ॥ ॥ ॥ ॥ ॥

लेपनं ३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आलोचनं स्थानं २

कु॰ नं॰ अयं हीत्यादि अयं वर्ण्यमानो राजा येन हेतुना पुरः नगर्यः शिवस्यापि त्रिपुरदाहकत्वात्स एवायमिति भावः तार्तीयीकमिति तृतीयमेव तार्तीयीकं तीयादीकक् स्वार्थे
१२ वाच्य इति वार्त्तिकानुसारात् विलोचनं त्रिनेत्रत्वद्वयः शंभुरिति अत्राप्ययमित्यनुषंजनीयं अन्यथा अतिशयोक्तिः स्यात्प्रकृते रूपको दाहरणत्वासंगतेः अद्य राजभा
वावस्थायां समदृष्टितां समं दृष्टि लोचनतां एकरूपालोचनत्वं च मुखेंदुनेति अत्रेंदुपदमिंदुकार्यकारिपरं किमिंदुनेति प्रसिद्धचंद्रान्नेदविवक्षणात् अ
तश्च द्वितादूप्य रूपकमिदं न चात्रेतरपदार्थप्राधान्यादिंदुकार्यकारि रिणि मुखाभेदभानान्मुखाभेदरूपकं स्यादिति चेद्दतादूप्यरूपकमिति वाच्यं कुत्रापि वैचि
मुखे

अयंहि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात् अयमास्ते किलाशंभुस्तार्तीयीकं विलोचनं १७ शंभुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टितां
॥ अस्या मुखेंदुना लब्धे नेत्रानंदे किमिंदुना १८ साधीयमपरा लक्ष्मीरसुधासागरोदिता अयं कलंकिनश्चंद्रान्मुखचंद्रोऽतिरिच्यते १९॥

मुखनिष्ठाभेदः संमुखानुयोगिकः चंद्रप्रतियोगिकस्तेन संबंधेन मुखे चंद्रोऽस्तीत्यर्थः

वेशानुमुखस्यत्वनिष्ठाभेदप्रतियोगित्वसंसर्गेणान्वयाभ्युपगमात् विशेषणानुयोगिकस्यापि विशेषणसंबंधतायाः स्वामित्वस्य स्वत्वस्य अन्त्यत्वादिभिः प्राची
नैश्चैत्रस्य धनमित्यादावंगीकारात् एवं च मुखनिष्ठाभेदप्रतियोगी चंद्र इत्यत्कार्यकारीवेति बोधान्नमुखाभेदरूपकापत्तिः मुखप्रतियोगिकाभेदस्याभानादि
ति एवमन्यत्रापि ऊह्यं अस्तु धेति सुधासागरादुदिता उत्पन्नापरिज्ञालक्ष्मीः इयं तु न तथेति न्यूनत्वोक्तिः अतिरिच्यत इति निष्कलंकतया अधिको भ
वतीत्यर्थः १॥ ॥ चंद्र ॥ ॥ ॥ एम॰
१२

संबंधस्य २

चैत्रस्य धनमित्यत्र प्राचां मते षष्ठ्याः स्वामित्वमर्थः स एव संबंधस्तेन विशेषणनिष्ठसंबंधेन स्वामित्वस्य धनेऽन्वयः संमतः॥ तथा सति धननिरूपितचैत्रनिष्ठस्वामित्ववद्धनमिति बोधः॥ नवीनमते तु
विशेष्यनिष्ठस्वत्वं षष्ठ्यर्थः स एव संबंधस्तेन चैत्रनिरूपितस्वत्वाश्रयो धनमिति बोधः २

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषय्यभेदरूपाभ्यां रंजनं विषयस्य यदि पाठः प्राचीनः ॥ तत्र विषय्यभेदरूपाभ्यामिति पदस्य व्याख्यानं विषयि
णोऽभेदेन रूपेण च विषयस्य रंजनं रूपकं

लक्षणश्लोकं व्याचष्टे विषय्युपमानेत्यादि विषयिणोऽभेदेन रूपेण चेति पाठः रूपेण आह्लादकत्वादिना तद्रूपेण क्वचिन्न तद्रूपेण चेत्येव पाठः परमार्थत
स्तु प्रामाणिकपुस्तकेषु विषयिणो रूपेण विषयस्य रंजनमिति युक्ततरः पाठः तेन तच्चेत्यादेर्न पौनरुक्त्यमिति ध्येयं हरिद्रादिना पटादिरंजनेष्व युक्तस्य रंज
नशब्दस्येह प्रवृत्तौ बीजमाह अन्यरूपेणेति रूपं रक्तपीतादिकं अभेदताद्रूप्ये च तथा वा स्वदीपधर्मेणान्यस्य तद्धर्मसंपादनत्वसाम्यादिह गौणं रंजनशब्द पृष्ठ २

विषय्युपमानभूतं पद्मादि विषयस्तूपमेयं वर्णनीयं मुखादि विषयिणोऽभेदेन रूपेण च विषयस्य रंजनं रूपकं अन्यरूपे
ण रूपवतः करणात् तच्च क्वचित्प्रसिद्धविषय्यभेदपर्यवसितं क्वचिद्भेदे प्रतीयमानस्य तदीयधर्मारोपमात्रपर्यवसितं तत
श्च रूपकं तावद्द्विविधं अभेदरूपकं ताद्रूप्यरूपकमिति द्विविधमपि प्रत्येकं त्रिविधं प्रसिद्धविषय्याधिक्यवर्णनेन तन्न्यूनत्व
वर्णनेन तदुभयोक्त्या च एवं रूपकं षड्विधं अयं हीत्यादिसार्द्धश्लोकेनाभेदरूपकाणि अस्याः सुरेन्द्रेत्यादिसार्द्धश्लोकेन ताद्रू
प्यरूपकाणि चाधिक्यन्यूनत्वतदुभयोक्त्युद्देशक्रमप्रातिलोम्येनोदाहृतानि · ३ ॥ ॥

प्रयोग इति भावः तच्चेति रंजनं चेत्यर्थः प्रसिद्धेति कविसंप्रदायप्रसिद्धोपमानाभेदेन लब्धात्मकमित्यर्थः रूपपदस्याभेदताद्रूप्योभयसाधारणत्वादिति भा
वः अभेदेन रूपेण चेति पाठे तु तच्चेत्यत्र चशब्दो हेत्वर्थकः तेन पूर्वोक्तस्यैव समर्थनमिति न पौनरुक्त्यं तावत् विधान्तरोक्तेः प्राक् उद्देशक्रमप्रातिलोम्येनेति
निर्देशक्रमवैपरीत्येनेत्यर्थः ३ ॥ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतदेव विवृणोति येनेत्यादिः विशेषणेनेति हेतौ तृतीया चन्द्रस्य तत्त्वविशेषणहेतुकाशिवाभेदानुरंजनादित्यर्थः ननु न्यूनत्ववर्णनेऽभेदापकर्षयोः प्रतीतेः कथं च कु॰ नं॰
मत्कारितेत्यत आह अभेददार्ढ्यापादकत्वादिति विशेषनिषेधस्य शेषाभ्यनुज्ञाफलकतया निषिद्धव्यतिरिक्तसकलगुणशालिता प्रतीता चैकदेशविकृतमनन्य १३
वद्भवतीति न्यायेनाभेदनिश्चयसंपादकत्वादित्यर्थः विभावनात् प्रकाशनात् चन्द्रज्योत्स्नेति राजानं प्रति कस्यचिदुक्तिः हे भगवन् चन्द्रज्योत्स्ना वत विशदं स्वीतं पु
लिनं यस्य तथाभूते ऽस्मिन् शरय्वाः शरयूनामकनद्याः सैकते सिकतामयप्रदेशे कपोतस्थितस्मिन् हरयोः विरतं ऽतिचिरकालेवादरूपं द्यूतमभूत कीदृक्षत

येन दग्धा इति विशेषणेन वर्णनीये राज्ञि त्रिपुरदाहशिवाभेदानुरंजनात् शिवस्य पूर्वावस्थातो वर्णनीयराजभावावस्थायां न्यूनत्वाधिकत्वयोरवर्णना
त्तावुभयाभेदरूपकमाद्यं तृतीयलोचनप्रहाणेनास्य पूर्वावस्थातो न्यूनतादर्शनान्न्यूनाभेदरूपकं न्यूनत्ववर्णनमप्यभेददार्ढ्यापादकत्वाच्चम
त्कारकारि विषमदृष्टिपरित्यागेन जगदुद्धारकत्वेनास्य शिवस्य पूर्वावस्थातो वर्णनीयराजभावावस्थायामुत्कर्षविभावनादधिकाभेदरूपकं तृती
यं एवमुत्तरत्रतादूप्यरूपकोदाहरणेऽपि क्रमेणानुभयन्यूनाधिकभावा ऊह्याः अत एव क्रमेणोदाहरणान्तराणि चन्द्रज्योत्स्नाविशदपुलिने सै
कतेऽस्मिन् सरय्वा वादद्यूतं चिरतरमभूत्सिद्धयूनोः कयोश्चित् एको वक्ति प्रथमनिहतं कैटभं कंसमन्यस्त्वं सत्वं कथय भवतां कोहतस्तत्र पूर्वं अत्र
सत्वमित्यनेन कंसकैटभयोर्हन्तारौ रुद्रशिवविष्णूदात्म्यवर्णनीयस्य राज्ञः प्रतिपाद्यते प्रतिकंसकैटभवधयोः पौर्वापर्यप्रश्नव्याजेन तन्नादात्म्य
दृढीकरणात् पूर्वावस्थातउत्कर्षापकर्षयोरविभावनाच्चानुभयाभेदरूपकं ४ ॥॥

आह एकः सिद्धयुवा कैटभं दैत्यविशेषं प्रथमं निहतं वक्ति वदति अन्यः कंसं प्रथमनिहतं वक्ति सः कंसकैटभयोर्निहन्ता त्वं तत्र तयोर्मध्ये पूर्वं को हत इति तत्त्वं कथ
येत्यन्वयः यद्यपि मुनिप्रभृतावेव भगवन्निमित्तं राम इति नराज्ञादौ तथापि राज्ञो भगवत्तादात्म्यवर्णनादनौचित्यं परिहरणीयं क्वचित्तु भवतेति पाठः अत्र ज्योत्स्नाप
देनैव चन्द्रिकालाभेऽपि चन्द्रपदं शारदपूर्णचन्द्रपरतया नान्यार्थं तु व्यमालेत्यत्र पुष्पपदमिवोत्कर्षप्रकर्षपरतयेति बोध्यं वादयोग्यता स्वचनायन्नो रित्युक्तं अयं राम॰
हीत्युदाहरणोऽभेदारोपहेतुभूतं पुरदाहकत्वरूपं साधर्म्यमुपात्तं इहतु जगदुद्धारकत्वादिकं तत्र गम्यमानमिति भेद ४ ॥ ॥ ॥ १३

विष्णुतादात्म्यवर्णने न यथा विष्णोर्भगत्पालनकर्तृत्वं प्रसिद्धं तथा वर्णनीयराज्ञि जगद्रक्षकत्वादि गम्यमानम् १

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वेधा इति द्वेधा कांताधर्मिकत्वकनकधर्मिकत्वरूपविधाद्वययुक्तं भ्रमं बलवदनिष्टानुबंधित्वरूपसाधनत्वभ्रमं सर्वेषामपि भ्रमाणां वेधसा निर्माणेऽपि प्राशस्त्याविवक्षयेत्यमभिध-
त्ते अयमाशय इत्युदाहरणे शंभुसादृश्यं गम्यमानमिह तु तत्तादात्म्यरूपं तदुपात्तमिति भेदः त्वय्यागत इति राजानं प्रति कवेरुक्तिः सेतुश्च मंथश्चेति द्वंद्वः मंथनं मंथः अमृतमंथनं
द्वीपांतरेऽपि त्वयि नागतराममतत्द्वीपेनाकीतिनिरुच्यते अत्र राजभावावस्थायां शंभुर्विष्णुमित्यत्र विष्णुसंरक्षकत्वं सादृश्यमुपात्तं इह तूक्तेति भेदः ५ किंपद्मस्येति दर्पितांप्र-
तिनायकोक्तिः तव वक्त्ररूपे इंदुकार्यकारित्वमस्ति अयमपरः प्रसिद्धः शीतांशुरुद्धः उज्जृंभते उदितो भवति तस्मात्तव वक्त्रेंदुः पद्मस्य रुचिं कांतिं किं न हंति प्रयोजनमनुद्दिश्य
न मंदोऽपि प्रवर्तते इति न्यायात् प्रयोजनस्याप्यतः संभवेत तदुज्जृंभणस्यासंगतेरिति किं न वहंतीति काक्वा अपि तु हंत्येवेति पर्यवसानेन तदुज्जृंभणं हृद्योतिषतीति पर्यवसानं स्व-

वेधा द्वेधा भ्रमं चक्रे कांतासु कनकेषु च तासु तेष्वप्यनासक्तः साक्षाद्भर्गो नराकृतिः अत्र साक्षादिति विशेषणेन विरक्तस्य प्रसिद्धशिवतादात्म्यमुपादेशेन नराकृति-
रिति दिव्यमूर्तिवैकल्यप्रतिपादनान्न्यूनाभेदरूपकं त्वय्यागते किमिति वेपत एष सिंधुस्त्वं सेतुमंथकृदतः किमसौ बिभेति द्वीपांतरेऽपि न हि तेऽस्ति वशंवदो यस्त्वां राजपुंगव
निषेवत एव लक्ष्मीः अत्र त्वं सेतुमंथकृदिति सेतोरमृतमंथनस्य च कर्त्रा पुरुषोत्तमेन वर्णितीयस्य तादात्म्यमुक्त्वा तथापि त्वदागमने सेतुबंधनाय मंथनाय वेति समुद्रे-
णानभेतव्यं द्वीपांतरगामपि त्वद्वशंवदत्वेन पूर्ववत् द्वीपांतरे जेतव्याभावात् प्राप्तलक्ष्मीकत्वेन मंथनप्रसक्त्यभावाच्चेति पूर्वावस्थानत उत्कर्षविभावनादधिकाभेदरूप-
कं किंपद्मस्य रुचिं न हंति नयनानंदं विधत्ते न किं वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किं वक्त्रेंदौ तव सत्ययं यदपरः शीतांशुरुज्जृंभते दर्पः स्यादमृतेन चेदिह तदप्य-
स्त्येव बिंबाधरे अत्रापरः शीतांशुरित्यनेन वक्त्रेंदोः प्रसिद्धचंद्राद्भेदमाविष्कृत्य प्रसिद्धचंद्रकार्यकारित्वमात्रप्रतिपादनेनोत्कर्षापकर्षयोरदर्शनादनुभयताद्रूप्यरूपकं
अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः अभाललोचनः शंभुर्भगवान् बादरायणः अत्र हरिरपर इति विशेषणात्त्रिष्वपि ताद्रूप्यमात्रविवक्षा विभाविता चतुर्वदनत्वादिवैकल्य-

मग्रिमवाक्ययोरपि झषो मकरः केतनं चिह्नं यस्य तथाभूतस्य मदनस्य कामस्य चंद्रालोकनमात्रेणालोकः प्रकाशः स्फुटं न्यात्रेणामृते दर्पोऽभिमानः उज्जृंभणहेतुः स्याच्चेत् अनुक्रमेण तेषु
तः इह वक्त्रेंदौ बिंबाधरे तदप्यस्त्येवेति समुचितपदाध्याहारेण योजनीयं पद्मद्वेष्योऽत्र स्वाकूणगततेन तच्छशोरूप कमत्वक्षतदनुपादानेऽपि न्यूनपदत्वदोषः कार्यकारित्वमात्रे ता-
त्पर्येणाभेदव्याहतिः अस्याप्युरवेंदुनेत्यत्र किमिंदुनेति तद्गतरूपादानमात्रं भेदविवक्षाज्ञापकं इह त्वपरशब्दस्यास्युपादानमिति विशेषः अचतुर्वदन इति बादरायणो व्यासः भाललोचन-
यस्येति व्यधिकरणत्वेऽपि गमकत्वाद्बहुव्रीहिः ननु हरावपर इति विशेषणात्तदंशे एव ताद्रूप्यरूपकं स्यात् इतरांशे त्वभेदरूपकमेवेत्याशंक्याह अत्रेति त्रिष्वपीति एककर्तृ-
कारोपरूपायां रूपकमालायामेव रूप्यायत्तात्पर्यग्राहकस्यैकत्र स्थितस्यापि तात्पर्यमन्येषु चितमिति भावः अयमेव च साधीत्यादि पूर्वोदाहरणाद्विशेषः ६ ॥

इतिरो४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ १४ न्यूनरूपकस्य च मत्कारित्वं पूर्वमुक्तं तद्गुणसंमत्या इष्टयति इदमिति यदाहेत्यनंतरं अङ्गरतिशेषः एकगुणहानौ अभिहितायामिति शेषः गुणसाम्यदार्ढ्ये शे
षगुणप्रयुक्तसाम्यायोगव्यवच्छेदः चतुर्वदनत्वाद्येकगुणव्यतिरेकस्य प्रमाणांतरसिद्धस्य पुनर्वचनं शेषगुणाभावपरिसंख्यार्थं पर्यवस्यतीति भावः
अत्र च रूपकभेदत्वेनैव चमत्कारोपपत्तौ नालंकारांतरत्वं न्यूनत्ववाचिसयुक्तं सामग्रीकालीनकार्याभावस्य तुल्यलंकारांतरत्वं भिन्नस्य तद्धरूमाणां युक्तमि
त्यस्वरसोमतमित्यनेन सूचितः किमस्तु जितिरिति जडेति मूर्ख जलम् प्रसाधारणं चंद्रसंबोधनं अपितैर्जडैरस्तुभिर्निमित्तभूतैर्भीमसुतायादमयंत्याम
डलयो रलयोश्चैवेति साम्यं

इदं विशेषोक्तयुदाहरणमिति वामनमतं यदाह एकगुणहानौ अन्यगुणसाम्यदार्ढ्यं विशेषोक्तिरिति किमस्तुभिर्गलपितैर्जडैरमन्य ॥
सैमपि निमज्जतु भीमसुतामनः मम किल श्रुतिमाह तदर्थिकां नलमुखेंदुपरां विबुधः स्मरः अत्र दमयंतीकृतचंद्रोपालंभे प्रति ७
इचंद्रेण निर्याणकालिकमनःप्रवेशश्रुतितात्पर्यविषयः किं तु नलमुखचंद्र एवेति ततोऽस्याधिक्यप्रतिपादनादधिकतारूप रूपकं

नःमपि निमज्जतु निलीयतामिति मत्वा मे किमिति सोपहासकाकुः तेन मैवं भूयादित्यर्थः अत्र हेतुमाह किलेति निश्चितं मम विबुधः पंडितः स्मरः तदर्थिकां
मैः प्राणनिर्गमकालीनमनःप्रवेशः अर्थो यस्यास्तां श्रुतिं नलमुखेंदुपरां मनःप्रवेशाधिकरणत्वेन नलमुखचंद्रतात्पर्यवतीमाहेति अयं कलंकितइत्युदा राम॰
हरणे दोषशून्यत्वप्रयुक्तं शशाङ्कमाधिक्यं इह तु गुणविशेषप्रयुक्तं गम्यमानं तदिति विशेषः ७ ॥ ॥ ॥ ॥ १४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सावयवत्वनिरवयवत्वादीति आदिना समस्तवस्तुविषयत्वादिरूपैतत्प्रभेदानां परंपरितत्वरूपभेदांतरस्य च परिग्रहः तथाहि सावयवं निरवयवं परंपरितं चेति त्रिवि- त्रि१
धं रूपकं तत्र सावयवं क्रमेण द्विविधं समस्तवस्तुविषयं एकदेशविवर्ति च। केवलं मालाच। श्लिष्टवाचकं अश्लिष्टवाचकं चेति श्लिष्टभेदयोः केवलमालारूपत्वाभ्यां
त्यच त्रिविधमित्यष्टौ भेदाः तत्र ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थीन्यंतर्धानव्यसनरसिका रात्रिकापालिकीयं द्वीपाद्द्वीपं भ्रमति दधती चंद्रमुद्राक-
पाले न्यस्तं सिद्धांजनपरिमलं लांछनस्य च्छलेनेति पद्ये रात्रौ कापालिकीत्वारोपस्य प्रधानतया तदवयवेषु अवयवरूपाणि ज्योत्स्नाभस्मेत्यादि रूपकाणीति साव-
यवत्वं समस्तस्य वस्तुनः आरोप्यमाणस्य शब्दविषयत्वं च द्रष्टव्यं प्रौढमौक्तिकरुचः पयोमुचां बिंदवः कुटजपुष्पवैधवः विद्युतां नभसि नाट्यमंडले कुर्वते स्म कु-
सुमांजलिश्रियमित्यत्र प्रधानस्य नभसि नाट्यमंडलत्वारोपस्यावयवभूतं विद्युतां नर्तकीत्वरूपणमार्थं न शाब्दमित्येकदेशे विशेषेण शाब्दतया वर्तनादेकदेश-

रूपकस्य सावयवत्वनिरवयवत्वादिभेदप्रपंच
नं चित्रमीमांसायां द्रष्टव्यं ८॥ ॥ ८॥

विवर्तित्वं कुरंगीवांगानि स्तिमितयति गीतध्वनिषु यत्सखीं कांतोदंतं श्रुतमपि पुनः प्रश्नयति यत् अनिद्रं यच्चांतः स्वपिति तदहो वेद्म्यभिनवां प्रवृत्तोऽस्याः से-
क्तुं हृदि मनसिजः प्रेमलतिकामित्यत्र प्रेमलतिकामिति मालारूपं निरवयवं सौंदर्यस्य तरंगिणी तरुणिमोत्कर्षस्य हर्षोद्गमः कांतेः कार्मणकर्म नर्म रहसा-
मुल्लासनावासभूः विद्यावक्रगिरां विधेरनवधिप्रावीण्यसाक्षात्क्रिया बाणाः पंचशिलीमुखस्य ललनाचूडामणिः सा प्रियेत्यत्र च मालारूपं निरवयवं बोध्यं अ-
वंश्यलौकिकमहालोकप्रकाशितजगत्त्रयः स्तूयते देव सद्वंशमुक्तारत्नं न कैर्भवानित्यत्र वेणुकुलयोः श्लिष्टेन वंशपदेन कुले वेणुत्वारोपपूर्वकः एवं राज्ञि मु-
क्तारत्नत्वारोप इति श्लिष्टवाचकं केवलं परंपरितरूपकं विद्वन्मासेत्यादावेतदेव मालारूपं चतुर्दशलोकवल्लिकंद इत्यत्राश्लिष्टवाचकं केवलपरंपरितं पर्यंको
राजलक्ष्म्या इत्यादावालानं जयकुंजरस्येत्यादौ चाश्लिष्टवाचकं मालापरंपरितं च द्रष्टव्यं विस्तरभयान्नेह प्रपंच्यते ८॥ ॥इत्यलंकारचंद्रिकायां रूपकप्रकरणं॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰ने॰ परिणामंलक्षयति परिणामइति विषयिनिष्ठायाः प्रकृतकार्योपयोगितायाअवच्छेदिकाविषयात्मतापरिणतिःपरिणामःसाचविषयतादात्म्याध्यवसायविषय
१५ ता एवंचविषयाभेदस्यैवविषयिणिविवक्षणात्तद्गाभिन्नतात्वेनेतिस्वारसिकएववोधःनतुरूपकवद्भिन्नभेदप्रतियोगिनाभेदेनत्वनुयोगित्वमुखइतिरूपका
द्भेदोवोध्यः असमासेप्युदाहरति तीर्त्वेति मुरारिनाटकगतमेतत्पद्यं आत्मनातृतीयःसीतालक्ष्मणसहितइतियावत् असौप्रक्रान्तोरामःभूतेशस्यसंभोग्यो

परिणामःक्रियार्थश्चेद्विषयीविषयात्मना प्रसन्नेनदृग्जेनवीक्षतेमदिरेक्षणा १० यत्रारोप्यमाणोविषयीकिंचित्कार्योपयोगित्वेननिव
ध्यमानःस्वतस्तस्यतदुपयोगित्वासंभवात्प्रकृतात्मतापत्तिमपेक्षतेतत्रपरिणामालंकारः तत्रोदाहरणं प्रसन्नेनेति अत्रहिअब्जस्यवी
क्षणोपयोगित्वंनिवध्यतेनतुदृशःमयूरव्यंसकादिसमासेनोत्तरपदार्थप्राधान्यात् नचोपमितसमासाश्रयणेनदृगब्जमिवेतिपूर्वपदार्थ
प्राधान्यमस्त्विति वाच्यं प्रसन्नेनेतिसामान्यधर्मप्रयोगात्उपमितंव्याघ्रादिभिःसामान्याप्रयोगइतितदप्रयोगएवोपमितसमासानुशास
नात् अब्जस्यवीक्षणोपयोगित्वंनस्वात्मनासंभवतीत्यतस्तस्यप्रकृतदृगात्मतापरिणत्यपेक्षणात्परिणामालंकारः यथावा तीर्त्वाभूते
शमौलिस्रजममरधुनीमात्मनासौतृतीयस्तस्मैसौमित्रिमैत्रीमयमुपकृतवानातरंनाविकाय व्यामग्राह्यस्तनीभिःशवरयुवतिभिःकौतु
कोदंचदंगंकृच्छ्रादन्वीयमानःक्षणमचलमथोचित्रकूटंप्रतस्थे अत्रारोप्यमाणस्यातरःसौमित्रिमैत्रीरूपतापत्यागुहोपकारलक्षणका
र्योपयोगीनस्वात्मना गुहस्यरघुनाथैकपक्षत्वादपेक्षितत्वेतत्वेतत्नार्थित्वाभावादितिपरिणामः ११ ॥

लिमालारूपाममरनदींगंगांतीर्त्वातस्मैनाविकायगुहसंज्ञायनिषादस्यतस्मैसौमित्रेर्लक्ष्मणस्यमैत्रीरूपमातरंतरणमूल्यमुपकृतवान्उपकाररूपतयादत्तवा
न् अथोऽनंतरंचित्रकूटंप्रतिप्रतस्थेप्रस्थितवान्कीदृशःव्यामेनतिर्यक्प्रसारितभुजद्वयांतरालेनग्राह्यौतावत्परिणाहौस्तनौयासांतथाभूताभिःशवरा
णांव्याधानांयुवतिभिःकौतुकेनोदंचतिविकसंत्यङ्गानिचक्रियायांतथाकृच्छ्रात्क्लेशात्अतएवक्षणमन्वीयमानोऽनुगम्यमानइत्यर्थः ११ ॥इतिपरिणाम राम॰ १५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथोल्लेखालंकारं लक्षयति बहुभिरिति एकस्य बहुधोल्लेखादित्यन्वयः उल्लेखनं विषयीकरणमुल्लेखः हेतौ पंचमी तथा चैवंविधोल्लेखाद्धेतोरुल्लेख इष्यते उल्लेख इति व्यवह्रियते इत्यर्थः व्यवहारं इति लक्षणस्य प्रयोजनकत्वात् स्त्रीभिरिति स्वर्द्रुः स्वर्गसंबंधी द्रुमः कल्पतरुः कालो यमः स प्रकृतो राजा · श्लोकं व्याचष्टे · यत्रेति नानाविधेति सौंदर्यदातृत्वशूरत्वादिरूपेत्यर्थः तत्तद्धर्मेति रुच्यर्थित्वभयादिरूपेत्यर्थः एतच्च स्वरूपकथनं न तु लक्षणान्तर्गतं अन्वयाभ्यां गृहीतृभेदनिमित्तद्वयवैशिष्ट्यकारद्वयेनोल्लेखेऽव्याप्तिरित्याह अनेकेत्यादि तथा च लक्षणे बहुपदमनेकपरमिति भावः एवं च गृहीतृविषयाद्यन्यतमानेकत्वप्रयुक्तमेकस्योल्लिख्यमानानेकप्रकारत्वमुल्लेख इति लक्षणं बोध्यं सौंदर्यस्य तरंगिणीत्यादिमालारूपकवारणाय आद्यं विशेषणं तत्र गृहीतृभेदप्रयुक्तं नानेकप्रकारत्वमिति नातिव्याप्तिः बहुमारणोल्लेखप्रभेदसाधारणाय अन्यतमत्वप्रवेशः तद्विवेचनं तद्व्याख्यानावसरे करिष्यामः अन्यतमानेकत्वप्रयुक्तं एकस्योल्लिख्यमानत्वमित्येतावदुक्तौ विद्यावि

बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः ॥ यत्र नाना
विधधर्मयोगरूपनिमित्तभेदादनेकैर्गृहीत्रानेकधोल्लिख्यते सोऽयमुल्लेखः १॥ ॥

क्रमसौंदर्यतपस्यां निधिमागतं पश्यंति विबुधाः शूराः स्त्रियो हंसास्य कौतुकादित्यत्रातिव्याप्तिरतोऽनेकप्रकारत्वमित्युक्तं न चोल्लिख्यमानप्रकारत्वमित्येवास्तु
॥ उक्तोदाहरणे प्रकारस्य कस्याप्यनुल्लेखाद् देवानतिप्रसंगादिति वाच्यं एवमपि नृत्यत्कहाजिराजिप्रखरखुरपुटप्रोद्भूतैर्धूलिजालैरालोकालोकभूमीधरम
त्वजनि निरालोकभावं प्रयाते विश्रान्तिं कामयन्ते रजनिरिति धिया भूतले सर्वलोकाः काकाः कूजन्ति शोकानलविकलतया किंचनेदं त्वलूका इत्यत्र धूलिजालस्ये
कस्य वाजिनोऽनेकैर्लोककाकोलूकैर्गृहीतृभिरेकेनैव रजनीत्वेन प्रकारेणोल्लेखनादतिव्याप्तिवारणाय प्रकारेऽनेकत्वोपादानस्यावश्यकत्वात् सिंहानेर्भज
रीतिस्तनकलशयुगं चुंबितं चंचरीकैस्त्रासोद्भ्रान्तलीलाः किसलयमनसा पाणयः कीरदष्टाः तद्धोपाधानवत्त्वः पिकनिनदधिया ताडिताः काकलोकैरित्य
चोलेंद्रसिंह त्वदरिमृगदृशां नाप्यरण्ये शरण्यमित्यनेकगतधर्मानिपरंपरायामतिप्रसंगवारणार्थमेकस्येत्युक्तमिति संक्षेपः १ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु॰नं॰ यथार्हमिति स्त्रीभिः कामत्वोल्लेखेनास्यां रुचिरनुरागः प्रयोजकः अर्थिभिः कल्पतरुत्वोल्लेखेनैषां लिप्साप्रयोजिका शत्रुभिर्यमत्वोल्लेखेनैषां भयं प्रयोजक
१६ मित्येवं यथायोग्यमित्यर्थः उदाहरणांतरमाहुः यथा वेति श्रीकृष्णस्य मथुराप्रवेशवर्णनं शौरिः श्रीकृष्णः वृद्धाभिर्गजत्रातेति दृष्ट इत्याद्यन्वयः सकौतुकं सो

अनेकधोल्लेखनेरुच्यर्थित्वभयादि यथार्हप्रयोजकं रुचिरभिरतिः अर्थित्वं लिप्सा भयं भीतिः स्त्रीभिरित्याद्युदाहरणं अत्र एकस्य
वराज्ञासौ दर्प्यवितरणपराक्रमशालीति स्त्रीभिरर्थिभिः प्रत्यर्थिभिश्च रुच्यर्थित्वभयैः कामकल्पतरुकालरूपो दृष्टः यथा वा ग
जत्रातेति वृद्धाभिः श्रीकांत इति यौवतैः यथास्थितश्च बालाभिर्दृष्टः शौरिः सकौतुकं अत्र यत्तथाभीतं गजेत्वरया त्रायते स्म सोऽय
मादिवृद्धेषाममुमिति वृद्धाभिः संसारभीत्या तदभयार्थिनीभिः कृष्णोऽयं मथुरापुरं प्रविशन् दृष्टः यस्तथा चंचलत्वेन प्रसिद्धायाः श्रियो
पिकामोपचारवैदग्ध्येन नित्यं वल्लभः सोऽयं दिव्ययुवेति युवतिसमूहैः सौत्कंठ्यैर्दृष्टः बालाभिस्तु बाल्यगतरूपवेषालंकारमात्रलाल
साभिर्यथावस्थितवेष भुक्तो दृष्ट इति वक्रोल्लेखः पूर्वं कामत्वाद्यारोपरूपकसंकीर्णः अयं तु शुद्ध इति भेदः एकेन बहुधोल्ले
खेऽप्यसौ विषयभेदतः गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने ११ ॥ ॥

त्कंठमिति दर्शनक्रियाविशेषणं सर्वत्र संबध्यते श्लोकं व्याचष्टे य इति तथा महायाहृयहरणेन युवतिसमूहैः तरुणीसमूहैः पूर्वमिति उदाहृत इति शे राम॰
षः उल्लेख इत्यनुषज्यते आरोपरूपकसंकीर्ण इति पाठे आरोपस्य रूपं यद्रूपकं तत्संकीर्ण इत्यर्थः आरोपरूपरूपकेति पाठस्तु स्पष्टार्थ एव उल्लेखप्रभेदांतरे १६

म॰ टी॰ पक्तिरी १ ॥॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्याचष्टे ग्रहीत्रिति विषयभेदादित्यनंतरमेकस्येतिशेषः विषयपदमाश्रयसंबंधिनोरुपलक्षणं अतएव लक्षणे ग्रहीतृविषयादीत्यादिपदेन तत्संग्रहः
कृतः तत्र विषयसप्तमीनिर्दिष्टो विषयइत्युच्यते अधिकरणसप्तमीनिर्दिष्टआश्रयः षष्ठ्यादिनिर्दिष्टः संबंधीतिविवेकः गुरुरित्यस्यार्थकथनं महानिति
गुरुर्महति वाच्यवदिति विश्वकोशात् पटुरितितु तत्पर्यवसितार्थकथनं पटुर्दक्षः इत्यादीत्यादिना कीर्त्तिविषये ऽर्जुनो धवलइतिवत्पार्थइत्यर्थांतरस्य
धनुर्विषये भीष्मो भीषणः इतिवत् गांगेय इत्यर्थांतरस्य च संग्रहः भीष्मस्तु भीषणो रुद्रे गांगेये च निशाचर इति विश्वः क्रोडीकरणात् एकवृंतगतफलद्वय
न्यायेन संग्रहणात् अलशमिति कपालिनो हरस्य भागधेयं भाग्यं तत्त्वेनाध्यवसितं पार्वतीस्वरूपं चित्ते आविरस्तु प्रकटी भवत्विति संबंधः किंभूतं कुचयोः

ग्रहीतृभेदाभावेपि विषयभेदाद्द्विधोल्लेखनादसावुल्लेखः उदाहरणं श्लेषसंकीर्णं वचो विषये महान्
पटुरित्यादिवत् हृहेतिरित्याद्यर्थांतरस्यापि क्रोडीकरणात् अन्यो यथा अलशं कुचयोः कलावलग्ने वि
पुलं च कटिविस्तृतं नितंबे ऽधरे ऽरुणमाविरस्तु चित्ते करुणाशालिकपालिभागधेयं ३॥ ॥

कुचविषये ऽलशं स्थूलं एवमग्रेपि विलग्नोमध्यः विलग्नोमध्यलग्नयोरिति विश्वः विपुलं आयतं अधरे ऽधरोष्ठे अरुणमारक्तं अरुणाधरमितिपाठ
स्तु प्रक्रमभंगादयुक्तः चित्ते इति करुणाशालीत्यत्रापि मध्यमणिन्यायेन संबध्यते एवं तुषाराक्तापसत्राणे नामसेषु च तापिनः हरितास्ताः ऽकाश
मै भूपास्तु मम भूतये इत्यादावधिकरणानेकत्वप्रयुक्तः यमः पतिर्महीभृतां कृतवहोसि त्वं श्रीवृतां सतां खलु युधिष्ठिरो धनपतिर्धनाकांक्षिणां गृहेश
राणमिद्धता कुलिशकोटिभिर्निर्मितं त्वमेक इह भूतले व ऊर्विधो विधात्रा कृत इत्यादौ संबंधिभेदप्रयुक्तोऽप्युल्लेखो द्रष्टव्य इति दिक् ३॥ ॥इत्यलंकार
चंद्रिकायामुल्लेखप्रकरणं॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ अथज्ञानविशेषान्यसाम्यात्स्मृत्यादीनलंकारांल्लक्षयति स्यादिति स्मृतिभ्रांतिसंदेहैर्यद्वहन्नेव्यतया हेतुभूतैस्तदंकं तेषामंकस्तदंकः तदंकोऽविद्य
१७ तेऽस्मिन्निति तथाभूतं मत्वर्थीयाच्प्रत्ययात् अंकं चिह्नं संज्ञेति यावत् तेन तत्संज्ञासंज्ञितमित्यर्थः अलंकृतित्रयं व्यवहारविषयः स्यादिति योजना: ए
वं च स्मृतित्वभ्रांतित्वसंदेहत्वानि त्रीणि लक्षणानि तत्र स्मृतित्वं तावत्स्मरामीत्यनुभवसाक्षिको जातिविशेषः भ्रांतित्वं विशेष्याहृतत्प्रकारकज्ञानत्वं सं
देहत्वं तु निश्चयभिन्नत्वे सति संभावनाभिन्नज्ञानत्वं पारिभाषिकं स्मृतिभ्रांत्यादिवारणाय सत्यंतं उत्प्रेक्षावारणाय संभावनाभिन्नेति चमत्कारित्वं तु न

॥स्यात्स्मृतिभ्रांतिसंदेहैस्तदंकालंकृतित्रयं पंकजं पश्यतः कांतामुखं मे गाहते मनः १३ अयं प्रमत्त
मधुपस्त्वन्मुखं वेत्ति पंकजं। पंकजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः १४ स्मृतिभ्रांतिसंदेहैः सादृश्य
निबध्यमानैः स्मृतिमान् भ्रांतिमान् ससंदेह इति स्मृत्यादिपदांकितमलंकारत्रयं भवति तत्क्रमेणोदाहृतं १

रखिलालंकारसाधारणं लक्षणं त्रयेऽपि निवेशनीयं तेन स घट इति स्मरामि इदं रजतमिति भ्रांतावयं स्थाणुः पुरुषो वेति संशये च नातिप्रसंग इति ध्येयं गाह
ते आकलयति स्मरतीति यावत् सादृश्यान्निबध्यमानैरिति चमत्कारित्वोपलक्षकं न त्वेतस्यापि स्मृत्यादित्रयलक्षणे प्रवेशः सादृश्यामूलकानामपि स्मृ
त्यादीनां चमत्कारित्वेऽलंकारतायाश्च निवार्यत्वात् चमत्कारित्वैकजीवितत्वात्तस्याः अचमत्कारित्वे तु तेनैव वारणमिति व्यर्थं सादृश्यहेतुकत्ववि राम॰
शेषणं न चैतदेवोपादीयतां न तु चमत्कारित्वविशेषणमिति वाच्यं उदाहृतेषु सादृश्यमूलकस्मृत्यादिषु तत्प्रसंगवारणार्थं तस्यावश्यकत्वादिति १७

जीयात्तु जीवनौषधमित्यभिधानात् २

१७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिव्यानामिति माघे जलक्रीडावर्णने इत्यत्र पद्यमिदं। शौरिः श्रीकृष्णः अम्भस्तः जलात् उत्तरन्तीं निर्गच्छन्तीं श्रियमिव स्त्रीसदृशीं कांचित् पुरस्तादग्रे उद्वीक्ष्य जलनिधिमंथनस्य अस्मार्षीत् अस्मरत् अधीगर्थेति कर्मणि षष्ठी किंभूतां दिवि भवा दिव्यास्तेषां देवानामपि स्मेरं दर्शनीयां अतिशयेन कृता स्पृहा यया तथा स्फुरतारविन्देन कमलेन चारुः रमणीयः हस्तो यस्यास्तथाभूतां तथा च एवंविधनायिकासदृशलक्ष्मीस्मरणात् तत्संबंधिजलनिधिमंथनस्मरणमिति भावः अत्र श्रिय

यथा वा दिव्यानामपि कृतविस्मयां पुरस्तादम्भसः स्फुरदरविंदचारुहस्तां उद्वीक्ष्य श्रियमिव कांचिदुत्तरन्तीमस्मार्षीज्जलनिधिमंथनस्य शौरिः पूर्वत्र स्मृतिम् उदाहरणे सदृशस्यैव स्मृतिः अत्र सदृशलक्ष्मीस्मृतिपूर्वकं तत्संबंधिनो जलनिधिमंथनस्यापि स्मृतिरिति भेदः पलाशकुसुमभ्रान्त्या शुकतुण्डे पतत्यलिः सोऽपि जंबूफलभ्रान्त्या तमलिं धर्तुमिच्छति अत्रान्योन्यविषयभ्रान्तिनिबंधनः पूर्वस्माद्विशेषः जीवनग्रहणे नम्राः गृहीत्वा पुनरुन्नताः किं कनिष्ठाः किमु ज्येष्ठा घटीयंत्रस्य दुर्जनाः पूर्वेणास्य तु संदेहः प्रसिद्धकोटिकः अयं त्वप्रसिद्धकोटिक इति भेदः १॥ ॥

मिवेत्युपमायाः स्मृत्यंगत्वात्तयोरंगांगित्वलक्षणः संकरः पलाशेति वक्रिमलोहितरूपसादृश्यात् भ्रान्तिः अलिर्भ्रमरः सोऽपि शुकोऽपि भ्रान्तिनिबंधन इति भ्रान्तिप्रयुक्त इत्यर्थः जीवनेति जीवनं जलं प्राणसंयोगश्च अथवा जीव्यतेऽनेनेति जीवनं धनं नम्रा अधोमुखाः विनीताश्च उन्नताः ऊर्ध्वमुखाः उद्धताश्च घटीयंत्रं एककरज्जुसंबद्धघटमालारूपं अरघट्ट इति प्रसिद्धं अप्रसिद्धेति घटीयंत्रसंबंधिनो ज्येष्ठकनिष्ठयोः कोट्योरप्रसिद्धेरिति भावः॥ ॥
॥ ॥ इत्यलंकारचंद्रिकायां स्मृतिभ्रान्तिसंदेहप्रकरणम् १॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰ल॰ अथापह्नुतिः तत्र तावदभेदप्रतिपत्तिनिरूपितांगांगित्वमन्यतरवाक्निषिद्धोऽपह्नुति रित्यपह्नुतिसामान्यलक्षणं निषेधश्च नञादिस्वैवा-
१८ च्यः क्वचित्तु तद्भावात् कैतवादिपदैः परमतत्वोपन्यासादिभिश्च व्यंग्यः तथा क्वचिदभेदप्रतिपत्तिसमानाधिकरणः क्वचित्तु तद्व्यधिकरण इति वि-
वेकः एवमभेदः क्वचिदारोप्यमाणः क्वचित्तु स्वाभाविक एव तत्प्रतिपत्तिरपि क्वचित् व्यंजनया शाब्दशक्त्या च्व्यादिरूपेति बोध्यं निषेधोऽपह्नुति-
रित्येतावदुक्तौ न ह्युतमेतत्कितवक्रीडनं निशितैः शरैरिति प्रसिद्धनिषेधानुवादरूपे प्रतिषेधालंकारेतिव्याप्तिरतोऽभेदप्रतिपत्तिनिरूपितेत्यादिवि-
शेषणानुपात्तं तत्रेहि सुहृत्प्रकृतं कितवं प्रतिस्पृहेद्यूततत्त्वाभावो निर्जातोऽपि कीर्त्यमानोऽद्यूत एव तत्र वर्णाऽलम्ब्यं न तु सुहृद्भिरत्र पहासार्थो न तु सुहृदाभेद-
प्रत्ययांगं तस्मात्तदुपन्यासं विनापि सिद्धत्वात् नाप्यंगीभूतः निर्ज्ञातत्वेन तदुपन्यासानपेक्षणादिति तद्वारणं अभेदप्रतिपत्तिनिरूपितांगित्वमा-
त्रोक्तौ तु स्वाह्नापह्नुतिहेत्वपह्नुतिपर्यस्तापह्नुतिकैतवापह्नुतिष्वव्याप्तिः तत्र सर्वत्र नायं सुधांशुरित्यादेर्निषेधस्य व्योमगंगासरोरुहाद्यभेदप्र-
तिपत्त्यर्थत्वेन तदंगत्वेऽपि तदंगित्वाभावात् अभेदप्रतिपत्तिनिरूपितांगत्वमात्रोक्तौ च भ्रांतापह्नुतिछेकापह्नुत्योरव्याप्तिः तयोर्भ्रान्तिशंकानिवा-
रणरूपनिषेधस्य प्राधान्येनाभेदप्रतिपत्त्यंगत्वाभावादतस्तदन्यतरवत्वनिवेशः तदाहुः साम्यादपह्नवो यत्र सा विज्ञेयाऽत्यपह्नुतिः अपह्नववा-
यस्मादर्श्यंयास्मिन्नेषाप्यपह्नुतिरिति सर्वं चैतन्नकृदुदाहरणव्याख्यानावसरे व्यक्तीभविष्यतीति नप्रपंचितं॥ ॥ ॥ राम॰ १८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं सामान्यलक्षणं मनसि निधाय शुद्धापह्नुत्यादींस्तद्भेदानुक्तुमुपक्रमते शुद्धापह्नुतिरिति लक्षणं व्याचष्टे वर्ण्यतीय इति कविमतेर्विकासः स्फूर्तिशालिता तथा चोपमेये उपमानारोपफलक उपमेयधर्मत्वाभिमतो निषेधः शुद्धापह्नुतिरिति लक्षणमिति भावः स्वत्र चानुक्तनिमित्तत्वं केन वादिपदाव्यंग्यत्वं च निषेधविशेषणं बोध्यं तेन हेत्वपह्नुतौ कैतवापह्नुतौ च नातिप्रसंगः कांतः किं न हि नूपुर इति छेकापह्नुतौ तूपमेयधर्मस्य कां

शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः नायं सुधांशुः किं तर्हि व्योमगंगासरोरुहं ४७ वर्ण्यतीये
वस्तुनि तत्सदृशधर्मारोपफलकस्तदीयधर्मनिह्नवः कविमतिविकासोल्लेखितधर्मी तस्यापि वा नि
ह्नवः शुद्धापह्नुतिः यथा चंद्रे द्युनदीपुंडरीकत्वारोपफलकस्तदीयधर्मस्य चंद्रत्वस्यापह्नवः १॥ ॥

तत्त्वस्य निषेधस्तत्त्वादितिप्रसंगवारणायाद्यं विशेषणं तत्र हि न कांतत्वनिषेधो नूपुरारोपार्थोऽपि तु नूपुरारोप एव शंकितकांतत्वनिषेधार्थ इति तद्व्यावृत्तिः पर्यस्तापह्नुतिवारणायोपमेयधर्मेत्युक्तं तत्रोपमानधर्मस्यैव सुधांशुत्वादेर्निषेध इति नातिव्याप्तिरिति सर्वं सुस्थं ॥ पुंडरीकेति पुंडरीकं सिताम्भोजमित्यमरः एवं च सरोरुहपदं विशेषपरमिति भावः १॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु॰ ने॰ १९ अंकमिति इंदौ दलितस्य स्फुटितस्येंद्रनीलमणेः शकलवत् श्यामं यत् दरीदृश्यते तत् केऽपि कवयः अंकं कलंकं शशं शंकिरे शंकितवंतः परे अन्ये जलनिधेः पंकं मेनिरे कतिचित् पुनः सारंगं संजगदिरे परस्परमुक्तवंतः कर्तरि कर्मव्यतिहारे इत्यात्मनेपदं परे इतरे भुवः भूमेश्छाया भूच्छाया ताम् ऐच्छन् विभाषा सेनासुराछायेत्यादिना क्लीवत्वं वयं तु सांद्रं घनं निशि रात्रौ पीतं अत एव कुक्षिस्थमंधतमसं गाढध्वांतं आचक्ष्महे ब्रूमहे इत्यन्वयः औत्प्रेक्षिकाः उत्प्रेक्षामात्रविषयाः कलंकादयः अपि नास्वाभाविकस्य भूच्छायत्वस्य समुच्चयः अर्थसिद्ध इति नायं शुद्धापह्नुतिरित्यत्रेति शाब्दोपात्तत्वाच्छाब्दः

यथा वा अंकं केऽपि शशंकिरे जलनिधेः पंकं परे मेनिरे सारंगं कतिचिच्च संजगदिरे भूच्छायमैच्छन्परे इंदौ यद्दलितेंद्रनी-
लशकलश्यामं दरीदृश्यते तत्सांद्रं निशि पीतमंधतमसं कुक्षिस्थमाचक्ष्महे अत्रोत्प्रेक्षितधर्माणामपह्नवः परपक्ष- अप्प२
त्वोपन्यासादर्थसिद्धः स एव युक्तिपूर्वश्चेद्दुच्यते हेत्वपह्नुतिः नेंदुस्तीव्रोष्मनिःशपर्कः सिंधोरौर्वोऽयमुत्थितः २६
अत्र चंद्र एव तीव्रत्वे निशिकत्वयुक्तिभ्यां चंद्रत्वस्यापह्नवो वडवानलत्वारोपार्थः १ ॥ ॥

इह तु परमतत्वोत्कीर्तनेन स्वानभिमतत्वसूचनादर्थगम्य इत्यर्थः एकत्रानेकापह्नवरूप तयाप्यत्र वैचित्र्यं गेयं हेत्वपह्नुतिमाह स एवेति शुद्धा
पह्नव एवेत्यर्थः युक्तिपूर्व इति योज्यते साध्यमनेनेति युक्ति हेतुः तत्पूर्वस्तत्सहित इत्यर्थः तथा च शुद्धापह्नवलक्षण एव उक्तनिमित्त इत्यस
स्यां तेऽनुक्तनिमित्तस्तु क्वौ हेत्वपह्नुतिलक्षणं संपद्यत इति भावः नेंदुरित्यादि विरहाकुलोक्तिः तीव्रोष्मा उष्णोऽतः अतो नेंदुः निशि रात्रौ सत्वाश्चा राम॰
र्कः और्वस्तु वडवानल इत्यमरः नैशत्वेति निशि भवो नैशस्तत्त्वमित्यर्थः अत्रापि चंद्रत्वं स्वाभाविको धर्मः सूर्यत्वं त्वौत्प्रेक्षिकमिति बोध्यं २ ॥ ॥ १९

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मंथानेति मंथानो मंथनदंडः स चासौ भूमिधरः पर्वतो मंदरस्तस्य मूलभागो यत्तच्छिलासहस्रं तेन संघट्टनाद्यो व्रणास्तस्य किणाश्चिह्नानि इंदुमध्ये स्फुर
न्ति प्रकाशन्ते छायाभूमेः मृगो हरिणः शशकः शशः इत्येषा अतिपामराणां मूर्खतमानामुक्तिः हि यस्मात्तेषां छायादीनां तत्रेंदुमध्यभागे
कथंचिदपि केनापि प्रकारेण प्रसक्तिर्नास्तीत्यन्वयः वैशारव मंथमंथाने मंथानो मंथदंडके त्वमरः नास्तीति इति हेतोरित्यर्थः पर्यस्तापह्नुतिमाह
अन्यत्रेति सः अपह्नवः तथा च तदारोपार्थस्तस्यापह्नव इति लक्षणं निषेधस्य च तस्याधिकरणे प्रतियोग्यारोपार्थत्वसंभवो न वा स्याधिकरणे त्वा

यथा वा मंथानभूमिधरमूलशिलासहस्रसंघट्टनव्रणकिणाः स्फुरंतीन्दुमध्ये छायामृगः शशक इत्यतिपामरोक्तिस्तेषां कथंचिदपि तत्र
हि न प्रसक्तिः अत्रेंदुमध्ये मंथनकालिकमंदरशिलासंघट्टनव्रणकिणास्तेषां छायादीनां संभवो नास्तीति छायात्वाद्यपह्नवः पामर
वचनत्वोपन्यासेनाविष्कृतः अन्यत्र तस्यारोपार्थः पर्यस्तापह्नुतिस्तु सः नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखं १७ यत्र क्वा
चिद्वस्तुनि तद्धर्मनिह्नवः अन्यत्र वर्ण्यमानीयवस्तुनि तस्य धर्मस्यारोपार्थः पर्यस्तापह्नुतिः यथा चंद्रे चंद्रत्वनिषेधः वर्ण्यमानीयेव
स्तुनि प्रेयसीमुखे तदारोपार्थः ३॥॥

रोप इत्यर्थः सिद्धमेवारोपस्यान्याधिकरणत्वमन्यत्रेत्यनेनोक्तं अत एव पर्यस्तापह्नुतिरित्युच्यते पर्यस्तादारोपविपरीतादारोपव्यधिकरणे नि
तदर्थात् न च चंद्रे चंद्रत्वनिषेधस्य कथं मुखे तदारोपार्थत्वमिति वाच्यं आरोपदार्ढ्यसंपादकत्वेन निषेधस्य तदर्थतायाः अनुभवसिद्धत्वात् अत एव
हृदारोपरूपकमेवेदं नापह्नुतिरिति प्राचां सिद्धांतस्तदनुसारेणैव च चित्रमीमांसायां प्रकृतस्य निषेधेन पदन्यत्वप्रकल्पनमित्यपह्नुतिलक्षणमु
क्तं इह त्वलंकाररत्नाकराद्यनुसारेणायं प्रभेद उपदर्शितः सामान्यलक्षणाभिप्रायेणापह्नुतित्वेनोक्त इति निरवद्यं ३॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ १० हालाहलमिति हालाहलो विषं नैव भवति किं तु रमा लक्ष्मीर्विषं जनाः परं केवलमत्रास्मिन् विषये व्यत्ययं विपरीतत्वं मन्वते अभ्युपगच्छन्ति। कुतस्तत्राह यस्मात् शिव
स्तं हालाहलं निपीय पीतत्वेन जागर्ति हरिरिमां रमां संस्पृश्य संस्पृश्य निद्रया मुह्यति स्मरन्निति पाठे स्मरन्नपि मुह्यति किमु स्पृशन्नित्यर्थः तथा च रमाया विष
रूपत्वे मोहजनकत्वं हेतुः हालाहलस्य तत्तापकत्वे च जागरस्तु तत्प्रयोजकत्वमिति बोध्यं हालाहलो विषे इति विश्वः अत्र स्पृशन् मुह्यतीति कार्यका
रणयोः पौर्वापर्यविपर्ययरूपातिशयोक्तिरलंकारः सा हेतूक्तिः तत्स्थेति हेतूक्तितदनुक्तिरूप भेदादित्यर्थः स्ववपह्नुतिवत् द्वैविध्यं शुद्धपर्यस्ता
पह्नुतिः हेतुपर्यस्तापह्नुतिरित्येवं द्विप्रकारत्वं भ्रान्तापह्नुतिरिति अन्यस्य अप्रकृतस्य भ्रान्तिवारणे वार्यतेऽनेनेति वारणं तथा च भ्रान्तिवारके तत्त्वा

यथा वा हालाहलो नैव विषं विषं रमा जनाः परं व्यत्ययमत्र मन्वते निपीय जागर्ति सुखेन तं शिवः स्पृशन्निमां मुह्यति निद्रया हरिः पूर्वोदाहर
णे हेतूक्तिर्नास्त्यत्रास्तीति भेदः ततश्च शुद्धापह्नुतिवदत्रापि द्वैविध्यमिति द्रष्टव्यं भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिवारणे तापं करोति
सोत्कम्पं ज्वरः किं न सखि स्मरः १८ अत्र तापं करोतीति स्मरकृतां तेकथिते तस्य ज्वरसाधारण्यात् ज्वरबुध्या सख्या ज्वरः किमिति पृष्टे न सखि स्म
र इति तत्त्वोक्त्या भ्रान्तिवारणं कृतं यथा वा नागरिक समभिक्षि कोऽन्तरिह महिषः कोऽयं पुनर्यतः पुच्छः न हि न हि करिकलभोऽयं शुण्डादण्डो
ऽयमस्य न तु पुच्छः इदं सभङ्गश्लेषिकायां भ्रान्तापह्नुतावुदाहरणं ४॥॥

ख्याने सतीत्यर्थः भ्रान्तं भ्रमः भावे क्तः भ्रान्त्यपह्नुतिरित्यर्थः एवं च तत्त्वकथनहेतुकभ्रान्तिविषयनिषेधो भ्रान्तापह्नुतिरिति लक्षणं बोध्यं तस्य तापकारित्वरूपस्मर
ज्ञानं तस्य नागरिकेति नगरे भवो नागरिकस्तत्संबुद्धिः ग्रामीणस्य प्रश्नः समभिक्षिकापश्चात्तरेभ्यः उन्नतिरस्य तायस्यैवं भूतः तत्र भयतः मुखपृष्ठभागयोः पुच्छं यस्य
वं भूतस्य कोऽयं महिष इति नहि नहीत्युत्तरं महिष इत्यस्तु सञ्ज्ञाते अयं करिकलभः करिशावकः कलभः करिशावक इति कोशः कलभस्येतावते वसिहे क
रिपदस्य तु ... करिणो धार्थ्य अयमस्य शुण्डादण्डो न तु पुच्छमिति पुच्छ इति पाठो ... दित्वात् तत्त्वापुरेव अप्रयुक्तत्वं तु तत्र परं विचार्यमिति पूर्वोदाहरणे स राम०
देहरूपभ्रान्तिविषयज्वरज्ञापकत्वेः ज्वरः किमिति प्रश्नेन तद्विषयसंदेहावगमात् इह तु महिषत्वनिश्चयरूपभ्रान्तिविषयस्य महिषत्वस्येति ततो भेदः ४॥ ॥ २१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जटेति विरहिणो पान्थस्योक्तिः हे कुसुमशर पुरारातेर्हरस्य भ्रान्त्या मां किं कुतः प्रहरसि पीडयसि यतो नेयं जटा किंतु वेणी लतोऽत्र वेणी वेणीसंपद्यते तया कृतः
कचानां कलापः तथा गले गरलं नैतत् अपितु इयं कस्तूरी एवं शिरसि नेषा शशिलेखा किंतु कुसुमं तथा इयं अंगे भूतिर्भस्म न भवति परं तु प्रियविरहजन्
न्मयस्यैवं भूतो धवलिमा पाण्डिमेति अत्र सर्वत्र जटादीनां निषेधकरणेन जटाद्युत्तरपद इति नामतस्तुल्याद्यधिकरणोऽपि वक्रोक्तिर्लिङ्गः कल्पितेति कुसुमश
रेणोत्प्रेक्षितेत्यर्थः निषेधमात्रेणोन्नेयेति निषेधस्य प्रसक्तिपूर्वकत्वादिति भावः मैनेत्यस्य स्वरसोऽप्येवं तदा जन्मोपमाबोधकस्यैवादेशमते पितउपगमे रूप कस्या
पुपमात्वं स्यादिति स्पष्टमेव छेकापह्नुतिरिति छेको विदग्धस्तत्कृताऽपह्नुतिः छेकापह्नुतिरिति लक्ष्यनिर्देशः वाक्यार्थयोजनहेतुकः शंकितेति

कल्पितभ्रान्तिपूर्वा यथा जटा नेयं वेणीकृतकचकलापो न गरलं गले कस्तूरीयं शिरसि शशिलेखा न कुसुमं इयं भूतिर्नाङ्गे प्रियविरहजन्मा धव
लिमा पुरारातिभ्रान्त्या कुसुमशर किं मां व्यथयसि अत्र कल्पितभ्रान्तिर्जटा नेयमित्यादिनिषेधमात्रेणोन्नेया पूर्ववत्तस्या भावात् ईदृशी त्वन्यत्र व्याख्या
नोपमेत्युपमाभेदं मेने यदाह न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे इति विस्पष्टसादृश्यपरत्वात् व्यातोपमामतेति छेकापह्नुतिरन्यस्य शंकाते
स्तथ्यनिह्नवे प्रजल्पन्मत्पदे लग्नः कान्तः किं न हि नूपुरः १९ कस्यचित्कंचित्प्रतिरहस्योक्तावन्येन श्रुतायामुक्तेरन्यथा तिरस्कारेण तस्य निह्नवेन छे
कापह्नुतिः यथा नामिकया नर्मसखीं प्रति प्रजल्पन्मत्पदे लग्न इति स्वनायकवृत्तान्ते निवेद्यमाने तदाकर्ण्य कान्तः किमिति शंकितवतीमन्यां प्रति नहि

कः वक्तृनिषेध इति लक्षणं अन्यस्य शंकातः इत्यन्यशंकायाश्च निवर्तनीयत्वेन हेतुतया व्यपदेशः संतापयन्तस्त्वाती इतिवत् अत्र च मुग्धापह्नुतिवारणाय यावविशेषणं अ
मत्किलक्षतिमाहृत तद्दर्थिकाभिलाषिकृतापह्नुतिरूपकवारणाय शंकितेति नन्वत्रापि मुग्धापह्नुतिवारणाद्वाक्यत्वादिदमर्थमिति वाच्यं कस्यचन भवेद्दोषः प्रियायाः
सव्रणोऽधरे सभृंगं पद्ममाघ्रासीर्वारिताऽपि मयाधुनेति व्याजोक्ताविति प्रसंगवारकत्वेन तत्सार्थक्यात् यद्वक्ष्यति छेकापह्नुतेरस्याश्चायं विशेषोऽपह्नुतस्यावचनस्यान्यथा
नयने नापह्नवः असामान्यास्य हेतवेऽतर्वर्णनेन गोपनमिति तथ्यनिह्नव इति तात्त्विकनिषेध इत्यर्थः नूपुरे मंजीरः मंजीरोऽनूपुरोऽस्त्रियामित्यमरः नर्मसखी क्री
डासखी अत्र कान्तपरायाः प्रजल्पन्मत्पदे लग्न इत्युक्ते नूपुरतात्पर्यकत्वकथनेन कान्तत्वापह्नवो मुख्यः नूपुराभेदप्रतिपत्तिप्रतिपत्त्यन्तरं गमितिबोध्यं ५ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰ तं॰ २१ सीत्कारमिति सीत्कारं तदनुकारिमुखध्वनिं शिक्षयति न्यधरं अधरो चुंबनादिना व्रणयति व्रणोस्यास्तीति व्रणी व्रणिनं करोतीत्यर्थे तत्करोतीति णिच् तथा रोमांचं
जनोति विस्तारयतीति वा क्वचिद्वयं नागरिकाभिप्रायेण प्रियसखीं प्रति कया पृष्टं तदाकर्ण्य नागरिकः किमुमिलित इति शं किं तवतीमन्यां प्रति तत्पृष्टं कान्तिष्टत्वयेन
हीत्यादिना हे मंतिरुपवन परत्ववर्णनेन तात्विकस्य नागरिकस्यापह्नवः सीत्कारशिक्षादिकर्तृत्वस्य नागरिकवत्पवनेपि सत्वात् तदाह अर्थयोजनयेति विव
क्षिता विवक्षितसाधारणस्यार्थस्याविवक्षितार्थसंबंधित्ववर्णनयेत्यर्थः इदमित्युदाहरणमिति च जात्यभिप्रायेणैकवचनं हे मंत शठ हाल्लेनम वइत्यर्थे सुवज्ञाणत
लोपश्चेत्यशि जलोपे च हे मन इति रूपसिद्धिः प्रजल्पनित्युदाहरणे एकस्य वाक्यस्यान्यथा योजनमिह त्वनेकेषामिति भेदः शब्दयोजनयेति अर्थभेदे विशब्द
श्लेषमात्रेणेत्यर्थः पद्येइति क्रीडायाविटो भोक्ता कुरुमो वो युष्मान्पातुरक्षत्विति संबंधः कीदृशः इत्युत्तमवचः स्वप्ने उन्नतमुत्तमं प्रवचनमर्थात् कुसुमस्य अनु

यथा वा सीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमांचम् नागरिकः किमु मिलितो नहि नहि सखि हैमनः पवनः इदमर्थयोजनया तथ्यानिह्नवे
उदाहरणं शब्दयोजनया यथा पद्ये त्वन्नयने स्मरामि सततं भावो भवत्कुंतले नीले मुह्यति किं करोमि महितैः क्रीतोस्मि ते विभ्रमैः इत्युत्लपन्
वचो निशम्य सरुषा निर्भर्त्सितो राधया कृष्णस्तत्पर एव तद्य्यपदिशन्क्रीडाविटः पातु वः सर्वमिदं विषयांतरयोजनेनोदाहरणं ६ ॥ ॥

भाव्य अनुधरायया निर्भर्त्सितः सन् तत् वचनं तत्पर एव राधापर एव व्यपदिशन् कथयन् इति किं हे पद्ये रमेत्वन्नयने सततं स्मरामि नीले भवत्याः कुंतले केश
पाशे मम भावोंतःकरणवृत्तिरूपः मुह्यति मोहं प्राप्नोति ननु चिन्तासंयोगो निवर्त्यतां तत्राह किंकरोमि अकिंचित्करोस्मि यतस्त्वम हितैः प्रशस्तैर्विभ्रमैर्विला
सैः क्रीतोस्मि मूल्येन गृहीतोस्मीति किं करोमीति क्वचित्पाठो युक्ततरः तत्रानर्थास्मीत्यहमर्थकमव्ययं अहं किंकरो दासः क्रीतोस्मीत्यर्थः राधापरत्वेतु हे
राधे इत्यर्थात्संबोधनं पद्मरूपेत्वन्नयने स्मरामीति विशेषः शेषं पूर्ववत् अत्र रमा संबोधक त्वन्नयनस्मरणरूपेण वाक्यार्थोऽपि नत्वत्संबोधकःपद्मरूपत्व
न्नयनस्मरणरूपइत्यापह्नवस्तत्पर एव तद्व्यपदिशन्नित्यनेन प्रकाश्यते· नचात्रार्थस्य रमाराधासाधारणत्वमपितु पद्ये इति लिंगवचनश्लिष्टशब्दयोज राम॰ २१
नेवेति विषयांतरेति विवक्षितविषयाभिन्नेत्यर्थः ६ ॥ ॥

२१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अवस्था जाग्रत्स्वप्नादिरूपा वदंतीति पत्यौ भर्तरि सखीधिया सखीभ्रमेण जारवृत्तांतं तत्त्वकामुकवार्तां वदंती धूर्ता काचित्पतिं बुध्वा सखीत्यादिना कश्चिच्छेष
मप्यपूरयत् पूरितवती सखीति पुनः संकोचनमपत्रपैतामसूचनाय ततः उक्तवृत्तांतानंतरं प्रबुद्धा जागरणवती अत्र नायं जाग्रदवस्था वृत्तांतः किं
न्तु स्वाप्निक इत्यवस्थाभेदयोजनया योऽपह्नवः सखीत्यादिनाकाशेषेण प्रकाश्यते कैतवापह्नुतिरिति लक्षणनिर्देशः व्याजाद्यैः पदैर्निह्नुतेर्व्यक्तौ अभि
व्यक्तौ सत्यां कैतवापह्नुतिरिति व्यवहर्तव्यमित्यर्थः कैतवेनापह्नुतिरिति व्युत्पत्तेः व्याजादेरित्यनेन मिषकपटछद्मकैतवादयो गृह्यंते एवं चकैत
वादिपदवत्त्वस्यापह्नुतित्वलक्षणां बोध्यं नाराचाः शराः दृक्पाताः कटाक्षाः अपह्नवः निषेधः प्रतीयत इति अत्रासत्यत्वस्य विषयबाधाधीनत्वा

विषयैक्येऽप्यवस्थाभेदेन यथा वदंती जारवृत्तांतं पत्यौ धूर्ता सखीधिया पतिं बुद्ध्वा सखि ततः प्रबुद्धास्मीत्यपूरयत् कैतवापह्नुतिर्व्यक्तौ
ति ६ व्याजाद्यैर्निह्नुतेः पदैः निर्यांति स्मरनाराचाः कांतादृक्पातकैतवात् ३० अत्रासत्यत्वाभिधायिना कैतवपदेन नेमे कांताकटाक्षाः
किंतु स्मरनाराचा इत्यपह्नवः प्रतीयते यथा वा रिक्तेषु वारिकथयापि विपिनोदरेषु मध्याह्नजृंभितमहातपतापतप्ताः स्कंधांतरोत्थि
तदवाग्निशिखाछलेन जिह्वां प्रसार्य तरवो जलमर्थयंते ७ ॥ ॥

विपिनोदरेष्विति ग्रीष्मवर्णनं तरवो वृक्षाः वारिणो जलस्य कथया वार्तयापि रिक्तेषु शून्येषु विपिनस्यारण्यस्योदरेषु मध्यप्रदेशेषु जलमर्थयंते
प्रार्थयंते कीदृशाः मध्याह्ने जृंभितः प्रवृद्धो यो महानातपस्तेन यस्तापस्तापनं तेन तप्ताः संतप्ताः किं कृत्वा स्कंधांतरात् प्रकांडाभ्यंतरात् उत्थितो
यो दवाग्निर्दावानलस्तस्य याः शिखाः ज्वालास्तासां छलेन जिह्वां प्रसार्येति अस्त्री प्रकांडः स्कंधः स्यान्मूलाच्छाखावधिस्तरोरित्यमरः अत्र नेयं द
वाग्निशिखा अपितु जिह्वेति छलपदादपह्नवः प्रतीयते अत्रचानभिहितवाच्यत्वदोषनिरासाय कथयापि विपिनोदरेष्विति पठनीयं॥ ॥इत्यपह्नुतिप्रकरणं ७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तमः॰ भ्रमा निलिंपतीव॰ जनः॰ अंजनं वर्षतीव ५

कु॰ सं॰ ११ उत्प्रेक्षालंकरोति संभावनेति अत्रोत्प्रेक्षेत्युपलक्षणं संसारस्यावयवत्वेनाहार्यं तथा च संभावना उत्प्रेक्षापदवाच्या स्यात् सा च वस्तुहेतुफलरूपेण त्रिधेत्यर्थः व स्तुहेतुफलानां च संभावनाधर्मित्वं स्वविधेयकत्वसंबंधेन तेन वस्तुहेतुफलविधेयकत्वेनेति पर्यवसितार्थः वस्तुत्वं च हेतुत्वेन फलत्वेन वा विवक्षि तो यन्न द्विन्नत्वं नातो वस्तुत्वस्य केवलान्वयितया विभागासंगतिः उक्तेत्यादि अत्र आसा सु उत्प्रेक्षाणां मध्ये आद्या वस्तूत्प्रेक्षा उक्तं वानुक्तं वोक्तानुक्तं आस्पदं विषयो यस्या इति विग्रहः आस्पदं चोत्प्रेक्षाया धर्मिरूपो विषयः सिद्धासिद्धेत्यत्र विग्रहः पूर्ववत् भ्रमेति तमः कोकीविरहशुष्मणां भ्रमस्तोमं पं केष्वित्यन्वयः कोकस्य चक्रवाकस्य स्त्री कोकी तस्या विरहरूपाणां शुष्मणां अग्नीनां संबंधिनं धूमसमूहमित्यर्थः लिंपतीवेति अत्र तम इति भइति

संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना उक्तानुक्तास्पदा याद्या सिद्धासिद्धास्पदे परे ३१ भ्रमस्तोमं तमः शंके कोकीविरह शुष्मणां लिंपतीव तमोंगानि वर्षतीवांजनं नभः ३१ रक्तं नवांघ्रियुगलं भुवि विक्षेपणात् प्रभवस्तु तत्सुखाभेच्छया नूनं पद्मै वैरायते शशी ३२ मध्यः किं कुचयोर्धृत्यै वद्धः कनकदामभिः प्रायो ऽत्पत्स्य देने कं प्राप्तुं तोये तपस्यति ३४ ॥ ॥

चकर्तृपदं रक्तावित्यादि दर्शितं प्रतिनायकस्य कोक्तिः तेन स्वेदुलौल्यक मायावं घ्रीचरणौ भुवि विक्षेपणाद्धेतोः रक्तवर्णाविति त्वन्मुखेति पद्म गतायास्त्वन्मुखकांते रिच्छया हेतुनेत्यर्थः वैरायत इति वैरं करोतीत्यर्थे शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे इति क्यङ् मध्य इति मध्यभागः = कुचयोर्धृत्यै धारणार्थं कनकस्य दामभिः रज्जुभिरिति निगीर्याध्यवसानरूपा तिशयोक्त्यावलीभिः वद्धः किमित्यर्थः प्राय इति अत्र कर्तृशायः ५ रामः ११ वक्षोधातत्वचरणोत्तमहे कं प्राप्तुं तोये जले तपस्यति तपश्चरतीत्यर्थः कर्मणो रोमंथतपोभ्यां वर्तिचरोरिति क्यङ् ॥ तपसः परस्मैपदं चेति॰ परस्मैप

२ रक्तौ तवांघ्री मृदुलौ वितिपाठः ८ त्वन्मुखाभेच्छया ४

उपमानपदेन वपमेयस्य पत्रं निगीर्याध्यवसानमिति ३

शशी॰ पद्मैर्वैरायते नूनं त्वं के इति प्रयुक्त ३

कर्तृ तापसः परस्मैपदं नवति १

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लङ्कारांपरिष्कुरुते अन्यधर्मेति अन्यस्य विषयिणो यो धर्मस्तत्संबन्धरूपेण निमित्तेनान्यस्यान्यविषयकस्यान्यस्य विषयिणः तादात्म्येन संभावनमित्यर्थः अन्यस्येति षष्ठ्यर्थो विषयता धर्मितारूपाः विषयिणइति षष्ठ्यर्थस्तु विशेषणतारूपा विषयता अन्यत्वेनोत्कीर्तितं च संभावनाया आहार्यतासूचनाय तथा च विषयिनिष्ठधर्मसंबन्धप्रयुक्तं विषयधर्मिकं तादात्म्यसंसर्गेण विषयिविधेयकमाहार्यसंभावनमुत्प्रेक्षेति पर्यवसितं तन्निष्ठधर्मसंबन्धप्रयुक्तमाहार्यं तत्तद्भावनमितितु निष्कर्षः इतरांशस्य व्यावर्तकतया स्वरूपकथनमात्रपरत्वात् मुखं चन्द्रमन्य इत्युत्प्रेक्षायां चन्द्रनिष्ठाह्लादकत्वादिधर्मसंबन्धप्रयुक्तं मुखे चन्द्रसंभावनमाहार्यमस्तीति लक्षणसमन्वयः बाधाप्रभावदशायां तु जायमाना मुखादौ चन्द्रादिसंभावना नोत्प्रेक्षेति तदाहार्येति एतेन विरक्तसंध्यापकषं पुरस्तादतो रजः पार्थिवमुज्जिहीते शंके हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्य इत्यत्र रजो भग्नोद्गमनरूपससैन्यपरत्वं ज्ञातधर्मसंबन्धप्रयुक्तायां भरतेनत्संभा

अन्यधर्मसंबन्धनिमित्तेनान्यस्यान्यतादात्म्यसंभावनमुत्प्रेक्षा ॥
सा वस्तुहेतुफलात्मतागोचरत्वेन त्रिविधा १ ॥ ॥

वनायामपि नातिव्याप्तिः तस्या अनाहार्यत्वात् संभावनं मदीत्थं स्यादित्यूहो न्यस्य सिद्धय इति वक्ष्यमाणसंभावनालंकारविषये यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्तवेत्यादावतिव्याप्तिवारणाय प्रयुक्तांतं सर्वातिशायि सौंदर्यं शंके सप्तवतो मुखं येन सा मृगशावाक्षी साविजितरत्नीकृते त्यादावतिव्याप्तिवारणाय तन्निष्ठेति संभाव्यमानवृत्तित्वधर्मविशेषणं तत्र साविजितरत्नीकारकत्वरूपो धर्मो मुखवृत्तिर्न तु संभाव्यमानवृत्तिरिति नातिप्रसंग इति दिक् वस्तुहेतुफलात्मता वस्तुहेतुफलतादात्म्यं न तु संबन्धांतरेणोत्प्रेक्षाया असंग्रहइति चेन्न सर्वत्राभेदेनैवोत्प्रेक्षणमिति प्राचीनमतानुसारिणोत्थमभिधानात् ॥ एतल्लक्षणाद्यैवलक्षणोऽत्र वस्तादात्म्योपादानमिति १ ॥ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

तमोरूपवस्तुनो धूमात्मकत्वस्वं तत्तादात्म्यसंभावना॰ प्रकृते॰ फ्रपमालंकओत्प्रेक्षा४

ननु लंकारसर्वस्वकारादिभिः स्वरूपोत्प्रेक्षेति यव्यवहृता या फलोत्प्रेक्षा यायाश्च पिसत्वात्त्रिविधेत्युक्तमित्याशंकाह अत्रेति अत्रासांमध्ये याप्रथमा वस्तूत्प्रेक्षा सैव वस्तु

कु.न॰ १२ रूपोत्प्रेक्षेत्युच्यते इत्यर्थः विसृत्वरस्येति प्रसरणशीलस्येत्यर्थः तमस इति संभावनेत्यनेनान्वेति षष्ठ्यर्थो विषयता तमो विषयेत्यर्थः प्रतिरोधकत्वादीना

दिपदात् प्रसरणशीलत्वस्य संग्रहः श्रियैः पतिभिर्विघटिता वियुक्ताः व्यापनस्येति षष्ठ्यंतस्य पूर्ववदुत्प्रेक्षापदेनान्वयः एवमग्रेतनस्यतमइत्यस्यापि अनुपा

अत्र वस्तुनः कस्यचिद्धर्मस्यांतरतादात्म्यसंभावनाश्रयमास्वरूपोत्प्रेक्षेत्युच्यते अहेतो हेतुभावेनाफलस्य फलत्वेनोत्प्रेक्षा हेतूत्प्रेक्षा फलोत्प्रेक्षेति सु ६१

च्यते अत्राद्यास्वरूपोत्प्रेक्षा उक्तविषयानुक्तविषया चेति द्विविधा परे हेतुफलोत्प्रेक्षे सिद्धविषयासिद्धविषया चेति प्रत्येकं द्विविधे एवं षण्मां तु

त्प्रेक्षाणां क्रमस्तामेत्यादिना क्रमेणोदाहरणानि रजनीमुखे सर्वत्र विसृत्वरस्य तमसो नेत्ल्य दृष्टिप्रतिरोधकत्वादिधर्मसंबंधेन गम्यमानेन निमि

त्तेन मद्यः श्रियविघटितसर्वदेशस्थितकोकांगनात्हृदुपगतपज्वलितविरहानलधूमस्तोमतत्तादात्म्यसंभावना स्वरूपोत्प्रेक्षा तमसो विषय

स्योपादानादुक्तविषयातमो व्यापनस्य नभः प्रभृति भूपर्यंतमस कल वस्तु सामलिनी करणेन निमित्तेन तमः कर्तृकलेपनतादात्म्योत्प्रेक्षानुपादानात्त्र अनुक्तविषया।

भः कर्तृकांजनवर्षणतादात्म्योत्प्रेक्षा वानुक्तविषया स्वरूपोत्प्रेक्षा उभयत्रापि विषयभूतस्यतमो व्यापनस्यानुपादानात्त्र अनुक्तविषया

नन्वत्र तमसो व्यापनेन निमित्तेन लेपनकर्तृतादात्म्योत्प्रेक्षा नभसो भूपर्यंतगाढनीलिमव्याप्तत्वेन निमित्तेनांजनवर्षणाकर्तृतादात्म्योत्प्रेक्षा चे

त्युत्प्रेक्षाद्वयमुक्तविषयमेवास्तु मैवम् लिंपतिवर्षतीत्याख्यातयोः कर्तृवाचकत्वेपि भावप्रधानैर्व्याख्या(?)नमिति स्मृते धात्वर्थक्रियायाः प्राधान्येन त
मा॰

दुपसर्जनत्वेनान्वितस्य कर्तुरुत्प्रेक्षणीयतयान्वयासंभवात् ३॥॥

ज्ञानादिति विषयिवाचकाभ्यां लिंपतिवर्षतिभ्यामस्ये तानुपादानादित्यर्थः यथाश्रुतेताभ्यामेव साध्यवसानलक्षणयोपादानादसंगतेः उक्तविषयमेवे राम॰

ति सकृदुच्चरिताभ्यां लिंपतिवर्षतिभ्यां शक्यालेपनवर्षणयोः साध्यवसानलक्षणया च साधारणधर्मभूतस्फारणाव्यापनस्य चोपस्थापनस्य युगपदृत्तिद २३

याः विरोधेनासंभवादित्याशयः स्मृतेः निरुक्तस्मृतेः उत्प्रेक्षणीयतया उत्प्रेक्षाविषयतया अन्यत्र उत्प्रेक्षायां अन्वयासंभवादिति निराकांक्षत्वादिति भावः ३॥

...विषयक...निर्बोधः

तमः कर्तृकसृंगकर्मकलेपनकीर्तनं तमो विषयकसंभावनेति बोधः

तमसः कर्तृत्वेन लेपनक्रियायाः विषयत्वेन तु संभावनायामिति वारद्वयान्वये क्लेशः ५

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अतएव आख्यातार्थस्यकर्तुः क्रियोपसर्जनत्वेनान्यत्रान्वयासंभवादेव क्वचिदतएवेत्युत्तरमयुक्तमेवव्याख्यातग्रंथः प्रमादस्तिरिवितोदृश्यते न्यग्भू
तइति गुणीभूतइत्यर्थः स्वक्रियेति क्रियांप्रतिसाधनत्वेनान्वितइत्यर्थः व्यपेक्षितुं आकांक्षितुं नालं नसमर्थः तथाचनिराकांक्षत्वादुपमानत्वेना

अतएवाख्यातार्थस्यकर्तुः क्रियोपसर्जनत्वेनान्यत्रान्वयासंभवादेवहेतोःनस्योपमायामुपमानतयान्वयोदंडिनानिराकृतः॥
कर्त्रायद्युपमानंस्यात्प्राग्भूतोसौक्रियापदे स्वक्रियासाधनव्यग्रोनालमन्यद्व्यपेक्षितुमिति केचित्तु तमोनभसोर्विषयोस्तल दे३
त्वेकलेपनवर्षणात्मरूपधर्मोत्प्रेक्ष्यताङ्गः तन्मते स्वरूपोत्प्रेक्षायाधर्म्युत्प्रेक्षाधर्मोत्प्रेक्षाचेत्येवंविधंद्वैविध्यं चरणयोःस्वतः
सिद्धेरक्तिमनिवक्तजोविक्षेपणेनहेतुरिति अहेतोस्तस्यहेतुत्वेनसंभावनाहेतूत्प्रेक्षाविक्षेपणस्यविषयस्यसत्वात्सिद्धवि
षया चंद्रपद्मविरोधस्त्वाभाविकेनापिकावदनकांतिपे प्सानहेतुरितितत्रतद्धेतुत्वसंभावनाहेतूत्प्रेक्षावक्त्रतत्कांत
ष्टायाअभावादसिद्धविषया मध्यः स्वयमेवकुचौधरतिनतुकनककदामवपुत्वेनाध्यवसितायावल्लिरुपशालितायावला
दितिमध्यकर्तृककुचधृतेःफलत्वेनोत्प्रेक्षासिद्धविषयाफलोत्प्रेक्षा जलजस्यजले जावस्थितेस्तदेवासनपस्त्वेनाध्य
वसितायाःकामिनीचरणसायुज्यप्राप्तिफलमितितस्यागगनकुसुमप्रमानायास्तपःफलत्वेनोत्प्रेक्षणामसिद्धविषयाफ
लि२

वयोनसंभवतीतिभावः एतेनतमसिलेपनकर्तृत्वमुत्प्रेक्ष्यमित्यलंकारसर्वस्वकारमतमपास्तं तस्यापिकर्तृविशेषणत्वात विवक्षितंविवेकेनलेपनस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संभावनांशविषयतेन-त्वेन तमःकर्तृत्वेन । चेत्तमसो वाक्यद्वयमन्वये क्लेशादत्र च ॥ क्लेश ॥

तेगात्रयां प्रसृत्योत्प्रेक्षेत्युक्तिवत् लिंपतीवतमोंगानि ॥ अत्र तमसः कर्तृत्वेन धर्मेण... लेपनक्रियायां
मन्वयः ॥ तमसः लक्षणया त्वधावति तमो व्यापनमर्थः । तथा सांद्रतमःकर्तृकांगकर्म लेपनं तमव्यापनमिति बोधः ॥

कु.नं. २४ बोधे स्फुटत्वाच्च एवं च प्रधानभूतलेपनक्रियागोचरसंभावनैव निर्गीर्णव्यापनविषयेति सिद्धं नच युगपद्बुद्धिद्वयविरोधः शंक्यः तदनभ्युपगमात्
केचिदितिमतद्इति चास्वरसोद्भावनं नहीत्यत्र तमोनभसोः कर्तृत्वेन विषयत्वेन च वाक्यद्वयमन्वये क्लेशः तथा धर्म्युत्प्रेक्षा सा धर्म्यप्रयुक्ता धर्मोत्प्रे
क्षा तु तत्सहचरितधर्मसंबंधप्रयुक्तेति लक्षणानुगमः नच तत्र विशिष्टतत्समानाधिकरणान्यतरत्वेन धर्मनिवेशान्नाननुगम इति वाच्यं सर्व
त्र तादृशरूपनिमित्ताया एवोत्प्रेक्षायाः संभवेनान्यतरत्वादिनिवेशप्रयुक्तगौरवस्यानुपादेयत्वादिति हेतुत्वेनेति हेतुरूपतयेत्यर्थः हेतुत्व
संभावना हेतुरूपतासंभावना फलत्वेन फलरूपतया एवमग्रेपि बोध्यं अथोदाहृतासूत्प्रेक्षासु बोधप्रकारः प्रदर्श्यते तत्र धूमस्तो
कु.ला.दीतु चंद्र १ मभिःपादौ कोकाङ्गनाविरहानलसंबंधिधूमस्तोमाभिन्नतमोविषयासंभावनेति बोधः नामार्थयोरभेदान्वयात् एवं मुखं चंद्रमन्य इत्या
दावपि त्वन्मुखं चंद्रप्रकारकसंभावनाविषयो मुखमिति बोधः मुखविषया चंद्रप्रकारिका च संभावना तादात्म्यसंसर्गिकैव तथानुभवात्
॥ चमत्कारप्रयोजकस्य संसर्गांतरस्याभावाच्च नचेयं चंद्रत्वप्रकारिका तस्य चंद्रोपसर्जनत्वात् एवं ध्रुवेत्यादिशब्दसमभिव्याहारेपि बो
ध्यं लिंपतीवेत्युक्तविषयोत्प्रेक्षोदाहरणे तु लिंपतिना साध्यवसानलक्षणया लेपनव्यापनोभयसाधारणेन सांद्रमलिनीकारकत्वावि
नारूपेणोपस्थापिते तमोव्यापने लेपनसंभावनान्वयात् सांद्रमलिनीकारकं तमःकर्तृकांगकर्मकलेपनप्रकारकसंभावनाविषय इति
बोध्यं व्यंजनयोपस्थिते व्यापने तादृशसंभावनान्वय इति प्रदीपकृतः एवं वर्षतीत्यादावपि बोध्यं विक्षेपणात् ध्रुवमित्यादिहेतूत्प्रेक्षोदाह
रणे हेतुः पंचम्यर्थः तत्र चाभेदेन प्रकृत्यर्थान्वयः हेतोश्च स्वप्रयोज्यान्वयत्वसंबंधेन रक्तत्वविशिष्टे तत्प्रकारितासंबंधेन संभावनायां तस्याश्च
विषयतया चरणयोरन्वयः तथा च भूम्यधिकरणकविक्षेपणाभिन्नहेतुकरक्तप्रकारकसंभावनाविषयावंघ्री इति बोधः नच तादात्म्यसं
बंधेन हेतुविधेयकत्वाभावान्नेयं हेतूत्प्रेक्षा स्यात् किंतु तादात्म्येन तथाविधरक्तस्वरूपोत्प्रेक्षैवेति वाच्यं विवक्षितविवेकेन विक्षेपणो हेतु रामा० २४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

स्वनिरूपितविक्षेपणनिष्ठसंबन्धेन विक्षेपणान्वये स्वभिन्नप्रकारान्वितमित्युपचारात्सस्यो... हेतुरपि

प्रकारान्तरमाह २

पारस्य १

धी २

भेदस्योत्प्रेक्षणीयतया विक्षेपणं प्रतिविशेष्यभूतस्यापि हेतोर्विधेयत्वोपगमात् मुखं चन्द्र इत्यादिरूपकइवानुयोगित्वमुखस्याभेदस्य विक्षेपणा
संसर्गित्वाभ्युपगमेन च विक्षेपणो हेत्वभेदमानसंभवात् हेतुविशिष्टस्वरूपोत्प्रेक्षायामुखतः प्रतीतावपि विवक्षावशेन हेतूत्प्रेक्षात्वेनैव व्यपदे
शः यथा दण्डी कुण्डलीत्यत्र मुखतो दण्डिविशिष्टहोमविधिप्रतीतावपि विवक्षितविवेकेन होमे दण्डिविधित्वव्यपदेश इति बोध्यं न च स्वरूपोत्प्रे
त्वसंबन्धेन स्वरूपोत्प्रेक्षाश्रयत्वसंबन्धेन वा हेतुरूपधर्मोत्प्रेक्षैव रक्तादौ स्वीक्रियतां कृतमीदृशकल्पनाक्लेशेनेति वाच्यं धर्मोत्प्रेक्षांगीकारे इ
ष्टस्य रागे वा वेदितत्वात् अतएव हर्षोत्कर्षमस्ये ललितं तनुते पादयोः पद्मलक्ष्मीरिति हेतूत्प्रेक्षामुदाहृतवन्तः प्रकाशकृतोऽपि तत्र ह
र्षहेतुकलक्षणतादात्म्यसंभावनमेव स्वाभाविकेलगतेऽभिमतं अस्मदुक्तरीत्या तु लक्ष्मीरूपे विषये यथोक्तहर्षहेतुकलक्षणतादात्म्यसं
भावनमुचितं लग्नतत्स्य धर्मस्योपसर्जनत्वेन संभावनायामन्वयायोगादिति ध्येयं एवं तन्मुखाभेदरूपेऽप्यसिद्धविषयहेतूत्प्रेक्षायामपि बोध्यं
॥विषयासिद्धत्वासिद्धत्वाभ्यां बोधे विशेषाभावात् मध्य किमित्युक्ति[illegible]फलोत्प्रेक्षास्थले फलं चतुर्थ्यर्थः तच्चाभेदेन प्रकृतस्यार्थान्वयः
पूर्ववत् फलस्य च प्रयोजकत्वसंसर्गेणावद्धत्वेन तद्वारकेणाते नैवंव हेत्वान्वयस्तन्नादात्म्यसंसर्गक संभावनायामध्यो विषयतया एवं च
कुचधरणाभिन्नफलककनकदामकरणाकवद्धत्वाश्रयसंभावनाविषयो मध्य इति बोध्यः एवं प्रायोत्तमित्यादावपि फलं तद्भिन्नोर्थ इति प्र
र्वविदेव बोध्यः फलोत्प्रेक्षात्वं चोपदर्शितरीत्योपपादनीयमिति वक्रवक्तव्येऽपि विस्तरभयादुपरम्यते ४॥ ॥ म१ ॥

चरणस्य भुजप्राप्तिरूप फलप्रयोजकं दवासतपश्चरणाभ्यायें संभावनाविषयोऽङ्गमिति बोध्यः

कु॰सं॰ बालेंदुवक्राणीति नविद्यते विकासो येषां तान्यविकासानि तेषां भावात् विकासरहितत्वाद्धेतोः बालेंदुवत् द्वितीयाचंद्रवत् वक्राणि तथातिशयेन
१५ लोहितानि अरुणानि पलाशानि पलाशकुसुमानि वसंतेन नायकेन समागमं प्राप्तानां वनस्थलीनां संगत्वा तां सद्यस्तत्कालसंभूतानि नखक्ष-
तानीव बभुः शुशुभिरित्यन्वयः पूर्वैति प्रसमस्तोपमितत्वेत्यर्थः ननु लोके संभावनायामिव शब्दोऽत्र दृष्ट इत्यत आह अस्तीति पिनष्टीति समु-

अनेनैव क्रमेणोदाहरणांतराणि बालेंदुवक्राण्यविकाशभावाद्बभुः पलाशान्यतिलोहितानि सद्योवसंतेन समागतानां नखक्षतानीव वनस्थलीनां अत्र पलाशमुकुलानां वक्रत्वलोहितत्वसंबंधेन निमित्तेन वसंतनायकसमागतवनस्थलीसंबंधिसद्यःकृतनखक्षततादात्म्य संभावनोक्तविषयास्वरूपोत्प्रेक्षा पूर्वोदाहरणे तु भिन्नभूतधर्मसंबंधोऽगम्यः इह तूपात्त इति भेदः नचिवशब्दस्य सादृश्यपरत्वेन प्रसिद्धत्वा दुपमैवास्तु लिंपतीवेत्युदाहरणे लेपनकर्तृत्वरूपमात्रत्वाद्धर्मस्य क्रियोपसर्जनत्ववदिह नखक्षतानामन्योपसर्जनत्वस्योपमावाधकस्या भावात् उच्यते उपमायामत्र क्वचिदवस्थितेरपि नखक्षतैः सह वक्रांशकलनया वसंतनायकसमागतवनस्थलीसंबंधित्वस्य विशेषणस्या नपेक्षितत्वात् इह तु पलाशमुकुलानां नखक्षततादात्म्यसंभावनायामिवशब्दमवस्थापयतीति तथात्वएव तद्विशेषणस्य साफल्या त् अस्तिचसंभावनायामपीवशब्दः दूरे तीक्ष्णे वदन्न इवभातीति पिनष्टीव तरंगाग्रैः समुद्रः फेनचंदनं तदादाय करै रिंदुर्लिंपतीव दि गंगनाः अत्र तरंगाग्रैः फेनचंदनस्य पेषणात्पेषणत्वोत्प्रेक्षाते समुद्रादुत्थितस्य चंद्रस्य प्रथमं समुद्रस्येषत्तत्तानां करणात् दिक्षु व्यापने च समुद्रोपांते फेनचंदनकृतत्वलेपत्वेनोत्प्रेक्षाते उभयत्र क्रमेण समुद्रपांत्वर्गतफेनचंदनपुंजीभवनं दिशां धवलीकरणं च निमित्तमिति फेन चंदनप्रेरणाकिरणव्यापनयोर्विषययोरनुपादानादनुक्तविषयेस्वरूपोत्प्रेक्षे ५ ॥ ॥

इत्तरंगाणामग्रभागैः फेनरूपं चंदनं पिनष्टीव इंदुस्तत्फेनचंदनमादाय करैः किरणैर्दिक्स्वरूपाः अंगनाः लिंपतीव अनुलिंपतीवेत्यर्थः समुद्रोपांतेति। प्र॰म॰
समुद्रस्योपांते तरैयत्फेनचंदनं तत्कृतं यन्नासां दिशां लेपनं तत्त्वेनेत्यर्थः उभयत्र उभयोरुत्प्रेक्षयोः ५ ॥ ॥ ॥ १५

१५

×दिवाप्यचन्द्रोरस्तावाद्धेतोरिव××

येषां त्वलंकारसर्वस्वकारादीनां रात्राविति सप्तक्रांतः प्रभुर्भूपतिर्भूमौ रात्रौ रवेरभावाद्धेतो रविः सततमनिरंतरमुदिते प्रतापयशसी स्तुष्टवान् निर्मितवानित्य
र्थः रेक्षा वितर्कु दाहरणे भावरूपो हेतुरिह त्वभावरूप इति भेदः विवस्वतेति विवस्वता सूर्येण स्वस्य गोसहस्रेण किरणसहस्रेण समं मिश्राः मिश्रिताः जनानां
नेत्रापरनामधेया गावोऽपि स्त्रीनायिषितेव नीता इव यथा गोपालेन परकीयाभिर्गोभिर्मिश्रिताः स्वीया गावो नीयंते तथा गोपदवाच्यत्वसाजात्येन मिश्रिता विवस्वता

येषां तु पात्रयोः समुद्रचंद्रयोरेव तत्कर्तृकपोषणालेपनरूपधर्मोऽस्त्येवेति मतं तेषां मते पूर्वोदाहरणे धर्मिणो धर्म्यंतरतादात्म्योत्प्रेक्षा
इह तु धर्मिणो धर्मसंसर्गोत्प्रेक्षेति भेदोऽवगंतव्यः रात्रौ रवेर्दिवा चंद्रस्याभावादिवसप्रभुः भूमौ प्रतापयशसी स्तुष्टवान्सततोदिते रात्रौ
रवेर्दिवा चंद्रस्याभावः सन्नपि प्रतापयशःसर्गे न हेतुरिति तस्य तद्धेतुत्वसंभावनासिद्धविषया हेतूत्प्रेक्षा यथा विवस्वतानायिषतेव
वे मिश्रास्तु गोसहस्रेण समं जनानां गावोऽपि नेत्रापरनामधेयास्तेनेदमांध्यं खलु नांधकारैः अत्र विवस्वता कृतं स्वकिरणैः सहजन
लोचननयनस देवानां वा आंध्यं प्रतिहेतुत्वेनोत्प्रेक्षितमित्यसिद्धविषया हेतूत्प्रेक्षा ६॥ ॥

नीता इवेत्यर्थः खलु संभावनायां तेन नयनेन हेतुना इदमांध्यं न त्वंधकारैरित्यन्वयः गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान् स्त्रीसौरभेयीदृग्बाणदिग्वा
ग्भूष्वप्सु भूम्नि चेति मेदिनी अत्र चानायिषतेवेति विषयोत्प्रेक्षापूर्वकं तस्य हेतुत्वेनोत्प्रेक्षणमिति पूर्वस्माद्भेदः एवं पूर्वत्र इष्टपेतिगुणरूपो हेतुरिह तु कि
या रूप इत्यपि द्रष्टव्यं अत्र वोत्प्रेक्षाद्वयमत्रेपि हेतूत्प्रेक्षायाः प्राधान्यात्तेनैव व्यपदेशो न तु स्वरूपोत्प्रेक्षात्वेन तस्यास्तद्गतत्वात् एवमन्यत्रापि बोध्यं ९॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु०नं० १६

ष्ठरमिति अयं विधुश्चन्द्रः पयोधेः स्वरं वर्द्धयितुं हरिणाङ्कमणिं चन्द्रकान्तं किं यन्ति लोको नृणां अपरिमितानि पयांसि दोग्धीति शङ्के तया प्रिये पतिमिति विप्रयोगे वियोगे
सति सशोकानां कोकाङ्गनानां नयनेक मश्रूते किं यन्ति पयांसि दोग्धीति शङ्क इत्यन्वयः दुहेर्द्विकर्मकत्वादेणाङ्कमणिमिति द्वितीया एवं नयने इत्यत्रापि मध्य
कमित्यत्रैकस्य चन्द्रस्य फलत्वेन कुचवृष्टेत इत्युत्प्रेक्षणमिह तु द्रावणाख्यावर्णयोर्द्वयोः फलत्वेन पूरवर्द्धनस्यातदिति भेदः हेडनं वर्द्धनं तदावर्द्धनकाले
तेन चन्द्रेण रथस्थितानामिति रविः रथे स्थितानां नियुक्तानां पुरातनानां गाहनानामश्वानां परिवर्तनापेक्षया तुरगोत्तमानां मुत्पत्तिभूमः तुरङ्गमां दि

स्वरं विधुर्वर्द्धयितुं पयोधेः शङ्के यमेणाङ्कमणिं किं यन्ति पयांसि दोग्धि प्रियविप्रयोगे सशोककोकीनयने किं यन्ति अत्र चन्द्रेण कृतं समुद्रस्य ह
र्षणं सदेव तदा तेन कृतं चन्द्रकान्तद्रावणस्य कोकाङ्गनाबाष्पस्रावणस्य च फलत्वेनोत्प्रेक्षितमिति सिद्धविषयाफलोत्प्रेक्षा रथस्थितानां प
रिवर्तनाय पुरातनानामिव वाहनानाम् उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्यां अत्रोत्तरायणस्याश्वपरिवर्तनमस देव फल
स्वत२ त्वेनोत्प्रे[illegible] इत्यसिद्धविषयाफलोत्प्रेक्षा एता एवोत्प्रेक्षाः मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोऽपि
तादृशः इमा उत्प्रेक्षा व्यञ्जकत्वेन परिगणितानां शब्दानां अप्रयोगे गम्योत्प्रेक्षा यथा त्वत्कीर्तिर्भ्रमणश्रान्ता विवेश स्वर्गनिम्नगां ७

शितास्थ इत्यन्वयः प्रायो नमित्यत्रैकास्य गुणस्य फलत्वेनोत्प्रेक्षणमिह तु परिवर्तनक्रियाया इति भेदः ननु लंकारसर्वस्वकारादिभिरन्येषामपि जात्या
दिभेदानामुक्तत्वात् कुतस्तेन प्रदर्शिता इत्याशंक्याह एता एवेति उक्तभेदा एवेत्यर्थः उत्प्रेक्षा इत्यनन्तरं चमत्कारविशेषप्रयोजिका इति शेषः
तथा च जात्यादिभेदानां चमत्कारविशेषानाधायकत्वादप्रदर्शनमिति भावः इमा उत्प्रेक्षेति इत्यनेनोत्प्रेक्षाबोधकत्वेनेत्यर्थः त्वत्कीर्तिरिति अ
त्रानुपात्तस्वर्गगमनविषया स्वर्गङ्गाप्रवेशतादात्म्योत्प्रेक्षा विशेषणीभूतभ्रमणश्रान्तत्वरूपहेतूत्प्रेक्षा वा प्रतीयत इति बोध्यं ॥ ॥ इत्यलंकारचन्द्रिका

अलंकारप्रकाश १॥

राम० १६

२६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अतिशयोक्तिं लक्षयति रूपकातिशयोक्तिरिति ग्रहणं उपस्थाप्यं विषयिरूपतयेति विषयिणो रूपमस्य तस्य भावस्तत्ता तयेत्यर्थः रूपं चाभेदस्ताद्रूप्या न्यतरत् तस्मिन्नस्तीति सप्तमीसमर्थात्तसिरित्यभिप्रायेण एवं चानुपात्तविषयधर्मिकाहार्यनिश्चयविषयीभूतं विषय्यभेदताद्रूप्यान्यतरत्तद्रूपकाति शयोक्तिरिति लक्षणं बोध्यं अत्र रूपकवारणायानुपात्तेति अयमेव च रूपकादस्या विशेषः अतिशय इत्युच्यते भ्रान्तिवारणायाहार्येति उत्प्रेक्षा वारणाय निश्चयेति नीलोत्पलेति अत्र नीलोत्पलपदात्तत्साध्यवसानलक्षणया शक्यलक्ष्योभयानुगतकान्तिविशेषादिपुरस्कारेणोपस्थिते कामि

रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः पश्यनीलोत्पलद्वंद्वान्निःसरंति शिताः शराः ३५ विषयस्य स्वशब्देनोल्लेखनं विनापि विषयिवाचकेनैव शब्देन यद्ग्रहणं विषयनिगिरणं तत्पूर्वकं विषयस्य विषयिरूपतयाऽध्यवसानमाहार्यनिश्चयः तस्मिन्सति रूपकातिशयोक्तिर्यथा नीलोत्पलशरशब्दाभ्यां लोचनयोः कटाक्षाणां च निगिरणपूर्वकं तद्रूपताऽध्यवसानं १॥ ॥

नीनयने शक्त्युपस्थितस्य नीलोत्पलत्वविशिष्टस्याभेदसंसर्गेणान्वयः शक्त्युपस्थितयोः कृतीष्टसाधनतयोरिव शक्तिलक्षणाभ्यामुपस्थितयोरप्येकप दार्थयोस्तात्पर्यवशेनान्वयांगीकारे बाधकाभावात् एवं च नीलोत्पलाभिन्नकान्तिविशेषवत्द्वंद्वादिति बोधात्तस्मिन्नभेदातिशयोक्तिरित्युच्यते नन्वेवं स ति रूपकाद्वैलक्षण्यमिति वाच्यं रूपके विषयिभेदव्याप्यस्य विषयतावच्छेदकस्य भानेन वैलक्षण्यस्य स्फुरत्वात् यदा त्वभेदभानेन तात्पर्यं किंत्वभेद भानेन तदा कान्तिविशेषादिरूपताद्रूप्यस्यैव बोधात्ताद्रूप्यातिशयोक्तिरेवेष्यते इति बोध्यं १॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं० १७ वापीति मध्यभागमारभ्य मुखपर्यंतं नापिकांगवर्णनमिदं गगनेस्वच्छतया तद्वत दुर्लक्ष्ये मध्ये कापि अनिर्वचनीयशोभा वापी तद्वद्गंभीरा नाभिः स्फुरति
शोभते तत्परं तदूर्ध्वभागे ऐंद्रनीली इंद्रनीलघटिता स्वच्छापद्या सरणिस्तद्वत् रूपिमारोमावली स्फुरतीत्युत्प्रेक्ष्यते किंभूता कांचननिर्मितां सोपानपंक्तिं त
त्सदृशीं त्रिवलीमधिगतवती प्राप्तवती तथा अग्रे तदूर्ध्वदेशे शैलोन्नतदंतेंगगिरिशालौ कुचौ स्फुरत इति विभक्तिविपरिणामेन संबध्यते कीदृशौ स्तकृतिनां उगाप
वेतोस्तु गमौ स्तुलभागमनौ सुलभौ च पुनः कीदृशौ चंदनतरुमिश्रं दनपंकेन चाच्छन्नौ व्याप्तौ देशौ पयोस्तया भूतौः तत्रत्यानां तदाश्लिष्टानां वस्तुधीराणां स्तदा
ज्ञाकारकस्य मुखस्य संनिधानाद्दृतेतद्वरास्वाद्यमधरमाधुर्यं सुलभमित्यन्वयः विधात्री भेदानां इति अस्यस्य दर्शन... मित्यनेनान्वयः आजिदेशौ नेतिसादृश्येनेत्य
र्थः मुख्यरूपकाभेदस्यातिशयोक्तावभावाद्रूपकपदं रूपकसदृशपरं तन्मात्समग्निहोत्रं जुहुतीत्यत्र अग्निहोत्रपदवत् ... पातिदेशकमित्याशयः आधिकान्सनतेत्य

यथा वा वापीकापि स्फुरति गगनेतत्परं स्वच्छपद्या सोपानालीमधिगतवती कांचनीमैंद्रनीली अग्रेशैलौ सुकृतिसुगमौ चंदनच्छन्नदेशौ तत्रत्या
नां सुलभममृतं संनिधानात्सुधांशोः अत्र चाप्यादिशब्दैर्नाभिप्रभृतयो निगीर्णाः अत्रातिशयोक्तौ रूपकाविशेषणं रूपकदर्शितानां विधाना
मिहापि संभवोस्तीत्यतिदेशेन प्रदर्शनार्थं तेनाप्यत्राभेदातिशयोक्तिस्ताद्रूप्यातिशयोक्तिश्चेति द्वैविध्यं तत्राप्याधिक्यस्थलतां विभागश्चेति स
र्वमनुसंधेयं १॥

अत्रानुभयोक्तेरुक्तोदाहरणेषु प्रसिद्धतरत्वादनुपादानं बोध्यं यत्तत्रकैश्चिदुक्तं विषयिवाचकपदस्य विषये साध्यवसानलक्षणायाः शक्यतावच्छेदकमात्रप्रका
रकलक्ष्यविशेष्यकबोधजनकत्वं कार्यतावच्छेदकं एवं च निगरणं सर्वत्र विषयितावच्छेदकधर्मरूपेणैव विषयस्य भानं न विषयाभिन्नत्वेनेति स्थिते। भेदातिशयो
क्तिस्ताद्रूप्यातिशयोक्तिरिति द्वैविध्यमयुक्तमिति तत्सोढि विलसितं शक्यतावच्छेदकस्य लक्ष्ये प्रवृत्तिनिमित्तत्वे न तद्विशिष्टतया लक्षणाया असंभवात्
। यद्धर्मविशिष्टे शक्यसंबंधग्रहस्तद्धर्मप्रकारकलक्ष्योपस्थितेः समानप्रकारकशाब्दबोधे हेतुत्वात् लक्षणापरिहार्याया अनुपपत्तेस्तदवस्थत्वाच्च ॥ राम० १७
एवमपि तात्पर्यवशात्तादृशबोधांगीकारे तद्दृशो देवशब्दाभेदप्रकारकबोधेपि बाधकाभावान्मात्रपदेन विषयतावच्छेदकस्यैव व्यावर्तनादिति दिक् ३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समावद्धेति विद्रुमशालभंजिकाख्यायां नाटिकायां स्फटिकप्राकारशिखरगतां मृगांकावलीमालोक्य पत्युराज्ञो विदूषकं प्रत्युक्तिरियं प्राकाराग्रसमीपे नयनेपथ्रहिरपुवेश्य मनाक् ईषत्तर्कय स्त्रत्वाकाशेऽनंतरिक्षे कोयं शीतकिरणः स्थं दृश्यते सुरते चंद्रगता आह्लादकारित्वरूपता दूपाध्यवसानं कीदृशः गलितस्त्रुतो हरिणो यस्मात् संभूतः तेन निःकलंकत्वयोत्कर्षाभिव्यक्तिः पुनः कीदृक् स्तुभायां वृद्धः यासस्तदभिलाषायैस्तैरुपवनसंबंधिभिस्त्र कोरैश्चुस्नातां लवल्याः फलपाकस्य प्रापिनी सदृशी स्वच्छा स्वच्छा ज्योत्स्ना तत्वेनाध्यवसितां कांतिप्रभां किरन् प्रसारयन्नित्यर्थः लवली लताविशेषाः हरफारेवडीति भाषाप्रसिद्धः प्राकारो वप्रणः शाल इत्यमरः समावद्धया सेरिति क्वचित्पाठस्तत्राप्युक्त एवार्थः नवलवलीति पाठे नवश्चासौ लवली पाकश्चेत्यन्वयो बोध्यः नन्विहाभेदविवक्षेव किं न स्यादत आह अत्रेति कोयमित्यनेनानिर्ज्ञातत्वप्रकाशनात्त्वसिद्धस्य च निर्ज्ञाततत्वात्ते हैलक्षण्य

यथा समावद्धयासे रूपवचनकोरैरचुस्नुतः किरन् ज्योत्स्नामच्छां नवलवलिपाकप्रणापिनीं उपप्राकारमग्रं प्रहितु नयनेन तर्कय मनाक्
गतनाकाशे कोयं गलितहरिणः शीतकिरणः अत्र कोयं गलितहरिण इत्युक्त्या प्रसिद्धचंद्राद्भेदः तत उत्कर्षश्च गर्भितः एवमन्यत्रापि ऊह्यं २

कु॰

वणानिरितिभावः गर्भितः गलितेत्यादिविशेषणाव्यंग्यत्वेनाभिप्रेतः अन्यत्रापीति अत्रोच्छिष्टो देवैरपरिदलितो राज्ञ दशनैः कलंकेनाश्लिष्टो नख लुपरिभूतो दिनकृता कुङ्कुमितोऽलुप्तो न च युवतिवक्त्रेणाविजितः कलानाथः कोयं वदनलतिकाया मुदयत इत्यदावित्यर्थः अथवान्यत्रापि न्यून तायामपीत्यर्थः कोयं भूमिगतश्चंद्र इत्यादावदिव्यत्वरूपन्यूनताप्रकाशनमूहनीयमिति भावः ननूक्तोदाहरणेष्वयमिति विषयस्योपादानात्त्व य मतिशयोक्तिरितिचेत् अत्राहुः इदंत्वस्य विषयिविशेषणत्वेनाविवक्षायामतिशयोक्तिरेव यदातु विषयविशेषणत्वविवक्षा तदा रूपकमि तिव्यवस्था अत एव प्रकाशकारादयो मे रूपकातिशयोक्त्यादिसंदेहसंकरेणं मनागंदतायीदोर्विवमेतत्प्रसीदतीत्युदाहरन्निति ३ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु॰ नं॰ ५७

ष्टत्वं विभजते यद्यपह्नुतीति अपह्नुतिगर्भत्वं पर्यस्तापह्नुतिगर्भत्वं सैव रूपकातिशयोक्तिरेव तथा च सापह्नवत्वनिरपह्नवत्वभेदेन द्विविधाऽतिशयोक्ति रि
तिभावः मुक्तामिति तानि अत्र भवैकवेद्यानि इमानि वस्तूनि ते इमे जनाः विकल्पयंति सदसद्वेति विकल्पविषयाणि कुर्वंति येषां जनानां साक्षात्कारास्तु
दरीदृक्पथे लोचनमार्गे नायांतीत्यन्वयः तादृशास्तु दरीदर्शनशालिनस्तन्न विकल्पयंतीति भावः तानि कानि वस्तूनि तत्राह मुक्तां मौक्तिकं विद्रुमं प्रवालं
चांतरा अनयोर्मध्ये मधुरसः अंतरांतरा युक्ते इति द्वितीयाः उष्णं परं केवलं दुर्वहं भारवाहकं तन्मधुरसमुक्तं तयोर्मुक्ताविद्रुमयोः खलु निश्चितं प्रालेयद्यु
तिमंडले चंद्रमंडले स्फाटिका एकस्मिन्नासिकाश्रवास्थितिः ऐकाधिकरण्यमित्यर्थः नतर्णवे समुद्रे तच्च चंद्रमंडलं च शारदस्थन्नाद्भिमत्त के उदंचति उ

यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता त्वत्सूक्तिषु सुधा राजन् भ्रांताः पश्यंति तां विधौ ३५ अत्र त्वत्सूक्तिमाधुर्यमेवामृतमित्यतिशयोक्तिः चंद्र
मंडलस्थममृतं न भवतीत्यपह्नुतिगर्भा यथा वा मुक्ताविद्रुममंतरा मधुरसः शुष्कं परं दुर्वहं प्रालेयद्युतिमंडले खलु तयोरेकाधिकारार्णवे तच्चा
वंचति शारदपूर्णिमन पुनः पूर्वाचलाभ्यंतरे तानीमानि विकल्पयंति तइमे येषां तमास्ति कार्थे अत्राधररस एव मधुरस इत्यतिशयोक्तिः शुष्करसो न मधुर
स इत्यपह्नुतिगर्भा अलंकारसर्वस्वकृता सरूपोत्प्रेक्षायां सापह्नवत्वमुक्तं गता रजनीरंतिमिघट्टनेन ससंभ्रमं पौरविलासिनीषु यत्रोल्लसत्फेनत
तिच्छलैर्मुक्ता अट्टहासेव विभाति शिप्रेति तत्र त्रिविधान्नभेदः शुद्धापह्नुतिगर्भत्वं यत्र फेनतातित्वमपह्नुतं तनैवाट्टहासत्वोत्प्रेक्षणात् तत्र पर्यस्तापह्नु
तिगर्भत्वं इंदुमंडलादावपह्नुतस्यामृतादेः सूक्त्यादौ निवेशनात इदं च पर्यस्तापह्नुतिगर्भत्वमुत्प्रेक्षायामपि संभवति ४ ॥॥

दयं चायं प्रोति न पुनः पूर्वाचलसोदमपि(?)रेभ्यंतरे उदंचतीति अत्र मुक्ताविद्रुममधुरसप्रालेयद्युतिमंडलशारदशब्दैः क्रमेण दंताधरतन्माधुर्यमुखकंठानि गीर्णानि पूर्वोदा
हरणेऽतत्वोक्त्या स्पष्टोऽपह्नवः इह तु परं दुर्वहमित्युक्त्या गूढ इति भेदः प्रालेयं मिहिका चेत्यमरः गतास्विति शुभ्रवाः पौरस्त्या स्तु विलासिनीषु इति मीनां मत्स्या
नां संघट्टनेन ससंभ्रमं भयं तीर शिप्रातिगतासु सतीषु यत्र नर्मदाशिप्रानदी उल्लसंतीनां फेनततीनां छलेन मुक्तः फलः अट्टहासः उद्गतदास्यपपात यात्रेव विभा
तीत्यन्वयः इतीति इत्यनेनेत्यर्थः इंदुमंडलादावित्यादिपदात् सुधारसादिपरिग्रहः सूक्त्यादि इति सूक्तिमाधुर्यादि इत्यर्थः आदिना अधरमाधुर्यादिपरिग्रहः निवे

यन्त्र ६

कुवलयानन्दटीका ४ ॥ ५८

राम॰ ५८

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ज्ञाने इति दमयंतीं वर्णयतो नलस्योक्तिः अतिशयितानुरागाल्लौहित्यादिदमधरस्वरूपमेव बिंबमिति ज्ञानेन तु बिंबफलमित्येवकारार्थः बिंबस्य बिंबफल
स्य च्युतोऽस्मादोष्ठादधरत्वं निकृष्टत्वं यद्व्यक्तं स्फुटं कथं तर्हि विपरीता लोकप्रसिद्धिरित्याह द्वयोरनयोर्विशेषे अस्पष्टतारतम्यस्यावबोधेऽसमर्थानां ज
नानां नाम्नि भ्रमो विपर्यासोऽभूदिति अन्यत्रेति स्वर्यकातके नेत्यपरपर्यायः गोनयत इत्यर्थः निवेशितं उत्प्रेक्षितं रवीति रविरूपासंततमोगजः तस्य रवेर्दृ
ष्ट्याऽनुपश्चात् तद्वंश्यं नितियावत् ध्रुवं पद्मयोवाधितुं सरः प्रविशति न तु स्नातुं स्नानार्थं हि यस्मात् गजस्य स्नानं निःफलं निःप्रयोजनमित्यन्वयः प्रसक्तानु

तत्र स्वरूपोत्प्रेक्षायां यथा ज्ञाने त्विरागादिदमेव बिंबं बिंबस्य च व्यक्तमितोऽधरत्वं द्वयोर्विशेषावगमाक्षमाणां नाम्नि भ्रमोऽभूदनयोर्जनानां ॥ अ
त्र प्रसिद्धफले बिंबतामपह्नुत्यातिरागगुणनिमित्तेन दमयंत्यधरे तदुत्प्रेक्षा पर्यस्तापह्नुतिगर्भा हेतूत्प्रेक्षायां तु अभेदः प्राग्लिखिते हेतूत्प्रे
क्षोदाहरणे एव दृश्यते तत्र तोधकारे ध्याध्यहेतुमपह्नुत्यान्यत्र निवेशितं फलोत्प्रेक्षायां यथा रवितमोगतः पश्चात्तेज त्याताधितं ध्रुवं।
सरो विशति न स्नातुं गजस्नानं हि निष्फलं अत्र गजस्य सरःप्रवेशनं प्रतिफले स्नाने फलत्वमपह्नुत्य पद्मबाधने हेतौ निवेशितं अलमनया
या प्रसक्तानुप्रसक्त्या प्रकृतमनुसरामः भेदकातिशयोक्तिस्तत्रैवान्यत्ववर्णनं अन्यदेवास्य गांभीर्यमन्यद्धैर्यं महीपतेः अत्र लोकप्र
सिद्धगांभीर्याद्यभेदेऽपि भेदो वर्णितः यथा वा अन्यैव रूपसंपत्तिरन्या वैदग्ध्यधोरणी नैषा नलिनपत्राक्षी सृष्टिः साधारणी विधेः ५ ॥

प्रसक्तेति अतिशयोक्तेः सापह्नवत्वकथनप्रसंगादलंकारसर्वस्वकृदुक्तं स्वरूपोत्प्रेक्षायां शुद्धापह्नुतिगर्भत्वं दर्शितं तदनुप्रसक्त्या च त्रिविधास्वप्युत्प्रेक्षास्व
पर्यस्तापह्नुतिगर्भत्वमित्यर्थः भेदकेति तस्यैव तज्जातीयस्यैव अन्यत्ववर्णनं तच्चाहार्यबोधं एकत्वेऽपि तेन भ्रांतौ नातिव्याप्तिः इदं च लोकोत्तरत्वप्रति
पत्त्यर्थं अन्यदेवेति अस्य महीपतेर्गांभीर्यं अन्यदेव प्रसिद्धगांभीर्यभिन्नमेवेत्यर्थः. अन्यैवमिति रूपसौंदर्यं वैदग्ध्यं चातुर्यं धोरणी परिपाटी एषा नलिनप
त्राक्षी विधेः साधारणी सृष्टिर्नेत्यन्वयः अत्रोत्तरार्द्धेन अभंग्यान्यत्ववर्णनं विशेषः ५ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ वंधेति अयोगे असंबंधे योगकल्पनं संबंधवर्णनं संबंधश्चाभेदभिन्नत्वे सत्यन्यत्वाद्यनिरूपितोऽत्रास्य तेन रूपकातिशयोक्त्यादिष्वभेदेषु नातिव्याप्तिः सौधेति
१९ सौधो स्त्री राजसदनमित्यमरः नन्वत्रैव स्पृशंती विधुमंडलमिती वपदप्रयोगे उत्सेधप्रतीतेस्तदप्रयोगे गम्योत्प्रेक्षात्वमुचितं इत्यादिसत्वे याचाच्योत्प्रेक्षासे
वे वाद्यभावे गम्योत्प्रेक्षेति नियमात् अन्यथा तत्कीर्तिभ्रमणश्रांतेत्यादि पूर्वोदाहृतपद्ये पि गम्योत्प्रेक्षानस्याद्विशेषाभावादिति चेन्न मैवं उपदर्शितनिय
मस्यालंकारांतराविषयएवाभ्युपगमात् अन्यथा नूनमुन्नतेत्यादौ नूनमित्यप्रयोगे गम्योत्प्रेक्षापत्तेः एवं च प्रकृते संबंधे संबंधवर्णनरूपातिशयोक्त्यलंका
रविषयेन गम्योत्प्रेक्षावसरः तत्कीर्तिरित्युदाहरणे तु भ्रमणश्रांतत्वरूपहेतुविशेषगम्योत्प्रेक्षाभिप्रेता न तु स्वर्गगाप्रवेशांशा इति सर्वमवदातं असंबंधमुदाह

संबंधातिशयोक्तिः स्यादयोगे योगकल्पनं सौधाग्राणि पुरस्यास्य स्पृशंति विधुमंडलं ३६ यथावा कतिपयदिवसैः क्षयं प्रयायात्कनकगि
रिः कृतवासरावसानः इति मुदमुपयाति चक्रवाकी वितरणशालिनि वीररुद्रदेवे अत्र चक्रवाक्याः सूर्यास्तमयकारकमहामेरुक्षयसंभाव
नाप्रयुक्तसंतोषासंबंधेपि तत्संबंधो वर्णितः योगेप्ययोगः संबंधातिशयोक्तिरितीर्यते त्वयि दातरि राजेंद्र स्वर्द्रुमान्नाद्रियामहे अत्र स्वर्द्रुमे
ष्वादरसंबंधेपि तदसंबंधो वर्णितः यथावा अनयोरनवद्यांगि स्तनयोर्जृंभमाणयोः अवकाशो न पर्याप्तस्तव बाहुलतांतरे ६॥ ॥

रांतरमाह यथावेति कतिपयेति वीर रुद्रदेवाख्ये नृपे वितरणशालिनि दानशालिनि सति चक्रवाकी इति मुदं संतोषमुपयाति प्राप्नोति इति किं कृतवास
रस्यावसानं नाशो येन सः कनकगिरिः सुमेरुः कतिपयैरल्पैर्दिवसैः क्षयं प्रयायादिति संभावनायां लिङ् योगेपीति योगे सत्यप्ययोगवर्णनमित्यर्थः स्वर्ग
स्था द्रुमाः कल्पवृक्षादयः स्वर्द्रुमेष्विति विषयसप्तमी स्वर्द्रुमविषये य आदरस्तत्संबंधेपि अर्थादर्थिषु येह्यर्थिषु स्वर्द्रुमविषयादरसंबंधाभावप्रतीतेरनन्स
मानविन्निवेद्यतया स्वर्द्रुमेष्वादरविषयत्वाभावावगमाद्धयासूक्तमेव साधु अनयोरिति अनवद्यानि निर्दुष्टान्यंगानि यस्यास्तथाभूते इति संबोधनं जृंभमाण
योर्वर्धमानयोरनयोस्स्तनयोस्तव बाहुलतयोरंतरे मध्ये पर्याप्तः अवकाशो नास्ती त्यन्वयः अत्र बाहुलतयोरंतरे स्तनपर्याप्तावकाशसंबंधेपि तदसंबंध उक्तः ६॥ राम॰ १९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

अक्रमेति। क्रमः पौर्वापर्यं तदभावोऽक्रमस्तद्रूपस्यातिशयस्योक्तिरित्यर्थः सहत्वे समकालत्वे आलिंगंतीति समं युगपत् ज्यां मौर्वीं पृथ्वीं च परांशत्रवः मुंचती
ति हम्मीरसंज्ञकस्य वीरस्य खड्गे कोशं पिधानं मुंचति सति अरीणां वर्गः समूहोऽपि कोशं भांडारं मुंचति तथा खड्गे प्रकंपयुक्ते शत्रुजनो भजति सति सः प्रकृष्टं कंपं भ
जति एवं खड्गे क्ष्मां क्रांतिं त्यजति सति सोऽपि क्ष्मां पृथ्वीं त्यजतीत्यर्थः कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोरित्यमरः अत्र शत्रुपक्षे यमकगणयोग
द्धवर्णनं विशेषः धनगृहेति धनसंबंधिगृहेत्यर्थः चपलेति हेतोः प्रशक्तिज्ञानं तज्जन्ये कार्ये सतीत्यर्थः यास्यामीति उदिते उक्ते प्रियेण तिशोषः तन्व्या
ऊर्मिका अंगुलीयकं वलयः कंकणमभवदित्यर्थः ऊर्मिकात्वंगुलीयेस्यादूर्मिर्भंगतरंगयोरिति विश्वः कार्यमुखेनेति अंगुलीयकस्य कंकणापदप्रा

अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः आलिंगंति समं देव ज्यां शराश्च पराश्च ते ३७ अत्र परामौर्व्यौ शिरसंधानं तदानीमेव शत्रवः क्षि
तौ पतंतीति हेतुकार्ययोः सहत्वं वर्णितं यथा वा मुंच विमुंचति कोशं भजति भजति प्रकंपमरिवर्गः हम्मीरवीरखड्गे त्यजति त्यजति क्ष्मामाशु
॥ अत्र खड्गस्य कोशत्यागादिकाले एव वैरिणां धनगृहत्यागादिवर्णितः चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे यास्यामीत्युदिते तन्व्या
वलयोऽभवदूर्मिका ३८ अत्र नायकप्रवासप्रसक्तिमात्रेण नायिकायाः कार्श्यकार्यं मुखेन दर्शितं यथा वा आदातुं सकृदीक्षितेऽपि कुसु
मे हस्ताग्रमालोहितं लाक्षारंजनवार्तयापि सहसा रक्तं तलं पादयोः अंगानामनुलेपनस्मरणमप्यत्यंतखेदावहं हंताधीरदृशः किमन्यद
लकापोढोऽपि भारायते १॥॥
भिरूपकार्यवर्णनद्वारेत्यर्थः आदातुमिति सहजसौकुमार्यवत्याविरहदशायां तदतिशयवर्णनमिदं हंतेति खेदे आदातुं गृहीतुं सकृदेकवारमपि कुसुमे
ईक्षिते सति अधीरदृशः हस्ताग्रमालोहितं भवतीति शेषः अपिना किमु गृहीत इति गम्यते लाक्षया यत् रंजनं तद्वार्तयापि सहसा अकस्मात् पादयोस्त
लं रक्तं भवति किमु रंजनेनेति पूर्ववत् एवमंगानां चंदनादिनानुलेपनं तस्य स्मरणमपि अत्यंतखेदकरं किमुतानुलेपनं किमन्यत् वाच्यमिति शेषः
अलकानां मगुरुधूपादामोदोऽपि भारायते भार इवाचरतीत्यर्थः कर्तरि क्यङ् अत्रेक्षणादिरूपहेतुप्रसक्तिमात्रेण हस्ताग्रलोहित्यादिरूपकार्योत्पत्तेः साक्षा
द्वर्णनं तत्कार्यमुखेनेति सर्वमिदमस्ति ॥ १ ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰ नं॰ हेतुकार्ययोरिव हेतुप्रसक्तिकार्ययोरपि [?]कालत्वं संभवतीति सूचयितुमुदाहरणांतरमाह। यामीति ध्रुवे वदति ते यामिनि यामीति वदति सति त्वरणेन तत्कालमेव
३० तेनांगणावलयानि अग्रिमकंकणानि मिश्रः प्रथमं गलितानि अपराणि पितथैव तत्कालमेव दलितानि भग्नानीत्यन्वयः पुरोऽग्रे प्रथमे च स्यादित्यमरः अत्र व
दनिगलितानीति शतृप्रत्ययेन समाकालतावगतिः अत्यंतेति अत्र हेतुकार्ययोरित्यनुवर्तते तस्योर्वीपर्यैति क्वचित्पाठः साधुरेव व्यतिक्रमोऽत्र वैपरी
त्यं अग्रे प्रथमं अनुनीता समाहिता कवीन्द्राणामिति कविश्रेष्ठानामंगणासंबधिन्यो भ्रमयः प्रथमतरमतिप्रथममेव चलतां चपलानां भृंगाणां भ्रम

॥ यथा वा ॥ यामिनि यामीति धवे वदति युवत्याः क्षणेन तन्व्यंगयाः। गलितानि पुरो वलयान्यपराण्यपि तथैव दलितानि ॥ अत्यंता
तिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमे। अग्रे मानो गतः पश्चादनुनीता प्रियेण सा ॥ यथा वा कवीन्द्राणामासन्प्रथमतरमेवांगणभु
वश्चलद्भृंगासंगाकुलकरिमदामोदमधुराः। अमी पश्चात्तेषामुपरि पतिता रुद्रनृपतेः कटाक्षाः क्षीरोदप्रसरदुरुवीचीसहच
राः ॥ एतास्तिस्रोऽप्यतिशयोक्तयः कार्यशैघ्र्यप्रत्यायनार्थाः ८ ॥ ॥

णाणां आसंगेनाकुलानां करिणां मदजलस्यामोदेन परिमलेन मधुरा रमणीया आसन् अभवन् पश्चादनंतरं तेषां कवीनामुपरि रुद्रसंज्ञस्य नृपतेः।
अमी दृश्यमानाः कटाक्षाः पतिताः कीदृशाः क्षीरसमुद्रस्य प्रसरंत्या क्षतस्य क्षीरार्णवस्य प्रसरंतीनामुरुवीचीनां दृढतरंगाणां सहचराः सादृश्यादित्यर्थः राम॰
उदकस्योदः संज्ञायामित्युदादेशः अत्र यथोक्तकटाक्षरूपकार्यमुखेन नृपतिप्रसादरूपहेतुकथनं पूर्वस्मादिह विशेषः एताः अव्यवहिताः अथो ३०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कोषु प्रथमभेदेष्वनुगतप्रवृत्तिनिमित्ताभावात्कथमतिशयोक्तिपदप्रयोग इति चेत् अत्राहुः तावत्सु भेदान्यतमत्वमेव सर्वानुगतमतिशयोक्तिपदप्र
वृत्तिनिमित्तं तदेव च सामान्यलक्षणमिति न च्याक्तानिगीर्याध्यवसानमेवातिशयोक्तिः प्रभेदांतरे त्वनुगतरूपाभावादलंकारांतरमेव न चान्यत्वा
दिप्रभेदेषु अन्यत्वादिभिरभेदादीनां निगिरणासंभवतीति वाच्यं अन्यत्वादिभिरभिन्नवस्तुप्रतीतेरेव चमत्कारित्वेनानुभवसिद्धतयाऽन्यत्वादिभि
रभेदप्रतीत्यंगीकारेऽनुभवासंगतेः अन्यतमत्वं तु नालंकारविभाजकोपाधितां भजते चमत्काराप्रयोजकत्वादिति वदंति वस्तुतस्तु अनुपा
त्वेसति ५ त्तविषयकं चमत्कृतिजनकाहार्यारोपनिश्चयविषयत्वमेवातिशयोक्तिसामान्यलक्षणं रूपकवारणायासत्यंतं भ्रांतिवारणायाहार्येति उत्प्रे
क्षावारणाय निश्चयेति रूपकातिशयोक्तावभेदस्य द्वितीयप्रभेदेऽन्यत्वस्य तृतीये संबंधस्य चतुर्थेऽसंबंधस्य पंचमे सहत्वस्य षष्ठे हेतुप्रसक्तिजन्य
त्वस्य सप्तमे पूर्वापरत्वयोश्च तथाविधारोपविषयत्वसत्वात्सर्वत्र लक्षणसमन्वयः न चैवंविधारोपस्य रूपकस्वभावोक्तिभिन्नेषु प्रायशः सर्वालं
कारेषु सत्वादतिप्रसंग इति वाच्यं इष्टापत्तेः अलंकारांतराणां चमत्कारे प्रधानतया तदंगत्वेनाव
स्थितायाः अतिशयोक्तेः प्रधानत्वेन व्यपदेशाने
र्हत्वात् प्राधान्येन व्यपदेशा भवंतीति न्यायात्तदलंकाराणामेव प्रधानत्वेन व्यपदेशार्हत्वात् अत एव प्रकाशकृता विशेषालंकारप्रसंगेऽभि
हितं सर्वत्रैवंविधविषयेऽतिशयोक्तिरेव प्राणत्वेनावतिष्ठते तां विना प्रायेणालंकारत्वाभावात् अत एवोक्तमेषा सर्वत्र वक्रोक्तिरनयार्थो वि
भाव्यते यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विनेतीति दंडिनाप्युक्तं अलंकारांतराणामप्येकमाहुः परायणां वागीशमहितामुक्ति ॥ ॥
मिमामतिशयाह्वयामिति॥ ॥इति श्रीचंद्रिकाख्यायामतिशयोक्तिप्रकरणं संपूर्णं॥ ८ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

वशीतवन्निमपेक्षितं समस्त्वलितक्रियुमा गत्रिं र पास्तसंस्थानतिः। उसेमुकुलितस्तनं ... सर्वंधो दुरं॥
बतेदुवदनातनौत रूपिमेदूम: शामतद्र

कु.नं. ३१ तुल्ययोगितां लक्षयति वर्ण्यानामिति वर्ण्यत्वेन प्रकृतानामित्यर्थः इतरेषां अप्रकृतानां एतच्चोभयमपि सावधारणं वर्ण्यानामेव इतरेषामेवेत्यर्थः वक्ष्यच
नमतेकार्थकं ह्ययोधर्मैक्यस्यापि संभवात् धर्मैक्यं धर्मस्यैकत्वमेकत्वं एको धर्म इति यावत् स च चमत्कारी बोध्यः एवं चानेकप्रकृतमात्रसंबद्धैकचमत्कारिध
र्मोऽनेकाप्रकृतमात्रसंबद्धैकचमत्कारिधर्मान्यतरत्वं लक्षणं बोध्यं मुखविदिकसितास्मितेत्यादावति प्रसंगवारणाय पदं कति अत्र च चतुरत्वपेक्षितादिरूपानेकव
र्ण्यसंबद्धो नैको धर्म इति तन्निरासः दीपकवारणाय मात्रेति प्रकृताप्रकृतप्रभेदसाधारणयान्यतरत्वनिवेशः त्वदंगेति प्रियां प्रतिदयितोक्तिः त्वदंगस्य
मार्दवे सौकुमार्ये दृष्टे सति कस्य चित्ते मालत्यादीनां कठोरता न भासते अपितु सर्वस्येत्यर्थः शशांकविभ्रतीति शशभृच्चंद्रस्तस्य लेखा कला । गुणक्रियारूपेति
एतेन तथाविधधर्मस्य प्रायशो गुणक्रियारूपत्वमित्यभिप्रेत्योक्तं न तु लक्षणे तेन रूपेण धर्मस्य निवेशः गौरवात् प्रयोजनाभावाच्च यत्तु केचिदेतत्पद्यद्व

वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता संकुचंति सरोजानि स्वैरिणीवदनानि च ३९ त्वदंगमार्दवे दृष्टे कस्य चित्ते न भासते मालतीशशभृ
ल्लेखाकदलीनां कठोरता ४० प्रस्तुतानामप्रस्तुतानां वा गुणक्रियारूपैकधर्मान्वयस्तुल्ययोगिता संकुचंतीति प्रस्तुततुल्ययोगिताया
मुदाहरणं तत्र प्रकृतचंद्रोदयकालीनतया वर्णनीयानां सरोजानां प्रकाशभीतस्वैरिणीवदनानां च संकोचरूपैकक्रियान्वयो दर्शितः उत्तर
श्लोके नायिकासौकुमार्यवर्णने प्रस्तुतवैवर्णनीयानां मालत्यादीनां कठोरतारूपैकगुणान्वयः १ ॥ ॥

न. बरगलाप्रैधर्मस्य गुणक्रियारूपत्वेन लक्षणे निवेश इत्याशयमारोप्याभिहितं तदेतदापाततः शोभमानमपि ... हेरजङ्घालिं ... नमनागपि निश्चिंते मंडले
शत्रुमित्रयोरित्यत्राभावरूपधर्मस्यैवान्वयादिति तदिदमापाततोऽपि न मनोरमं तथाहि शोभते इति त्वदुक्तौ दृष्टे तत्पद्ये निश्चिंतत्वेति निश्चिंतभेदः शत्रुमित्रमंडलधर्म
त्वयोपात्तः स च गुणस्वरूप एव चिंताभाववद्भेदस्य चिंताभावानतिरिक्तत्वात् अन्यथा चिंताभावाभावस्यापि अतिरिक्तत्वापत्तेः अथ तत्रापि वैयाकरणादिदृष्ट्या त्रिमाजं वस्ते भव
त्वेव तु ध्यत्तुमतावूपवमप्यभावस्य कथं गुणत्वमिति भावः जातिक्रियाद्रव्यातिरिक्तस्यैव च तत्तत्वयी शब्दानां प्रवृत्तिनिमित्त वदद्भिर्वैयाकरणैस्तदनुसारिभिरालंकारिके
र्गुणत्वांगीकारात् अत एव जातिगुणयोर्विरोधे प्रकाशकृद्भिरुदाहृतं गिरयोऽप्युच्चास्तिप्रुजद्गति तथा भविद्यानाथेनापि अमदःसार्वभौमोऽपीति ... लक्षणे राम. ३१
... तेन रूपेण धर्मस्य निवेशोऽभिप्रेत इत्यावेदितमतो न काप्यनुपपत्तिरिति स्वैरिणीत्वे नई रितिशीलमस्यास्ताहशी व्यभिचारिणीति यावत् सा दौः रिणोरित्ते
द्धिः स्वैरिणीपांसुला चस्या दित्यमरः ५ ॥ ॥

विरुद्धमार्गप्रवेशात् ४

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संजातेति दिनातिपद्मानि चण्डद्युतिमी पुनः शाखुः श्रीदृशानि संजातैः पत्त्राणां प्रकरैः समूहैरन्वितानि पूर्वं पत्त्राणां वसंते न विशालनात् तथा स्फुटा विकसिताः पाटला
रक्तविशेषा येषु तेषां भावस्तत्त्वमिति समुद्वहन्तीति शब्दं तं रक्षातातीत्यर्थः पद्मपक्षे तु स्फुटानि विकसितानि चन्नतानि पाटलवर्णानि तेषां भावस्तत्त्वमित्यादि पूर्ववत्
एवमर्कस्य करैः किरणैरभिमर्शनात् हि विकस्वराणि भास्वराणि दिनानि पद्मानि तु विकासशालीनि नागेंद्रेति नागेंद्राणां गजश्रेष्ठानां हस्ताः शुंडाः कदलीविशे
षाः स्वपरिणाहो विशालतातच्छालि रूपं स्वरूपं लब्ध्वापि यथाक्रमेत्वचि कर्कशत्वात्कगौरत्वात् एकांतेन नियमेन शैत्याच्च हेतोर्लोके तस्याः पार्वत्या ऊर्वोरुपमा
नात् बाह्याः उपमानत्वरहिता जाता इत्यन्वयः तदीयत्वेनेति तत्कालिकत्वेनेत्यर्थः ग्रीष्मकालिकवस्त्रवर्णनस्यैव ग्रीष्मरूपवर्णनत्वादिति भावः एकक्रिये

यथा वा संजातपत्त्रप्रकरान्वितानि समुद्वहन्ति स्फुटपाटलत्वं विकस्वराण्यर्ककराभिमर्शाद्दिनातिपद्यानि चण्डद्युतिमी पुः नागेंद्रहस्तास्त्वचि क
र्कशत्वादेकांतशैत्यात्कदलीविशेषाः लब्ध्वापि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः अत्र ग्रीष्मवर्णने तदीयत्वेन प्रकृता
नां दिनातिपद्मानां चैकक्रियान्वयः ऊरुवर्णने प्रकृतानां करिकराणां कदलीनां चैकगुणान्वयः हिताहिते वृत्तितौल्यमपरं तुल्य
योगिता प्रदीप्यते पराभूतिर्मित्रशात्रवयोस्त्वया अत्र हिताहितयोर्मित्रशात्रवयोस्तुल्ये वृत्तिर्दानस्य पराभवदानस्य च श्लेषेणाभेदाध्यव
सायाद्वृत्तितौल्यं यथा वा यश्च निंबं परशुना यश्चैनं मधुसर्पिषा यश्चैनं गंधमाल्याद्यैः सर्वस्य कटुरेव सः अत्र हस्तेति सिंचत्यर्चतीत्यध्याहारे
वीतरागे निस्पृहे यानि पूर्वोदाहरणात्क्षतिपर्यवसायि इदं तु निंदापर्यवसायीति भेदः ३ ॥ ॥

ति वृद्धिप्राप्तिरूपैकक्रियान्वय इत्यर्थः एकगुणेति उपमानबाह्यत्वरूपैकगुणेत्यर्थः हिताहितेति हिताहितविषये इत्यर्थः वृत्तितौल्यमिति वृत्तिवर्तनं व्यव
हरणमिति यावत् तस्य तौल्यं साम्यं अपरा पूर्वोक्तविलक्षणा प्रदीप्यत इति परा उत्कृष्टा भूतिः संपत्तिरेव पराभूतिः पराभवः शत्रूणां समूहः शात्रवं तस्य समूहः
इत्यण् पराभवदानस्येति शत्रुसंबंधिपराभवसंपादनस्येत्यर्थः पराभवस्याभ्युदयदानासंभवात् अत एव संप्रदानत्वासंभवान्मित्रशात्रवयोरिति संबंधसामान्ये
षष्ठी श्लेषेण पराभूतिपदश्लेषेण यथा वेति अत्र च शब्दा अप्यर्थाविरोधद्योतकाः अत्रेति योऽपि निंबं परशुना छिनत्ति योऽप्येनं मधुयुक्तेन सर्पिषा स्नेहेन सिंचति यो
प्येनं गंधमाल्याद्यैरर्चतीति क्रमेणेत्यर्थः ३॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु·नं· उक्तप्रकारस्य तुल्ययोगितापदवाच्यत्वे हृद्यसंमतिं दर्शयति इयमिति तथा च हृद्यव्यवहारानानार्थस्तुल्ययोगिताशब्द इति भावः अत्र केचिदाहुः नेयं तुल्ययो द्वितीयातुल्ययोगिता१
३१ क्तगितापूर्वोक्ततुल्ययोगितातो भेदमर्हति उर्णा नामितरेषां वेत्यादिपूर्वोक्तलक्षणाक्रान्तत्वात् एकानुपूर्वीबोधितवस्तुकर्मकदानपात्रत्वस्य परंपरया
तादृश धर्मस्यैक्यात् यस्त्वनिंद्यमित्यत्रापि कदुत्वविशिष्टनिंद्यस्यैव परंपरयाछेदकस्यैव फलप्रजनकधर्मत्वसंभवादिति: तदेतदपेशलं तथाहि यत्रानेकान्नु
यित्वेन ज्ञातो धर्मस्तेषामौपम्यगमकत्वेन चमत्कृतिजनकत्वे चेत् पूर्वोक्तप्रकारः यत्र तु हिताहितोभयविषयकस्यभास्य भरूपैकव्यवहारस्य व्यवहर्तृगतस्त्वाजि
निंदान्यतरद्योतकतया चमत्कृतिजनकत्वं तत्रापर इति भेदात् नन्वेवमपरा प्रतिशब्दस्य तदर्थकर्मकदानस्य वा परंपरया शत्रुमित्रगतत्वेन भग्नं पित्तस्नेहत्वादेकत्वेनाथ
त२ मे१

इयं सरस्वतीकंठाभरणोक्ता तुल्ययोगिता ५ ॥ ॥

वृत्तितस्य तादृशदानस्य राजगतत्वेनैवेति कथं पूर्वोक्तलक्षणाक्रान्तत्वं एतेन यस्त्वनिंद्यमित्यत्र कदुत्वविशिष्टनिंद्यस्यैव परंपरयाछेदकस्यैव फलप्रजनकधर्मत्वमिति निर
स्तं वस्तुगत्या तद्धर्मत्वस्यालंकारत्वासंपादकत्वाभावात् अन्यथा संकुचंति सरोजानीत्येतावतैव तुल्ययोगितालंकारापत्तेः किंत्वनेकगतत्वेन ज्ञायमानधर्म
त्वस्यैव तुल्ययोगिताप्रयोजकत्वमिति तदभावे तदंतर्गतिकथनमसमंजसमेव अथ्यास्तुक्तोदाहरणयोस्तथाभानमस्त्वीत्याग्रहस्तथापि पूर्वोक्तलक्षणास्या
त्रेसंभवः धर्मो यदि वशगो श्रीस्त्वयि राजन् विराजत इति प्रकृतयोरुपमायामतिव्याप्तिवारणार्थमनेकानुगतधर्मत्वपर्यन्तविवक्षितासंबंधानवच्छिन्नावच्छेदकताकच राम०
मत्कृतिजनकताश्रयज्ञानविषयधर्मत्वमिति विवक्षायास्तत्रावश्यकत्वात् प्रकृते च हितत्वाहितत्वादेर्विषयस्याधिकस्यानुप्रवेशादिति विभावनीयं ५ ॥ ॥ ३१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गुणोत्कृष्टैरिति गुणैरुत्कृष्टाः श्रेष्ठास्तैरित्यर्थः समीकृत्य साम्यं विवक्षित्वा वच इति वचनं वचः प्रतिपादनमिति यावत् अर्थात्तत्साधारणधर्मस्य अन्येति धर्मस्य वर्णनीयवर्ण्यगतत्वाद्दुक्तविलक्षणेत्यर्थः पाशोऽस्यास्तीति पाशी वरुणः प्रचेता वरुणः पाशी इत्यमरः श्रीदः कुबेरः शक्र इंद्रः लोकपालपदं चेंद्रादिषु रूढं राशिद्वयोरप्यनेनैव युक्तं संगतानीति संगतानि संगमाः तडितां विद्युतां विलसितानि उल्लसितानि घनं निविडं यथा स्यात्तथा आरब्धानीति संगमपक्षे॥ पक्षे मेघैरारब्धानीति च तडिद्विलसितपक्षेऽर्थः काव्यादर्शे एतन्नामकदंडिकृतग्रंथे दर्शिता तुल्ययोगितापदवाच्यत्वेन निर्दिष्टा केचित् आलंकारिकाः॥

गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता लोकपालो यमः पाशी श्रीदः शक्रो भवानपि ४१ अत्र वर्णनीयो राजा शक्रादिभिर्लोकपालत्वेन समीकृतः यथा वा संगतानि मृगाक्षीणां तडिद्विलसितान्यपि क्षणाद्वयं न तिष्ठंति घनारब्धान्यपि स्वयं पूर्वत्र स्तुतिरिह निंदा इयं काव्यादर्शे दर्शिता इमां तुल्ययोगितां सिद्धिरिति केचिद्व्यजह्रुः यदाह जयदेवः सिद्धिः ख्यातेषु चेन्नामकीर्तनेन तुल्यतोक्तये युवामेवेह विख्यातौ त्वं च लोले जलधिर्जलैरिति मतांतरेष्वत्र एवं रूपमाणं दीपकमेव ५ ॥

व्यवजह्रुः व्यवहृतवंतः ख्यातेषु गुणवत्त्वेन प्रसिद्धेषु युवामेवेति इह भूलोके बलैः सैन्यः अत्र च सैन्यजलयोः प्रसरणशीलत्वादिसादृश्याद्विंदंवपाति एवं भावेनाभेदमाश्रित्य धर्मैक्यं बोध्यं मतांतरेष्वितिवक्रवचनेन च हृसंमततया दंड्युक्ता तुल्ययोगितायामस्वरसो ध्वन्यते तस्य च दीपकतुल्ययोगितयोर्भेदकथनावसरे व्यक्तीभविष्यतीति संक्षेपः॥ ॥इति श्रीकुवलयानंदटीकायां तुल्ययोगिताप्रकरणं ५॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कुं० नं०
३३

दीपकं लक्षयति वदंतीति वर्ण्यावर्ण्यान्वितैकचमत्कारिधर्मो दीपकमित्यर्थः कलभः करिशावकः भानक्रियेति क्रियारूपैकधर्मान्वय इत्यर्थः अत्रापि क्रियादि
शेषाणामन्ते योऽमदप्रतापयोर्विवक्षितं तद्विभानेबोध्यः यथा वेति शाणोल्लीढ निकषपाषाणेनोल्लीढ उल्लिखितो मणिः तथाहवेति भिरायुधैर्निहतः कृतत्रणः क्षतः समरे सं
ग्रामे विजयशीलो योद्धा मदेन क्षीणो नागो हस्ती शरत्काले शयानानिम्नगाः पुलिना निजलत्वेन रिक्तीकृततटा निम्नगाः सरितो नद्यः कलामात्रावशिष्टश्चंद्रः सु
रतेन मृदिता चुंबनालिंगनाद्युपमर्दीकृतापि तांगी वा जानवयो वनावनिता स्त्री एवमर्थिषु पावकेषु गलितः संक्रांतो विभवः सम्पद्धि येषां ते नृपाश्च तनिम्ना तनोः
कृशत्वभावः स निमा कार्श्यं तेन शोभंत इत्यन्वयः शाणस्तु निकषः कष इत्यमरः शोभैकेति शोभारूपैकधर्मेत्यर्थः पूर्वोदाहरणे त्वादिदीपकं इह त्वंतदीपक

वदंति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः मदेन भाति कलभः प्रतापेन महीपतिः ४७ प्रस्तुताप्रस्तुतानामेकधर्मान्वयो दीपकं यथा कलभ
नरपालयोः प्रस्तुताप्रस्तुतयोर्भानक्रियान्वयः यथा वा मणिः शाणोल्लीढः समरविजयी हेतिदलितो मदक्षीणो नागः शरदि सरितः श्यान
पुलिनाः कलाशेषश्चंद्रः सुरतमृदिता बालवनिता तनिम्ना शोभंते गलितविभवाश्चार्थिषु नृपाः अत्र प्रस्तुतानां नृपाणां प्रस्तुतानां मण्यादीनां
शोभैकधर्मान्वयः प्रस्तुतैकनिष्ठः समानो धर्मः प्रसंगादन्यत्रोपकरोति प्रासादार्थमारोपितो दीपो रथ्यायामिवेति दीपसादृश्याद्दीपकं संज्ञायां च
तीवार्थे कन्प्रत्ययः यद्यपि सुवर्णपुष्पां पृथिवीं चिन्वंति पुरुषास्त्रयः शूरश्च कृतविद्यश्च यश्च जानाति सेवितुं इत्यत्रप्रस्तुतानां युगपद्धर्मान्वयः १॥ प्रस्तुत १

मिति भेदः प्रस्तुताप्रस्तुतसाधारणधर्मस्य दीपकपदवाच्यतायां बीजमाह प्रस्तुतैकेत्यादि प्रस्तुतैकनिष्ठः प्रस्तुतैकपरः प्रस्तुतान्वयविवक्षयावत इत्यर्थः प्रा कि हितदृति
सादेत्यनंतरमुपकरोतीत्यनुषज्यते इतीति चाध्याहार्यं इति दीपकसादृश्यात्समानो धर्मो दीपकमुच्यत इति शेषः यत्र धर्मस्य पूर्वं प्रस्तुतेऽन्वयः पश्चादन्यत्र
यथोक्तोदाहरणयोस्तत्र नेतरत्र प्रसंगोपकारित्वमित्याशयेन शंकते यद्यपीति सुवर्णेति सुवर्णमेव पुष्पं यस्या इति विग्रहः त्रयः गुणत्रयान्वितमनुजाः
शूरश्चेत्यादि प्रत्येकं चकारो नैरपेक्ष्यद्योतकः कृतविद्यः प्रत्याख्यातविद्यः एतत्त्व प्रासंगिकं यद्वा यदा यत्प्रसंगे पद्यते तदा तस्य प्रस्तुतत्वमितरस्याप्रस्तु राम०
तत्वमिति बोध्यं युगपदिति त्रयाणां चिन्वंतीति क्रियाया युगपदन्वय इत्यर्थः चिन्वंतीति बहुवचनांतस्य प्रस्तुतमात्रेणैकवचनांतेन पूर्वमन्वयायोगादिति ३३

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समाधत्ते । तथापीति प्रासंगिकत्वं प्रसंगोपकारित्वं न हीयत इति तथा च धर्मस्य पश्चादन्वयो न तत्र प्रयोजक इति भावः किं तर्हि प्रयोजकं तत्राह वर्ण्यमानेति ।
प्रस्तुतोद्देशेन प्रस्तुतोद्देश्यकान्वयबोधेच्छया प्रवृत्तस्यैव पदाभिहितस्यैव वर्णनस्य कर्मभूतत्वात् द्विविधधर्मस्य तथा च चमत्कारार्थप्रस्तुताप्रस्तुतान्वित
स्वार्थबोधप्रवृत्तीच्छयोच्चरितपदाभिहितधर्मस्योभयत्रान्वयेऽप्युद्देश्यताव्यवच्छेदविषयता प्रस्तुत एव न त्वप्रस्तुते किंतु विशेषणताख्याविषयतैवेति ।
तथाविधोद्देश्यताविरह एव प्रासंगिकत्वे बीजमित्याशयः । एतदेवोपपादयति नहीति प्रासंगिकत्वमिति दीपकरूपयोः प्रख्यातिस्थितिविषये प्रसंगोपकारित्वमित्य
र्थः तथा च मते तत्र प्रासंगिकत्वेन स्यादिति भावः इदमुपलक्षणं नाममात्रनिर्देशे प्रासंगिकत्वापत्तिरपि बोध्या । एतदेव तुल्ययोगितातो भेदकमित्याह तत्रे

तथापि प्रासंगिकत्वं न हीयते वर्ण्यमानस्य प्रस्तुतोद्देशेन प्रवृत्तस्यैव वर्णनस्याप्रस्तुतेऽप्यन्वयात् न हि दीपकस्य प्रख्याप्रासादयोर्गुणप्रदु
पकारकत्वेन नाममात्रार्थं अर्पितस्य रूपस्यातिस्थिमः प्रथमपरिवेषणेन च प्रासंगिकत्वं हीयते तुल्ययोगितायां तु केवलं प्रस्तुतमप्रस्तुतं वा प्रस्तु
तमिति विशेषाग्रहणात् सर्वोद्देशेनैव धर्मोक्तिरिति विशेषः अयं चानयोरपरो विशेषः यदुभयोरनयोरुपमालंकारस्य गम्यत्वाविशेषे
ऽपि अत्राप्रस्तुतमुपमानं प्रस्तुतमुपमेयमिति व्यवस्थित उपमानोपमेयभावस्तत्र तु विशेषाग्रहणादैच्छिकः स इति १ ॥ ॥ ॥

तुल्ययोगितायां त्विति नन्वुद्देश्यत्वानुद्देश्यत्वयोश्चमत्काराप्रयोजकत्वान्नालंकारभेदप्रयोजकत्वं युक्तमित्यस्वरसादाह अयं चेति अयं वक्ष्यमाणः अनयोः
दीपकतुल्ययोगितयोः अत्र दीपके उपमानोपमेयभाव इत्यनेनान्तरंगमप्यन्तिमांश इति शेषः तत्र तुल्ययोगितायां विशेषाग्रहणात् प्रस्तुताप्रस्तुतत्वरूपव्यवस्था
पकाभावात् ऐच्छिकः अव्यवस्थितः सः उपमानोपमेयभावः तथा च तावतापि तुल्ययोगितातो दीपकस्य पृथग्भाव उचितः धर्मस्य सकृद्वृत्तित्वमुल्ला
साविच्छेदेऽविशेषात् अन्यथा तुल्ययोगितायामपि धर्मिणां केवलप्रकृतत्वस्य केवलाप्रकृतत्वस्य च विशेषस्य सत्त्वादलंकारद्वैतापत्तेः तस्यास्तुल्य
योगिताया एव द्वैविध्यमुचितमित्याशयः ॥ ॥ इत्यलंकारचन्द्रिकायां दीपप्रकरणं २ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिविधमिति दीपकस्यावृत्तेोऽयावृत्तिदीपकं भवेत्तच्च त्रिविधमित्यर्थः वर्षतीति शर्वरी रात्रिः वर्षं वत्सर इवाचरतीत्यर्थः कदंबानि कदंबकुसुमानि उन्मीलंति विक
संति कुटजो द्रुमाः कुटजकलिकाः स्फुटंति विकसंति त्वष्ण्यास्त्वातकामाद्यंति मत्ता भवंति शिखावला मयूरास्तु माद्यंतीत्यन्वयः त्रैविध्यमुपपादयन्नेव व्याचष्टे।
दीपकस्येति क्रमेणेति आद्ये वर्षतीति शब्दावृत्तिः अलंकारसंपादकत्वाच्च न कथितपदत्वे दोषः द्वितीये विकासरूपस्यार्थस्यावृत्तिः उन्मीलंति स्फुटंतीति शब्द
भेदेन तस्यैव बोधनात् तृतीये द्वयोरावृत्तिः स्फुटैवेति उत्कंठयतीति मेघानां माला पंक्तिः कलापिनां मयूराणां वर्गं समूहं उत्कंठयति ऊर्ध्वकंठं यस्य तादृशं क

त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकं वर्षत्यंबुदमालेयं वर्षत्येषा च शर्वरी ४३ उन्मीलंति कदंबानि स्फुटंति कुटजोद्गमाः माद्यंति चा
तकास्तृप्ता माद्यंति च शिखावलाः ४४ दीपकस्यानेकोपकारार्थं तथा दीपस्थानीयस्य शब्दस्यार्थस्य वा उभयोर्वा आवृत्तौ त्रिविधमावृ
त्तिदीपकं क्रमेणाद्वैत्रयेणोदाहरणानि यथा वा उत्कंठयति मेघानां माला वर्गं कलापिनां यूनां चोत्कंठयत्यद्य मानसं मकरध्वजः॥
शमयति जलधरधारा चातकयूनां तृषं चिरोपनतां शमयति च वध्वलोचनजलधारा कामिनां प्रवासरुचिं वदनेन निर्जितं तव निलीय
ते चंद्रबिंबमंबुधरे अरविंदमपि च सुंदरि निलीयते पाथसां पूरे १॥ ॥

रोतीत्यर्थः भेदेऽपि शब्दावृत्तिः शमयतीति जलधरस्य मेघस्य धारापंक्तिश्चातकतरुणानां चिरकालमुपनतां प्राप्तां तृषं पिपासां शमयति वधूलोचनयोर्जलधारा अ
श्रुपंक्तिश्च कामिनां प्रवासेच्छां कृपयतीत्येक एव नाशरूपोऽर्थः शब्दभेदेनोक्त इत्यर्थावृत्तिः वदने तव पाथसां जलानां अत्र निलीयते शब्दस्य तदर्थस्य तिरोधानस्य
चावृत्तिः १॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नन्वप्रस्तुतार्थस्य सकृद्वृत्तेरप्रसंगादप्रस्तुतोपकारित्वे दीपकमित्युक्तं नचावृत्तौ तत्संभवतीति कथमावृत्तिदीपकमुक्तमित्याशंक्याह एवंचेति दीपस्थानी
यशब्दार्थयोरावृत्तौ चेत्यर्थः प्रस्तुताप्रस्तुतेति अंबुदमालादीनां विरहोद्दीपकतया प्रस्तुतत्वात् चंद्रबिंबारविंदयोश्च केवलाप्रस्तुतत्वादिति भावः दीपक
च्छायेति दीपकसादृश्येत्यर्थः तच्च प्रस्तुताप्रस्तुतोपकारयोगपत्त्ववर्षतीत्यादौ श्लेषवशेनास्तीति भावः मात्रपदेन दीपकान्तर्भावे वायमलंकारो न तु तत्स्वभेद १
४ पदावृत्ति इति सूचितं अतएव दंडिना अर्थावृत्तिः पदावृत्तिरित्यादि दीपकस्थानमेवेष्टमलंकारत्रयं यथेत्युक्त्वा विकसंतीत्याद्युदाहृतं दीपकस्थानस्थानापन्नं सदृश
मितियावत् इत्यावृत्तिदीपकं सकृद्धर्मोक्तिप्रसंगादसकृद्धर्मोक्तिगम्यवाक्यार्थसादृश्यकं प्रतिवस्तूपमालंकारं लक्षयति वाक्ययोरिति द्विवचनमनेकाभिप्रा

एकस्यावृत्तीनां प्रस्तुताप्रस्तुतोभयविषयत्वाभावेऽपि दीपकच्छायापत्तिमात्रेणादीपकव्यपदेशः वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता यथेन
प्रा१ भ्राजते तरुः अम्बरश्चापेणराजते ४५ यत्रोपमानोपमेयपरवाक्ययोरेकः साधारणो धर्मः पृथङ्निर्दिश्यते सा प्रतिवस्तूपमा प्रतिवस्तु प्रतिवाक्या
र्थं उपमा समानधर्मोऽस्यामितिव्युत्पत्तेः यथा देवराजनृपयोरेक एव धर्म उपमानोपमेयवाक्ययोः पृथग्भिन्नपदाभ्यां निर्दिष्टः यथा वा स्थिरा शै
त्न४ ली गुणवतां खलबुद्ध्यानबाध्यते रत्नदीपस्य हि शिखावात्यापि न नाश्यते १ यथा नवामृतस्यंदिनि पादपंकजे निवेशितात्मा कथमन्यदि
च्छति स्थितेऽरविंदे मकरंदनिर्भरे मधुव्रतो नेक्षुरकं हि वीक्षते अत्र यद्यप्युपमेयवाक्ये अनिच्छा उपमानवाक्ये अवीक्षेति धर्मभेदः प्रतिभाति
तथापि वीक्षणमात्रस्यावर्जनीयस्य प्रतिषेधानर्हत्वादिच्छापूर्वकवीक्षाप्रतिषेधोपमनिच्छापर्यवसितएवेति धर्मैक्यमनुसंधेय अर्थावृत्तेः
प्रस्तुतानां अप्रस्तुतानां वा प्रतिवस्तूपमा तु प्रस्तुताप्रस्तुतानामिति विशेषः ३॥४॥

८॥ धर्मानुरोधात् एकसामान्ये एकस्मिन्समानधर्मे सति स्फुरःस्फुर्यः लक्षणं व्याचष्टे यत्रेति उपमानोपमेयेति भावप्रधानं उपमानोपमेयभावपरयोरित्य
र्थः पृथगिति भिन्नशब्देनेत्यर्थः अयमेव च वस्तुप्रतिवस्तुभाव इत्युच्यते स्थिरेति शैली सहृन्न रत्नमेव दीपो रत्नदीपः अत्र पूर्वार्द्धे उपमेयवाक्यं उ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ ३५ तेनाईस्तु उपमानवाक्यं उभयत्र चनाशाभाव ... भावरूपः समानधर्मः शब्दभेदेनोपात्तः सामान्याभावमात्रबोधकस्यापि बाधते रवनाशारूपविशेषपरत्वात् अ
यमेव च पूर्वोदाहरणाद्भेदः १ तदेति ईश्वरं प्रतिभक्तस्योक्तिः अस्मत्पुत्त्रलवणाशीलेन त्वत्पादपंकजे निवेशितमात्मा ततः कारणं येन तादृशो भक्तः अन्यद् मृ
गातिरिक्तं फलं कथमिच्छति न कथमपीत्यर्थः अमृतं चात्र ब्रह्मानन्दरूपं हिनिश्चितं मधुव्रतो भ्रमरः मकरन्देन रसेन निर्भरे व्याप्ते अरविन्दे स्थिते सति इक्षुरकं नवी
नं तदित्युपमानवाक्यं इक्षुरकं तालमखानोति प्रसिद्धौषधीपुष्पं अववीतीयस्येति अनिष्टेपि स्वमामसोभेशाज्ञापमानस्येत्यर्थः इच्छापूर्वकेति तथा च
वीक्षते रिच्छापूर्वकवीक्षणेलक्षणोति भावः इच्छापर्यवसितं इति सविशेषणे हीति न्यायादिति भावः उन्मीलतीति कुर्वाणी तिपूर्वोदाहृता यामर्थाद
न्नावतिव्याप्तिमाशंक्याह अर्थादृत्त्वेरित्यादि शब्दावृत्तौ तु धर्मस्यैकेनैव शब्देनाऽवृत्त्या बोधनात् भिन्नशब्दबोध्यत्वमितिनातिव्याप्तिरत्रेऽर्थावृत्तिपर्य
न्तानुधावनं एवं च भिन्नशब्दबोध्यैकधर्मगम्यं प्रकृततापकृततावाक्यार्थसादृश्यं प्रतिवस्तूपमेति लक्षणं बोध्यं दृष्टान्तालंकारे नातिव्याप्तिवारणाय भि
न्नशब्दबोध्येति तत्र तु विंबप्रतिविंबभावापन्नधर्मगम्यसादृश्यमिति नातिव्याप्तिः दिविभातियथाभानुस्तथा त्वं भ्राजसे भुवीत्यादिवाक्यार्थोपमाया
मतिव्याप्तिवारणाय गम्यमिति अर्थावृत्तिवारणाय प्रकृताप्रकृतेति आननं मृगशावाक्ष्या वीक्ष्य लोलालकावृतं भ्रमद्भ्रमरसंकीर्णं स्मरामि
सरसीरुहमितिस्मरणालंकारेतिव्याप्तिवारणाय वाक्यार्थेति अत्र हि दिविभातीतिवाक्यार्थोपमायां गगनाधिकरणकशोभाश्रयभानुसदृशो भू
म्यधिकरणकशोभाश्रयस्त्वमिति प्रतीतिः तत्र स्मर्यमाणतादृशसरोरुहसदृशं तथाविधमाननमिति प्रतीतिर्नवाक्यार्थगतोपमागम्यास्यात् किं
तु स्मरणासंपृक्ता तादृशसरोरुहसदृशं तादृशमाननमिति पदार्थगतोपमैवेतितद्वारणमितिदिक् ३ ॥ ॥

रा॰ ३५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शक्तताप्रशस्ततत्वयोरूपमन्तातिविशेषाप्रयोजकतयानालंकारभेदप्रयोजकत्वमित्यस्वरसादाह अयंचेति वक्ष्यमाणइत्यर्थः विद्वानेवेति यद्यप्य
न्ययोगव्यवच्छेदार्थेनैवकारेण विद्वान्नजानातीतिपूर्ववाक्यार्थस्तस्यचनहिवंध्येत्यनेनरणवाक्यार्थःसधर्मेवतयाप्रिरूपवत्वेनकाकाशाइत्यादिप्रयोगवार
णायभावान्वयस्यावश्यकतया विद्वानजानातीतिवाक्यार्थस्यापिप्रतीतेस्तदभिप्रायेणवैधर्म्योदाहरणत्वंबोध्यं नन्ववैधर्म्येणोपमेतिव्याहृ

अयंचापरोविशेषः आवृत्तिदीपकंवैधर्म्येणनभवतिप्रतिवस्तूपमातुवैधर्म्येणापिदृश्यते यथा विद्वानेव
हिजानातिविद्वज्जनपरिश्रमं नहिवंध्याविजानातिगुर्वींप्रसववेदनां यदिसन्तिगुणाःपुंसांविकसन्त्येवतेस्व
यं नहिकस्तूरिकामोदःशपथेनविभाव्यते ४ ॥ ॥

द्वि२

तं तस्याःसाधर्म्यरूपत्वादितिचेत्सत्यं वैधर्म्येणोपमत्वेननहिवंध्येतिवाक्यार्थेनास्तिप्रसक्तिःपरन्तुप्रसविद्येवजानातीतिवाक्यार्थस्योपमानत्वेनवि
वक्षणात्तस्यवतोवैधर्म्यप्रतीतावपिसाधर्म्यएवपर्यवसानान्नदोषः वैधर्म्येणोत्तस्यचवैधर्म्यद्वारेत्यर्थः यदिसन्तीति· एवकारोभिन्नक्रमःस्वयमेव
विकसन्तिप्रकाशन्तइत्यर्थः अत्रापिगुणाःस्वयंप्रकाशन्तइतिभावान्वयविधर्माकस्तूरिकामोदःशपथेननज्ञायतइतिवाक्यार्थस्तदाक्षिप्तेनकिंत

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वयमेव प्रकाशत इति वाक्यार्थेन चोपमेयं गम्यमिति पूर्वस्माद्वैधर्म्योदाहरणात्संगतिः । यत्त्वत्र कैश्चिदुक्तं विद्वानेवेति पद्यं भवतु नाम कथंचिद्वैध
र्म्यस्योदाहरणं यदि संगतीति तन्न युक्तं वैधर्म्योदाहरणं हि प्रकृतस्य धर्मिविशेषस्य प्रकृतार्थदार्ढ्याय स्वाक्षिप्तव्यतिरेकसमानजातीयस्य ध
र्मान्तरारूढस्याप्रकृतार्थस्य कथनं यथा वंशभवो गुणवानपि संगविशेषेण पूज्यते पुरुषः । नहि तुम्बीफलविकलो वीणादण्डः प्रयाति महि
मानमित्यादौ । अत्र हि संगविशेषेण पूज्यत इति प्रकृतार्थाक्षिप्तसंगविशेषेण विना न पूज्यत इति व्यतिरेकस्य समानजातीयो नहि तुम्बी
फलविकल इत्याद्यप्रकृतार्थो निबद्ध इति वैधर्म्योदाहरणत्वं । यदि संगतीत्यत्र तु स्वयं प्रकाशेतेत्यनेन परेणोत्पस्य प्रकृतस्यैव समजातीयोऽप्रकृ
तोऽर्थः शपथेन न निबध्यते किंतु स्वयमेवेति प्रकृतार्थानुरूपतयैव पर्यवसानादिति । तन्नेदं वक्तव्यं वंशभव इत्यादिपद्येऽपि
कार्यं वैधर्म्योदाहरणत्वं नहीत्यादेस्तुम्बीफलविकलो महिमानं न प्रयात्यपि तत्प्रयुक्त इति प्रकृतार्थानुरूपतयैव पर्यवसानादिति । किं बहुना
सर्वत्रैव वैधर्म्योदाहरणेषु साधर्म्यपर्यवसानं विना नोपमानिर्वाह इति तदुच्छेदप्रसंगः । अथायातप्रतिपक्षेनाकृतवाक्यार्थेन वैधर्म्यादुदा
हरणत्वं तर्हि प्रकृतेऽपि तदस्तीति तुल्यं यद्यपि प्रकृतेऽत्यादिवैधर्म्योदाहरणत्वनिर्वचनं । तदयुक्तं भटाः परेषां विशरारुतामगुर्दधत्यवाते
स्थिरतां हि पांसवः इति वैधर्म्यदृष्टान्तावापनात् । न ह्यत्राप्रकृतवाक्यार्थः स्वव्यतिरेकमाक्षिपति किं त्वप्रकृतवाक्यार्थ एवेति दिक् ॥ ॥
इत्यलंकारचन्द्रिकायां प्रतिवस्तूपमाप्रकरणं ४ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दृष्टांतालंकारं लक्षयति चेदिति वाक्ययोरित्यनुवर्त्तते धर्मयोरित्यध्याहार्यं तदिति तदित्यर्थकं अर्थतो व्याचष्टे यत्रेति यत्र काव्ये तथा चोपमानोपमेयवाक्या
र्थघटकधर्मयोर्बिंबप्रतिबिंबभावो दृष्टांत इति लक्षणं काममिति अनेन प्रकृतराजविशेषेण राजन्वती शोभनराजवती राजन्वान् सौराज्ये इति निपातः
।नक्षत्राण्यश्विन्यादीनि सप्तविंशति ताराः तदितराः गोबलीवर्दन्यायात् ग्रहा भौमादयः संकुला व्याप्ता ज्योतिष्मतीति प्राशस्त्ये मतुप् अत्र राजन्वती
ज्योतिष्मती त्वनयोर्बिंबप्रतिबिंबभावः पूर्वोदाहरणे कीर्त्तिकांत्योर्बिंबप्रतिबिंबभावप्रयोजकमनोहारित्वरूपसादृश्यमाश्रित्य राजज्योतिषोः प्राशस्त्य

चेद्बिंबप्रतिबिंबत्वं दृष्टांतस्तदलंकृतिः त्वमेव कीर्तिमान राजन्विधुरेव हि कांतिमान् ४६ यत्रोपमानोपमेयवाक्ययोर्भिन्नावेव धर्मौ बिं
बप्रतिबिंबभावेन निर्दिष्टौ तत्र दृष्टांतः त्वमेव कीर्तिमानित्यत्र कीर्तिकांत्योर्बिंबप्रतिबिंबभावः यथा वा काममस्तु नृपाः संति सहस्रशो
ऽन्ये राजन्वतीमाहुरनेन भूमिं नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चंद्रमसैव रात्रिः यथा वा देवीं वाचमुपासते हि बहवः सारं
तु सारस्वतं जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः अब्धिर्लंघित एव वानरभटैः किं त्वस्य गंभीरतामापातालनिमग्नपीव
रतनुर्जानाति मंथाचलः ५ ॥ ॥

रूप्यं तच्छायामिति भेदः देवीमिति देवीं वाचं सरस्वतीं बहवः उपासते हि सेवंते एव हि शब्दस्यैवकारार्थत्वात् तु परं सरस्वती संबंधि सारं असौ प्रसिद्धः गुरुकुले क्लि
ष्टः अध्ययनश्रमवान् मुरारिनामा कविर्नितरामतिशयेन जानीते अत्र दृष्टांतमाह वानररूपैर्भटैर्योधैरब्धिर्लंघित एव किं तु अस्याब्धेर्गंभीरतां पाता ॥
लपर्यंतं निमग्ना पीवरा स्थूला तनुर्यस्यैवंविधो मंथाचलः मंदराद्रिरेव जानातीति ५ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु॰नं॰ दृष्टांतोदाहरणात्वासंगतिमाशंकते नन्विति वाक्ययोरितिसप्तमी एकधर्मेत्यनंतरं शब्दभेदेन निर्दिष्ट इति शेषः सागरेत्यादि सागरस्याधस्तनो योऽव
३७ धिरिति गंभीरतापदार्थकथनं संस्पर्शस्तस्य लक्षणया ज्ञानात्यर्थ इति बोध्यं तथाच धर्मभेदान्न प्रतिवस्तूपमा किंतुसारस्वतहारज्ञान सागराधस्तना
ऽवधिसंस्पर्शयोर्बिंबप्रतिबिंबभावाद्दृष्टांतालंकार एवेत्याशयः तर्हि संयुद्ममालोपं वर्षत्येषा चारवर्वरीतिवत्पदावृत्तिदीपकस्यादित्याशंकासमाधत्तेऽत्रे
ति पूर्ववत् अर्थावृत्तिप्रतिवस्तूपमयोरिव प्रस्तुताप्रस्तुतेति दृष्टांतः प्रस्तुताप्रस्तुतविषयः पदावृत्तिस्तुदत्यतरमात्रविषयेत्यर्थः यद्यप्य
त्रात्मनेपदपरस्मैपदभेदेन पदभेदान्न पदावृत्तिशंकोचिता तथापि पाठपरिवर्तनेन पदाभेदेऽपि न पदावृत्तेरयं विषय इति बोधयितुमेतदुक्तं अथ दृष्टांतः

नन्वत्रोपमानोपमेयवाक्ययोर्ज्ञानमेक एव धर्म इति प्रतिवस्तूपमायुक्ता नैवं अचेतने मरुत्यास्त्वे ज्ञानस्य बाधितत्वेन तत्र ज्ञा
नातीत्यनेन सागराधस्तलावधिपर्यंतसंस्पर्शमात्रस्य विवक्षितत्वात् दृष्टांतोदाहरणे पदावृत्तिदीपकाद्विशेषः पूर्ववत्प्रस्तुताप्रस्तु
५५ तविषयत्वकृतो द्रष्टव्यः वैधर्म्येणाप्ययं दृश्यते कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः तमांसि तिष्ठंति
हि तावदंशुमान्न यावदायात्युदयाद्रिमौलितां ६॥

कृतंचेति नृपं प्रति मंत्रिण उक्तिः हे राजन्त्वया मनो गर्वस्याभिमुखं न तु गर्वितं कृतं च किमन्यदपेक्षितमिति शेषः एवं शास्त्रप्रयोगादिकं विनाऽस्मा
कं द्विषः शत्रवो निहताश्च तत्र निदर्शनं अंशुमान्सूर्यो यावदुदयाद्रेर्मौलितां शिरोलंकारतां नायाति तावदेव तमांसि तिष्ठंति तस्मिंस्तु तथा
भूते न तिष्ठंतीति दृष्टांतः अत्र मनोगर्वाभिमुखीकरणवैरिहननयोरंशुमदुदयावलंबनाकाताऽगमनतमस्थित्योश्च यथाक्रमं वैधर्म्येण बिंबप्रति राम॰
बिंबभावः॥ ॥इत्यलंकारचंद्रिकायां दृष्टांतालंकारप्रकरणं ६॥ ॥ ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निदर्शनां लक्षयति वाक्यार्थयोरिति सदृशवाक्यार्थसंबंधीयऐक्यारोपः उपमेयवाक्यार्थे उपमानवाक्यार्थाभेदारोप इति यावत् यद्दातुरिति दातुः सौ
म्यतेति यत्तदिति सामान्ये नपुंसकं सेयमिति विधेयाभिप्रायकं स्त्रीलिंगं यत्तद्भ्यामिति यद्यपि मुखं चंद्र इतिवत्तदातुः सौम्यता पूर्णेंदोरकलंकतेत्यो
तावतापि ऐक्यारोपः संभवति तथापि यत्तद्भ्यां शीघ्रस्फुरत्तया तदवगमात्तदुपन्यासः अरालेति अबुधो मूर्खो जनः सेवितो यदिति गुणीभूतसेवनक्रियाप
रामर्शः उत्तरवाक्यगतेन यच्छब्देन तच्छब्दाक्षेपात् तत् अरालपदादितं कृतमित्यन्वयः उद्वर्तनं यवगोधूमादिचूर्णेन मलापकर्षणं स्थले निर्जलेप्रदे
शे अब्जं जलजं ऊषरे अंकुरारोपणं क्षारभूभागे प्रसूनः पुष्पस्तबकं अवनामितं अज्ञतासंपादनायत्नः स्त्रीकृतं बधिरस्य कर्णेजपं एकजायः प्रलापः इ

वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना यद्दातुः सौम्यता सेयं पूर्णेंदोरकलंकता ॥ अत्र दातृपुरुषसौम्यत्वस्य उपमेयवाक्यार्थस्य
पूर्णेंदोरकलंकत्वस्योपमानवाक्यार्थस्य च यत्तद्भ्यामैक्यारोपः यथा वा अरालपदादितं कृतं शवशरीरस्य हर्तितं स्थले जलमब्जरोपितमूष
रे वर्षितं प्रसूनस्तबकमवनामितं बधिरकर्णजापः कृतो धृतोऽंधमुखदर्पणो यदबुधो जनः सेवितः अत्राबुधजनसेवायाः अरालपदादितादीनां च यै
त्तद्भ्यामैक्यारोपः पदार्थवृत्तिमप्येके वदंत्यन्यां निदर्शनां त्वन्नेत्रयुगलं धत्ते लीलां नीलांबुजन्मनोः अत्र नेत्रयुगले नीलांबुजगतलीलापदार्था नीलो ४
रोपो निदर्शना यथा वा वियोगे गौडनारीणां यो गंडतलपांडिमा अदृश्यत स खर्जूरीमंजरीगर्भरेणुषु पूर्वास्मिंस्तु दाहरणे उपमेये उपमा
नधर्मारोपः इह तूपमाने उपमेयधर्मारोप इति भेदः १॥ ॥

त्यर्थः अंधस्य मुखे तत्स्य मुखं दर्पणो धृत इत्येवं निरर्थकत्वेन सदृशानामनेकेषां वाक्यार्थानामबुधजनसेवनरूपप्रकृतवाक्यार्थे ऐक्यारोपः पूर्वत्र त्वेकस्यैवैक्या
रोप इति विशेषः निदर्शनांतरमाह पदार्थेति पदार्थवृत्तिं पदार्थसंबंधिनीं एके आलंकारिकाः अन्यां पूर्वोक्तविलक्षणां त्वन्नेत्रेति लीलां शोभां नी
लांबुजन्मनोः नीलोत्पलयोः वियोग इति गौडदेशगतानां नारीणां वियोगे स्वकांतवियोगकाले यो गंडतलपांडिमा पांडुवर्णो भवति सः खर्जूरीणां
लतानां मंजरीगर्भस्थरेणुषु अदृश्यत दृष्ट इत्यन्वयः १॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ उपमानेयथोक्तरीत्युपमेये उपमेयेउपमानधर्मारोपएवपदार्थनिदर्शनायाः प्राचीनैरुदाहरणात्कथमियंपदार्थनिदर्शनेत्युच्यत इतिशंकायामाह उभयत्रेति
३८ उपमेयेउपमानधर्मारोपे उपमानेउपमेयधर्मारोपेचेत्यर्थः तथाचौपम्यपर्यवसायित्वस्यैवपदार्थनिदर्शनाजीवातुत्वेनारोपविषयस्योपमेयत्वेनानिवेशे
प्रयोजनाभावादिहापिसायुज्यैवेतिभावः नन्वेवंसतिवाक्यार्थनिदर्शनालक्षणस्यात्राव्याप्तिरित्याशंकाशयुवानाह यद्यपीति वियोगकालीनगौड
नारीगंडतलपाण्डिम्नः स्वर्णरीमंजरीगर्भरेणुदृष्टपाण्डिम्नश्चयत्रऐक्यारोपसत्वादितिभावः अर्थविशेषविवक्षयातिव्याप्तिपरिहरणेनत्याभि

उभयत्राप्यन्यधर्मस्यान्यत्रासंभवेनतत्समानधर्माक्षेपादौपम्यपर्यवसानंतुल्यं इयंपदार्थवृत्तिनिदर्शनाललितोपमे
तिजयदेवेनव्याहृता यद्यपिवियोगेगौडनारीणामितिश्लोकः प्राचीनैर्वाक्यार्थवृत्तिनिदर्शनायामुदाहृतस्तथापिवि
शिष्टयोःधर्मिणोःरैक्यारोपोवाक्यार्थवृत्तिनिदर्शना उपमानोपमेययोरन्यतरस्मिन्नन्यतरधर्मारोपःपदार्थवृत्तिनिद
र्शनेतिव्यवस्थामाश्रित्यास्माभिरिहोदाहृतः १॥॥

मतंनिदर्शनाद्वयविषयविभागंदर्शयति तथापीति विशिष्टयोःविंबप्रतिविंबभावापन्नधर्मविशिष्टयोः एवंचवाक्यार्थशब्देनैतादृशार्थविवक्षणा
हियोगइत्याद्युदाहरणेनातिव्याप्तिरितिभावः उपमानेत्यादि एतच्चस्वरूपकथनं नत्वेवंरूपेणलक्षणेनिवेशः ताद्रूप्यरूपकातिव्याप्तिवारणा
योपमाकल्पकत्वस्यारोपविशेषणस्यावश्यकत्वेनउपमाकल्पकत्वात्तदन्यधर्मारोपइत्येतावतएवलक्षणस्यनिर्दुष्टत्वात् तदुक्तं अभवन्वस्तु रा॰म॰
संबंधउपमापरिकल्पकइति ताद्रूप्यरूपकेतुताद्रूप्याविच्छिन्नाभेदएवविवक्षितोनतुनरूपमेतितद्वारणम् १॥ ॥ ३८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नन्वत्र विषमतीत्याद्युदाहरणे काऽपि निदर्शना नस्यात् अन्यधर्मस्यान्यत्रानारोपणात् एकवाक्यत्वेन वाक्यार्थभेदाभावाच्च पदार्थवाक्यार्थनिदर्शनयोरन्यतरस्या
दित्याशंक्याह एवं चेति उक्तव्यवस्थास्वयंगोचेत्यर्थः विशिष्टयोरिति विंबप्रतिविंबभावापन्नवस्तुविशिष्टयोरित्यर्थः तत्रतावत्प्रथमपद्ये भोः शिवत्रस्याद्भार्थि
तानां दातारि त्वयि सति इतरं क्षुद्रं प्रभुमनुसरतो ऽर्थिनः क्षुद्रां चिन्तां दर्शयन्तो वयं कामधेनौ स्थितायां दोग्धुकामाः स्वरभयोः पाश्चात्ययोश्चरणयोः पातैर्दुग्धे हे दुःखेन
यास्यंकरभमुग्रश्रिमनुसरामः इत्यर्थे केसकलकामदमहेश्वरकालीनक्षुद्रधनिकानुसरणकर्तुः कामधेनुस्थितिकालीनंतथाविधकरभानुसरणकर्तुश्चैक्या
रोपः तत्रोपमानकोटिविशेषणयोः कामधेनुकरभयोरुपमेयकोटिविशेषणयोश्च महेश्वरक्षुद्रधनिकयोर्यथाक्रमं विंब[illegible]प्रतिविंबभावो बोध्यः एवमनुसरण

एवंच त्वयि सति शिवदातर्यस्मद्भ्यार्थितानामितरमनुसरंतो दर्शयंतोऽर्थिषु क्षुद्रां चरमचरणपातैर्दुग्धे हे दोग्धुकामाः करभमनुसरामः कामधे
नौ स्थितायां दोर्भ्यामखिं तितीर्षंतस्तत्क्षुद्रस्तुहरणांगेव इत्यादौ वाक्यभेदाभावेपि वाक्यार्थद्वयस्यैव निदर्शना विशिष्टयोरैक्यारोपसद्भावात्
वाक्यार्थयोः सदृशयोरिति लक्षणवाक्ये वाक्यार्थशब्देन विंबभावापन्नवस्तुविशिष्टरूपयोः प्रकृताप्रकृतधर्मिणोर्विवक्षितत्वात् एवंच
राजसेवामनुष्याणामसिधारावलेहनं पंचाननपरिष्वंगो व्यालीवदनचुंबनं इत्यत्र प्रकृताप्रकृतहेत्वंतयोरैकपदोपात्तत्वेपि वाक्या
र्थद्वयनिदर्शनायानक्षतिः तयोर्विंबप्रतिविंबभावापन्नवस्तुविशिष्टव्यापाररूपत्वादिति ३॥ ॥

योरपि एवं दोर्भ्यामित्यत्रापि ऋक्षिगुणसमूहयोर्विंबप्रतिविंबभावो बोध्यः नन्वियं व्यवस्थानुपलभ्यत इत्याशंक्याह वाक्यार्थयोरिति नन्वाक्यार्थशब्दस्या[?]
तरवाक्यार्थसाधारणमेकपदार्थपात्वेनेतोक्तोदाहरणसंग्रहसंभवादेतेविधशब्दस्यान्यत्रार्थपरत्वेन युक्तमित्यत आह एवंचेति एवंविधार्थविवक्षणे चेत्यर्थः
असिधारावलेहनं जिह्वयाघट्टनं पंचाननः सिंहस्तस्य परिष्वंगआलिंगनं व्यालीभुजंगी आशुकारित्व बलवदनिष्टजनकत्वंच साधारणो धर्मः प्रकृतहेत्वंतोराज
सेवा निदर्शनायाः तत्त्वक्षणस्य नक्षतिः नाव्याप्तिः तयोः प्रकृताप्रकृतहेत्वंतयोः असिधारादिभिः समं राज्ञोविंबप्रतिविंबभावान्नहि विशिष्टयोरैक्यारो

प्रदीपः ७ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रं.न. एवं तर्हि सदृशयोरैक्यारोपस्त्वेवलक्षणामस्त्विति शंकामाह अत एवेति एतादृशविशेषणाविवक्षणादेवेत्यर्थः भेदो वास्तु तिः तथा च तदभावे रूपकेति प्रसंगः स्या
दिति भावः कथमनेनैतद्गम्यतेत्याह रूपके हीति अविशिष्टयोः बिंबप्रतिबिंबभावापन्नत्वस्य विशिष्टयोः बिंबप्रतिबिंबभावापन्नत्वस्य चाप्रतीतेर्दर्शय
३९ ति अंघ्रिदंडइत्यादि बलेर्दैत्यविशेषस्य रोधने बंधने कर्त्तव्ये ऊर्ध्वमुत्क्षिप्तो हरेरंघ्रिदंडो वो युष्माकं मुदे अस्त्विति संबंधः कीदृशः विधेर्ब्रह्मणो विष्टरस्या

अत एव निदर्शनाया रूपकाद्भेदः रूपके ह्यविशिष्टयोरेव शशिवक्त्रादिकयोरैक्यारोपः अंघ्रिदंडो हरेरूर्ध्वमुत्क्षिप्तो ब
लिनिग्रहे विधिविष्टरपद्मस्य नालदंडो मुदेस्तु वः इति विशिष्टरूपकोदाहरणेपि न बिंबप्रतिबिंबभावापन्नवस्तुविशि
ष्टता विधातृविष्टरकमलशिलिष्टत्वरूपसाधारणधर्मवत्त्वप्रतिपादनार्थमेव तत्र विशेषणोपादानात् यद्वातुः सौम्यते
त्यादिनिदर्शनोदाहरणे दातृप्रोर्णोहादीनामानंदकरत्वादिनैवात्र विशेषणयोर्बिंबप्रतिबिंबभावाभावात् ४ ॥ ॥

सनंतद्रूपस्य पद्मस्य नालदंड इत्यर्थः विशिष्टरूपकेति ऊर्ध्वोत्क्षिप्तत्वविशिष्टांघ्रिदंडविधिविष्टरपद्मसंबंधित्वविशिष्टनालदंडसंबंधि रूपकेत्यर्थः
॥ विशेषणेति ऊर्ध्वोत्क्षिप्तत्वरूपोपमेयविशेषणविधिविष्टरपद्मसंबंधित्वरूपोपमानविशेषणयोरित्यर्थः एवकारस्तु चितेबिंबप्रतिबिंबभावव्य राम:
तिरेकं स्फुटयति यद्वातुरिति अभावादिति सादृश्यभावादिति भावः ४ ॥ ॥ ॥ ३९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रूपकविशेषेऽतिव्याप्तिमाशंक्य परिहरति यत्रेत्यादिना । यत्रेति । तस्य इति सावयवरूपकोदाहरणे इत्यर्थः । तत्रैतान्वयः । विषयविषयिविशेषणानां आ-
रोपविषयारोप्यमाणसंबंधिनो विशेषणानां ज्योत्स्नेति इयं रात्रिरेव कापालिकी द्वीपान्तरं भ्रमतीत्यन्वयः एतत्प्रधानरूपकं एतदंगभूतान्यपराणि वि-
शेषणे इति पाद्यन्ते । यथा ज्योत्स्नारूपेण भस्मना च्छुरणमंगलेपस्तेन धवला । तारकारूपाण्यस्थीनि बिभ्रती अन्तर्धानस्य व्यसने कौतुके रसिका ।
चन्द्ररूपे मुद्राकपाले न्यस्तं लांछलेन मिसेण सिद्धांजनस्य परिमलं चूर्णं दधती धारयन्ती दीक्षाकालगृहीतोपकरणे मुद्रे इति पदप्रतान्नायाः संज्ञानां व्यवहा-
र इति चण्डीदासः मुद्रापरिमलशब्दौ प्रशंसार्थाविन्यन्ये । मुद्राचिह्निते रूपे कपाल इत्यर्थः । विषयविषयिणोः रात्रिकापालिक्योः तद्विशेषणानां त-

यत्र तु विषयविषयिविशेषणानां परस्परसादृश्येन बिंबप्रतिबिंबभावोक्तिः ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थीन्यन्तर्धान-
व्यसनरसिका रात्रिकापालिकीयं द्वीपाद्द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले न्यस्तं सिद्धांजनपरिमलं लांछनस्य च्छलेनेति सावयवरूपको-
दाहरणे तत्रापि विषयविषयिणोस्तद्विशेषणानां च प्रत्येकमेवैक्यारोपः न तु ज्योत्स्नादिविशिष्टरात्रिरूपविषयस्य भस्मादिविशिष्टका-
पालिकीरूपविषयिणा सह विशिष्टरूपेणैक्यारोपोऽस्ति तस्माद्राजसेवामनुष्णां राजनित्यादावपि वाक्यार्थवृत्तिनिदर्शनेति युक्तं मतान्त-
रे त्विह पदार्थवृत्तेरेव निदर्शनया भाव्यं ॥

त्संबंधिनां ज्योत्स्नाभस्मादीनां यथाक्रमेण । रात्रिकापालिकीति समासस्योत्तरपदार्थप्रधानत्वात् ज्योत्स्नादीनां रात्रिविशेषणत्वाभावादसंगतेः प्रत्येक-
मेवेति शुद्धस्वरूपेणैवेत्यर्थः न त्विति उक्तयुक्त्या विशेषणत्वाभावादिति भावः । विशिष्टेति भस्मादेः कापालिकीं प्रत्यपि विशेषणत्वमपि तद्गतको-
टिनिविष्टत्वमेवेत्यपि बोध्यं । वाक्यार्थेत्यादि । अस्य बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टार्थपरत्वमंगीकृत्य राजसेवेत्युदाहरणे वाक्यार्थवृत्तिनिदर्शना-
त्वमुपसंहरति तस्मादिति उक्तलक्षणस्य व्यवस्थितत्वादित्यर्थः । मतान्तरे त्विति सदृशयोर्वाक्यार्थयोरैक्यारोप इति यथाकृतलक्षणाङ्गीक-
र्तृमते इत्यर्थः । इह राजसेवेत्युदाहरणे पदार्थवृत्त्यैवेति । उपमाकल्पकत्वकल्पनार्थे अपरपदार्थान्तर्धर्मान्तरारोप इति तल्लक्षणस्य तदभिमतत्वादि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कृ॰नं॰ ४० निदर्शनांतरमाह अपरामिति पूर्वविलक्षणामित्यर्थः निदर्शनामित्यनुषज्यते क्रियया सत्सदर्थयोर्बोधनमपरां निदर्शनां प्राहुरिति संबंधः सदसदर्थयोरिति वक्तव्ये
पिछंदोऽनुरोधादित्थमभिधानं सत्पदप्राधान्यं ह्रत्यादिसो उनिर्देशो न पूर्वनिपाताद्विधेरनित्यत्वज्ञापनात् लक्षणं वाचष्टे॰ कस्यचिदिति अज्ञातस्य सतोऽसतो वेति विभा
गकथनं तत्तल्लक्षणांतर्गतं उदासीनार्थबोधने चमत्कारित्वाभावेनैवानतिप्रसंगात् स्वक्रियया सहकारिभूतया क्रियाविशिष्टस्य वक्तुः संबंधि अर्थस्य बोधनं बो
धो उन्नलो व्यापारो यत्र विधीयते वर्ण्यते सा निदर्शनेति लक्षणं अथ निवातपद्मोदरसोदराभ्यां विलोचनाभ्यामवलोकयंती न केवलं मुनिमनो भवेपिद्य नाकिकं
चित्तपक्षः प्रभावमित्यादावतिव्याप्तिः अवलोकनक्रियाविशिष्टया कामिन्यातपः प्रभावबोधनस्य वर्णनादिति चेत् न क्रियवेत्यनेन दृष्टांतविधया बोधनस्य विवक्षि

अपरां बोधनं प्राहुः क्रियया सत्सदर्थयोः नृपेणाज्ञाविरोधीतिक्षीणं चंद्रोदयेन तमः ४८ उदयन्नेव सविता पद्मेष्वर्पयति श्रियं विभावयन्स
मृद्धीनां फलं सुहृदनुग्रहे ४९ कस्यचित्किंचित्क्रियया विशिष्टस्य स्वक्रियया परान्प्रत्यसतः सतो वार्थस्य बोधनं यत्र विधीयते तदपरां निदर्श
६ नामाहुः असदर्थबोधने उत्तरार्द्धमुदाहरणं तत्र नृपेणेति बोधयदिति वक्तव्ये बोधयदित्यस्य गम्यमानत्वात् अप्रयोगः ततश्च राज्ञा चंद्रेण
सं विरुध्यत्स्वयं नाशक्रियया विशिष्टं तमः स्वकीयनाशक्रियया दृष्टांतभूतया अन्योप्येवं राजविरुद्धश्चेन्नृपेदित्यनिष्टपर्यवसायिनमर्थं बो
धयदेव नष्टमिति निबंधनादसदर्थनिदर्शना तथा उत्तरश्लोके सविता स्वोदयसमय एव पद्मेषु लक्ष्मीमादधानस्तया पद्मलक्ष्म्याधानक्रिय
या परान्प्रति समृद्धीनां फलं सुहृदनुग्रह एवेति श्रेयस्करमर्थं बोधयन्निबद्ध इति सदर्थनिदर्शना ६ ॥ ॥

तत्वात् उक्तोदाहरणे च लिंगविषयाबोधकत्वेन तदभावात् इत्थं च दृष्टांततया क्रियाविशिष्टस्यार्थबोधकत्वं वर्ण्यमानं निदर्शनेति पर्यवसितं नृपेणेत्यत्र बोध
नस्यावर्णनात्कथमुदाहरणत्वमत आह तत्रेति उदाहरण इत्यर्थः लक्ष्ये लक्षणं संगमयति ततश्चेति बोधनस्य गम्यमानत्वाच्चेत्यर्थः दृष्टांतभूतयेति दृष्टां
ते स्वस्मिन्भूतया विद्यमानयेत्यर्थः दृष्टांतो भूतः संजातोऽस्यामिति वा एवं तमोवत् चंद्रस्यापि राजत्वं सोमोऽस्मै ब्राह्मणानां राजेत्यादिश्रुतिप्रसिद्धं अनिष्टपर्यव सम॰ ४०
सायिनमर्थं नाशरूपानिष्टसाधनं राजविरुद्धत्वरूपमर्थं ६ ॥ ॥ ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उन्नतमितियोलघुरल्पबुद्धिरल्पपरिमाणश्च सः उन्नतं पदं उत्कर्षं उच्चस्थानं चावाप्य हेलयैव पतेदिति ब्रुवन्कथयन् शैलशेखरगतो गिरिमस्तकवर्ती दृषत्कणः जलबिंदुसमूह श्चारुणा मंदेनापि मारुतेन धुतः कंपितः अधः पतति उत्कर्षाद्धीयते अधोदेशे च पततीत्यर्थः ध्रुवमिति पाठे बोधनस्य पूर्ववन्मुख्यमानत्वाद ध्रुवप्रयोगः दृषत्कणा इति पाठे पाषाणकणा इत्यर्थः चूडेति यः उदयाचलः आगतं देवं रविं चूडामणेः पदे स्थाने मस्तके धत्ते धारयति किं कुर्वन् गृहमेधिनः गृहस्थान् सतामातिथ्यं कार्यमिति बोधयन् आतिथेयी आतिथ्य अत्र उक्तनिदर्शनात्रयविषये केचिदित्थमिति व्यवहरंतीत्यनेनान्वयः धर्मिणोरिति धर्मसाम्यमात्रेणाचमत्कारान्निष्पन्नेत्तत्कृतविंवप्रतिविंवभावेन

यथा वा उन्नतंपदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् शैलशेखरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः अत्र गिरिशेखरगतदृषद्बिंदु करणो मंदमारुतमात्रेणापितः पतन् लघोरुन्नतपदप्राप्तिः पतनहेतुरिति सदर्थं बोधयन्निव दृश्यत इत्यसदर्थनिदर्शना चूडामणिपदे धत्ते यो देवं रविमागतं सतां कार्यातिथेयीति बोधयन् गृहमेधिनः अत्र समागतरविशिरसा संभावयन् उदयाचलः स्वनिष्ठया रविधारणक्रियया समागतानां सतामेवं गृहमेधिभिरातिथ्यं कार्यमिति सदर्थं बोधयन्निव दृश्यत इति सदर्थनिदर्शना अत्र केचिद्वाक्यार्थवृत्तिपदार्थवृत्तिनिदर्शनाद्वयमसंभवद्वस्तुसंबंधनिबंधनमिति तृतीयां तु संभवद्वस्तुसंबंधनिबंधनेति व्यवहरंति तथाहि आद्यनिदर्शनायां वाक्यार्थयोरैक्यमसंभवन्नेयोः साम्ये पर्यवस्यति द्वितीयनिदर्शनायामपि अन्यधर्मोऽन्यत्रासंभवन् धर्मिणोः साम्ये पर्यवस्यति तृतीयनिदर्शनायां तु स्वक्रियया परान्प्रति सदसदर्थबोधनं संभवदेव समतां गमीकरोति बोधयन् गृहमेधिन इत्यादौ कारीषोऽग्निरध्यापयतीतिवत्समर्थाचरणे णिचः प्रयोगः तत्र च यथा कारीषाग्निः शीतापनयनेन बटूनध्ययनसमर्थीकरोति एवं वर्ण्यमानः पर्वतः स्वयमुपमानभावेन गृहमेधिन उक्तबोधनसमर्थान्कर्तुं क्षमते यथाऽयं पर्वतः समागतरविशिरसा संभावयति एवं गृहमेधी समागतं सन्तमतिथिपूजया संभावयेदिति अतः संभवतीति बोधनसंबंध इति ७ ॥ ॥

धर्मिणोः साम्यावगतिरिति भावः गमीकरोतीति स्वविशेषणत्वेन स्वीकरोतीत्यर्थः दृष्टांततया बोधनस्यैव तन्त्रविवक्षितत्वात् एतदेवोपपादयति बोधयन्नित्यादिना कारीषेत्यत्र क्रुगोमयं तत्साध्यं कारीषः समर्थाचरणे समर्थकरणे सामर्थ्यात्तादनद्रितिप्रावत् भावप्राधान्यात् उपमानभावेन दृष्टांतत्वेन एवं प्रदर्शिते निदर्शनात्रये निदर्शनापदप्रवृत्तिनिमित्तस्यैकस्याभावान्नानार्थ एव निदर्शनाशब्द इति बोध्यं ७ ॥ ॥ इत्यलंकारचंद्रिकायां निदर्शनाप्रकरणं ॥ ७ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ व्यतिरेकं लक्षयति व्यतिरेक इति विशेषो वैलक्षण्यं तूपमेयस्याधिक्यं उत्कर्षः पल्लवत इति पंचम्यर्थे तसिः कल्पतरोः पल्लवतः पल्लवादेशवृद्ध्यमाणस्ते तव करस्य
४१ विशेष इति संबंधः एकः पल्लवः परो हस्तः कर्णशिरोधेयं तिरस्कुरुते दानातिशयेनेति भावः अत्रोपमेयस्य करस्योत्कर्षः प्रथमोदाहरणे उक्तः तत्तेनोपमेयाहं इह तु रक्तत्व
कोमलत्वादिगुणयुक्तत्वं दर्शनीयमिति भेदः तत्र न तत्रेति उपमेयगतं तत्वमित्यर्थः रक्तस्त्वमिति अशोकवृक्षं प्रति विरहिणः कस्यचिदुक्तिः हे अशोक आवयोः सर्वं तुल्यं हमा
तं अहं केवलं धात्रा विधात्रा सशोकः शोकसहितः कृतः त्वं तु शोकराहित इत्यशोकपदस्वरसादवगम्यते किं तत्सर्वं समानं तत्राह रक्त इत्यादि त्वं तु नूतनैः पल्ल
वैः रक्तः रक्तवर्णः अहमपि प्रियायाः श्लाघनीयैर्गुणैः सौंदर्यादिभिः रक्तोऽनुरक्तः अथ त्वां प्रियायां हे सखे त्वां प्रति शिलीमुखा भ्रमरा आयान्ति मां प्रत्यपि स्मरेण ध
नुषा मुक्ताः प्रेरिताः शिलीमुखा बाणा आयान्ति एवं कान्तायाः पादतलस्याघातो यथा तव मुदे संतोषाय तद्वन्ममापि संतोषायेत्यर्थः कामिनीपादा

व्यतिरेको विशेषश्चेदुपमानोपमेययोः शैला इवोन्नताः संतः किंतु प्रकृतिकोमलाः ५५ अयमुपमेयाधिक्यपर्यवसायी व्यतिरेकः यथा वा पं
ल्लवतः कल्पतरोरेष विशेषः करस्य ते वीर भूषयति कर्णमेकः परस्तु कर्णं तिरस्कुरुते न्यूनत्वपर्यवसायी यथा रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः
प्रियाया गुणैस्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः सर्वं तुल्यमशोक केवलमहं
धात्रा सशोकः कृतः ८ अनुभयपर्यवसायी यथा दृढतरनिबद्धमुष्टेः कोषनिषण्णस्य सहजमलिनस्य कृपणस्य कृपाणस्य च केवलमाकारतो भेदः ९

घातेनाशोकस्य पुष्पोद्गम इति कविप्रसिद्धिः अत्रोपमेयस्य सशोकत्वेनापकर्षः ८ अनुभयपर्यवसायी उपमेयोत्कर्षापकर्षान्यतरपर्यवसानरहितः दृढतरे
ति कृपणस्य कृपाणस्य खङ्गस्य च आकारतः दीर्घवर्णात् आकृतेश्च केवलं भेदो वैलक्षण्यं प्रकारांतरेण तु साम्यमेवेत्यर्थः कथं तत्राह दृढतरेत्यादि दृढत
रं निबद्धो मुष्टिर्येन इति कृपणपक्षे धनव्यये शृंखलेन मुष्टिमोचनाभावात् खङ्गपक्षे तु दृढतरं निबद्धः संबद्धो मुष्टिर्मुष्टिग्राह्यभागो यस्येत्यर्थः कोशो भांडारगृ
हं तत्र निषण्णः उपविष्टः कृपणः कोशे पिधानके निषण्णः स्थित इति खङ्गपक्षे सहजमलिनः स्वभावमलिनः मलिनवेषत्वात् कृपणः खङ्गस्तु कृष्णवर्ण
त्वादिति एवं च कैश्चिद्धर्मैः प्रयुक्तसाम्यवत्तया प्रतीयमानयोः किंचिद्धर्मप्रयुक्तं वैलक्षण्यं व्यतिरेकशरीरं वैलक्षण्यं तु क्वचिदुपमेयस्योत्कर्षे क्वचित्तदप राम॰
कर्षे पर्यवसन्नं क्वचित्तु तदन्यतरपर्यवसानविरहेऽपि स्वदैविच्यमात्रविश्रांतमिति बोध्यं एतेन चरमभेदस्य तदुदाहरणस्य च दूषणं कस्यचिदपास्तं रमणीयमिव भा ४१
समानं प्रत्युक्तं वेदितव्यं अत्यंताश्चारतया तु नानुवादमर्हतीत्युपरम्यते इत्यलंकारचंद्रिकायां व्यतिरेकप्रकरणं ९॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहोक्तिरिति लक्ष्यनिर्देशः सहभावइत्यादि लक्षणं सहभावः साहित्यं जनरंजनः सहृदयजनाह्लादकः एतंच चमत्कृतिजनकं साहित्यं स
होक्तिरितिलक्षणं दिगंतमिति तस्यराज्ञः कीर्त्तिः प्रत्यर्थिभिः शत्रुभिः सह दिगंतमगमदित्यन्वयः अत्रच तृतीयायानिरूपितत्वार्थकतया
प्रत्यर्थिनिरूपितसाहित्यवती कीर्त्तिर्गमनाश्रयइतिबोधे एकधर्मान्वयित्वरूपसाहित्यबलात्प्रत्यर्थिनामपिगमनान्वयप्रतीतिः तदुक्तं सा सहो
क्तिः सहार्थस्यबलादेकं स्याद्वाचकमिति छायेति ग्रीष्मर्त्तौमध्याह्नवर्णनमिदं छायायांथैर्यधर्मैः समं सार्द्धं विटपिनां तरूणांतलंमूलप्रदेशं सं
श्रयते कुतइत्याकांक्षायामुत्प्रेक्षते श्रांतेवेति श्रमस्य आतपातिशयकृतो बोधः एवमग्रेपि जडता शीतलता ग्लानेव सरोजलस्य मूलमधोदेशं म

ले २

सहोक्तिः सहभावश्चेद्भासते जनरंजनः दिगंतमगमत्तस्य कीर्त्तिः प्रत्यर्थिभिः सह ५१ यथावा छायासंश्रयते तलं विट
पिनां श्रांतेव पांथैः समं मूलं याति सरोजलस्य जडता ग्लानेव मीनैः सह आचामत्यहिमांशुदीधितिरपः तप्तेव लोकैः समं
निद्रा गर्भगृहं सह प्रविशति क्लांतेव कांताजनैः जनरंजनइत्युक्तेः अनेनसार्द्धं विहरांबुराशेरित्यादौ न सहोक्तिरलंकारः १०॥

नैर्मत्स्यैः सहयाति गच्छति ग्लानिर्बलापचयः तथाअहिमाउष्मांशवः करायस्यैवंभूतस्य रवेर्दीधितिस्तप्तेव संतप्तेव सती लोकैः समं अपः जलानि
आचामति पिबति दीधितिः स्त्रियामित्यमरः निद्रा क्लांतेव सती कांताजनैः सह गर्भगृहं अभ्यंतरगृहं प्रविशति तदेवं तत उक्तवान् क्लांतिस्तेजोहानिः
सौकुमार्यातिशयेन तत्सौलभ्यात् क्लांतेत्युपादानं इत्यादाविति इंदुमती स्वयंवरे रघुवंशे अनेनसार्द्धं विहरांबुराशेस्तीरेषु तालीवनमर्मरेषु द्वीपांतरा
नीतलवंगपुष्पैरपाकृतस्वेदलवामरुद्भिरिति पद्ये अत्रसहोक्तेश्चमत्कारित्वाभावान्नालंकाररूपेत्यर्थः॥ ॥इत्यलंकारचंद्रिकायांसहोक्तिप्रकरणं १०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु०नं० विनोक्तिरिति किंचिद्विनाप्रस्तुतं वर्ण्यं हीनं दुष्टमुच्यते चेत्तदा विनोक्तिर्नामालंकार इत्यर्थः विद्येति विनयसंपत्तिं विना या विद्या साहृद्या मनोहरापि दुष्टेत्यन्वयः
५१ अत्र प्रस्तुता या विद्या या विनयं विना दुष्टत्वमुक्तं यश्चेति यः पुरुषः स्वात्मा स्वांतःकरणं विगर्हते निंदति रामदर्शनं विनेति रामकर्मकं रामकर्तृकं च
दर्शनं विनेत्यर्थः अंतरेणापीति विनापीत्यर्थः तथा च विनोक्तिरित्यर्थग्रहणं न तु शब्दग्रहणमिति भावः प्रकारांतरमाह तच्चेति तत्प्रस्तुतं किंचि
त विना रम्यं चेत्सापि विनोक्तिः कथ्यत इत्यन्वयः इत्थं च किंचित्व्यतिरेकेण प्रस्तुतस्य रम्यत्वारम्यत्वान्यतरवर्णनं विनोक्तिरिति प्रकारद्वयसाधा
रणं सामान्यलक्षणं बोध्यं यत्तु हृद्यो विनार्थसंबंध एव विनोक्तिः हृद्यत्वं च विनाकृतस्य वस्तुनो रमणीयत्वारमणीयत्वाभ्यां भवतीत्यर्वाचीनैरुक्तं तत्

विनोक्तिश्चेद्विना किंचित्प्रस्तुतं हीनमुच्यते विद्या हृद्यापि सावद्या विना विनयसंपदं ५१ यथा वा यश्च रामं न पश्येत्तु यं च रामो न पश्य
ति निंदितः स भवेल्लोके स्वात्माप्येनं विगर्हयेत् अत्र रामदर्शनं विना निंदितत्वं विनाशब्दमंतरेणापि प्रदर्शितं तच्चेत्किंचिद्विना रम्यं
विनोक्तिः सापि कथ्यते विना खलैर्विभात्येषा राजेंद्र भवतः सभा यथा वा आविर्भूते शशिनि तमसा मुच्यमानेव रात्रिर्नैशस्यार्चिर्हुतभु
ज इव च्छिन्नभूयिष्ठधूमा मोहेनांतर्वरतनुरियं लक्ष्यते मुक्तकल्पा गंगारोधःपतनकलुषा गृह्णतीव प्रसादं अत्र तमःप्रभृतीनि विना निशा
दीनां रम्यत्वं विनाशब्दमंतरेण दर्शितं २ ॥ ॥

दयुक्तं कारणं विना कार्योत्पत्तिकथनरूपे विभावनालंकारेतिव्याप्तेर्वारणाय विनार्थसंबंधप्रयुक्तप्रस्तुतगतरमणीयत्वादेरपि लक्षणे निवेशस्यावश्यकत्वादि
ति आविर्भूत इति विक्रमोर्वशीयमुर्वशीमूर्छाप्रगमवर्णनमिदं इयं वरतनुरंतः स्वांतःकरणे मोहेन मानावेशेन मुक्तकल्पा ईषदसंनमुक्ता लक्ष्यते केव अ
र्वरोधस्य तटस्य पतनेन कलुषा स्वच्छतरं कालुष्यापगमात् प्रसादं नैर्मल्यं गृह्णती आश्रयंती गंगेव तथा शशिनि चंद्रे आविर्भूते उदिते सति तमसा मुच्यमाना रा राम०
त्रिरिव छिन्नो नष्टः भूयिष्ठो धूमो यस्याः एवंभूता निशि भवस्य हुतभुजो वह्नेरर्चिः शिखेवेति दर्शितमिति अर्थतो बोधितमित्यर्थः ॥ ॥इति विनोक्तिप्रकरणं १ ॥ ५१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समासोक्तिं लक्षयति समासोक्तिरिति प्रकृते वर्ण्यमाने अप्रकृतस्य अप्रस्तुतवृत्तांतस्य परिस्फूर्तिश्चेत्तदा समासोक्तिरित्यन्वयः अयमिति इंद्रस्य ऐंद्री दिश
ची मुखमादिभागः वदनं च रक्तो रक्तवर्णः अनुरक्तश्च चुंबने संबंधः वक्त्रसंयोगविशेषश्च यथा अस्ततलक्षणस्य वदनस्य मासोऽस्य आवुदयमानस्य ढः कांतिमान् रक्तश्चंद्र
लः राजा हरति सर्वस्य हृदयं मृदुलैः करैरित्यादिषु कृता प्रकृतस्य श्लेषेणेति व्याप्तौ राह विशेषणसाम्यवलादिति विशेषणमात्रसाम्यवलादित्यर्थः एवं च विशेष
णमात्रसाम्यगम्याप्रकृतवृत्तांतत्वं लक्षणं बोध्यं उदाहृते श्लेषेण प्रकृतनृपवृत्तांतस्य विशेष्यवाचिनः श्लिष्टेन राजपदेनाप्यवगमान्नातिव्याप्तिः संज्ञा प्रवृ

समासोक्तिः परिस्फूर्तिः प्रस्तुते अप्रस्तुतस्य चेत् अयमैंद्रीमुखं पश्य रक्तश्चुंबति चंद्रमाः ५३ यत्र प्रस्तुतवृत्तांते वर्ण्यमाने विशेषणसाम्य तस्य १
वलादप्रस्तुतस्यापि परिस्फूर्तिस्तत्र समासोक्तिरलंकारः समासेन संक्षेपेण प्रस्तुताप्रस्तुतवृत्तांतयोर्वर्णनात् उदाहरणमयमैंद्रीति
॥ अत्र चंद्रस्य प्राचीप्रारंभसंबंधरूपे उदये वर्ण्यमाने मुखशब्दस्य प्रारंभवदनसाधारणात् रक्तशब्दस्य तद्रागकामुकसाधारणाच्चुं
बनीयस्य शक्तार्थसंबंधमात्रपरस्य शक्त्यापि तरसाधारणाच्चंद्रमःशब्दगतपुंलिंगेन ऐंद्रीगतस्त्रीलिंगेन तत्वतिपाद्येंद्रसंबंधित्वेन
चोपस्कृता परवनितासक्तपुरुषवृत्तांतः प्रतीयते १॥ ॥ चं१
दपस्तुतेः

त्रिनिमित्तमवयवार्थं दर्शयन्ति समासेनेति वचनात्प्रतिपादनात् लक्ष्ये लक्षणं संगमयति अत्रेति प्रारंभः आदिभागः साधारणपात् श्लिष्टत्वात् यद्यपि चुंब
नीयत्वमस्ये प्रकृतार्थाप्युर्थद्वयबोधकत्वमात्रेण तस्य साधारणोक्तिः उपस्कृतादिति साधम्यपादित्यस्य विशेषणं तत्र चंद्रमःशब्दगतेन पुंलिंगेन नायकत्वाभि
१ मुख्यं वृत्तं चुंबनम् व्यक्त्या उपस्कारः ऐंद्रीति स्वरूपपरं तत्रत्येन स्त्रीलिंगेन तदर्थस्य नायिकात्वाभिव्यक्त्या ऐंद्रीशब्दप्रतिपाद्येनेंद्रसंबंधित्वेन च परकीयत्वाभिव्यक्त्येति बोध्यं वृत्तां
तः व्यवहारो मुख्ये चुंबनरूपः १॥ ॥ ॥ ॥ ॥
ऐंद्रीइति शब्दस्वरूपं तद्बोधकम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ व्याकज्ञादिति नायिकानुरक्तस्य कस्यचिन्नक्रीडालंबनं कंदुकं प्रत्युक्तिरियं हे कंदुक त्वं भगवत्यास्तु दर्यास्तया नायिकया रभसात् प्रीतिविशेषात् सादरमादरसहि
४३ तं यथा स्यात्तथा यतः यस्मात्त्वं सेव्यसे ततस्मात्त्वं अतीव धन्योसीत्यन्वयः कथमित्याकांक्षायां संसेवनक्रियां विशिनष्टि व्याकज्ञादित्यादिना व्याकलानविशे
षतस्त्रासमंताज्जलन् कुचभारो यत्र तथा आकुलाः क्रीडावेशेनेतस्ततः पर्यस्ताः कचाः केशा यत्र एवं व्यालोलाश्चलाः पिता हारावलिर्यत्र तथा प्रेखं
त्यावंचलाभ्यां कुंडलाभ्यां शोभा युक्तं गंडयुगलं यत्र एवं प्रस्वेदयुक्तं वक्त्रांबुजं यत्र शश्वन्निरंतरं दत्तः करेण प्रहारो यत्र तथा अधिकः आ सोम्यत्वात्येति र
त्नोतः विपरीतरतस्वरूपः अत्रापि कंदुकशब्दगतपुंलिंगेन नायकत्वाभिव्यक्तिर्बोध्या स्त्रिष्टानीति श्लेषमूलकाभेदाध्यवसायविषयाणीत्यर्थः साधारणा

यथा॰ व्याकज्ञात्कुचभारमाकुलकचं व्यालोलहारावलिप्रेंखत्कुंडलशोभिगंडयुगलं प्रस्वेदिवक्त्रांबुजं शश्वद्दत्तकरप्रहारमधिकश्वा
सं रभसादे तया यस्मात्कंदुक सादरं त्वं भगवत्या संसेव्यसे तत्त्वं कृती अत्र कंदुकवृत्तांते वर्ण्यमाने व्याकज्ञात्कुचभारमित्यादिक्रियाविशेषणा
साम्याद्विपरीतरतासक्तनायिकावृत्तांतः प्रतीयते सर्वविशेषणानि श्लिष्टानि इह साधारणानीति भेदः सारूप्यादपि समासोक्तिर्दृश्यते
यथा पुराणत्र स्रोतः पुलिनमधुनात्र सरितां विपर्यासं प्राप्तो घनविरलभावः क्षितिरुहां बहोर्दृष्टं कालादपरमिव मन्येवनमिदं नि
वेशः शैलानां तदिदमिति बुद्धिं द्रढयति १ ॥॥
नीतिः श्लेषं विनैव प्रकृताप्रकृतवृत्तांतयोरनुगतानीत्यर्थः तथाच लक्षणे साम्यशब्देन श्लेषकृतं स्वाराभिकं च साम्यं विवक्षितमिति भावः सारूप्यात् सा द
श्यात् पुरेति उत्तररामचरिते सीतात्यागानंतरं कदाचिद्वनं प्रति गतस्य भगवतो रामचंद्रस्येयमुक्तिः पुरा वनवासकाले सरितां नदीनां स्रोतः प्रवाहो यत्र प्रदेशे आसी
त्तत्राधुना पुलिनमस्तीति शेषः तथा क्षितिरुहां तरूणां घनविरलभावः विपर्यासं वैपरीत्यं प्राप्तः सांद्राणां विरलता विरलानां शाखापल्लवादिवृद्ध्या
सांद्रताजातेत्यर्थः तथा च बहोर्भूयसः कालादनंतरं दृष्टमिदं वनमपरमन्यदिव मन्ये परंतु शैलानां पर्वतानां निवेशः विन्यासविशेषः तदेवेदं वनमिति बुद्धिं प्रत्यभि राम॰ ४३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्साहूप्यादिति वनसादृश्यादित्यर्थः ग्रामादौ किं वनसादृश्यमित्याकांक्षायां तद्धर्मं विशेषणमाह कुडुंगविच्छित्यादि कुडुंगविच्छु कुडुंगविगतो यो धनसम्भृद्ध्या
सम्भृद्धो विपर्यासस्तं प्राप्तस्येत्यर्थः तत्समाश्रयस्य तादृश कुडुंगविसमाश्रयस्य तथा च सम्भृद्ध्यसम्भृद्धिविपर्यासवदाश्रयत्वं सादृश्यमिति भावः किमस्य सादृश्य
स्योपस्थापकमिति चेत् घनविरलेति विपर्यासमिति च ताभ्यामुक्तसादृश्यगर्भीकरणात् एतेन नैपाम्यसादृश्यगर्भविशेषणोत्थापितसादृश्यमूलात्समासोक्ति
रिति मूलग्रंथानवबोधस्तद्विरोधश्चेति दूषणमल्लग्नकं वेदितव्यं अथाप्रस्तुतवृत्तं तस्य विशेषणसाम्यगम्यत्वाभावादुक्तलक्षणस्याव्याप्तिरिति चेत्

अत्र वनवर्णने प्रस्तुते तत्साहूप्यात्कुडुंगविघुधनसंतानादिसंमृध्यसमृद्धिविपर्यासं प्राप्तस्य तत्समाश्रयस्य ग्रामनगरादेर्वृत्तान्तः
प्रतीयते अत्र च विशेषणसाम्यात्साहूप्याद्वाऽप्रस्तुतवृत्तान्तस्य प्रत्यायनं तत्र श्लिष्टे विशेषणे तत्समारोपार्थं सर्वथैव प्रस्तुतान
न्वयिनः कविसंरंभगोचरत्वायोगात् ततश्च समासोक्तावप्रस्तुतव्यवहारसमारोपश्चारुताहेतुः ३ ॥ ॥

न विशेषणसाम्यगम्यसादृश्यगम्यत्वेऽपि विशेषणसाम्यगम्यत्वानपायात् प्राधान्यात्तु परं सारूप्यस्य गमकत्वोपदर्शनं साहूप्यादिति ग्रंथेन एवमग्रेऽपि वि
शेषणसाम्यात्सादृश्याद्वेति विकल्पोक्तिरपि प्राधान्याभिप्रायेणेति निरवद्यं एवमलंकारं निरूप्य तद्बोधप्रकारमुपदर्शयितुं भूमिकामारचयति अत्र चे
ति अत्रोदाहरणेषु अप्रस्तुतवृत्तान्तस्येति अप्रकृतजारादिसंबंधिनश्चुंबनादिव्यवहारस्येत्यर्थः विशेष्ये चन्द्रादौ सर्वथा आरोपानारोपान्यतरवि
धया प्रस्तुतानन्वयिनः प्रकृतानन्वययोग्यस्य व्यवहारस्य सर्वथैवेत्यस्य कवीत्यादिनान्वयः कविसंरंभेति स्वप्रतीत्युद्देश्यकशब्दसंदर्भरूपकविव्यापारेत्यर्थः ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अप्रस्तुतवृत्तांतस्य चुंबनादेरिवाप्रस्तुतस्य जारादेरपि चंद्रादौ समारोप इति मतं निराकरोति निरस्त्विति अप्रस्तुतरूपेति अप्रस्तुतस्वरूपेत्यर्थः कुतस्तत्राह मुख
कु॰ नं॰ ४४ मित्यादि तादात्म्येन चंद्रारोपे तादात्म्यस्यापि संसर्गविधयारोपविषयत्वात्तस्य च चंद्रत्वानतिरेकाच्चंद्रत्वारोपे तु क्रियान्तरप्रकारतया चंद्रत्वारोप उक्त इति ध्व
नितव्यं चंद्र इति शब्देन चंद्रविशेषणत्वेनोपस्थितस्य चंद्रत्वस्य मुखे विशेषणतयारोपासंभवात् एवं जारत्वेऽप्यारोपितो ध्यं तद्वाचकेति जारवाचकेत्यर्थः ननु
जारादिपदसमभिव्याहाराभावात् श्रोतारोपासंभवेप्यार्थो जाराद्यारोपोस्तु न हि तत्रापि तादृशसमभिव्याहारो हेतुः रूपकध्वनेरुच्छेदापत्तेरित्याशंक्याह
श्रो निरीक्ष्येति पयोदो मेघो विद्युत्त्वरूपैर्निशायामभिसारिकायास्तु विवीक्ष्य धारानिपातैः सह वांतः किंत्वयं चंद्र इति मत्वा आर्ततरं यथा स्यात्तथा ररास आक्रंदनं कृत

ननु रूपक इव प्रस्तुतेऽप्रस्तुतरूपसमारोपोऽस्ति मुखं चंद्र इत्यत्र मुखे चंद्रत्वारोपहेतुचंद्रपदसमभिव्याहारवदत्रोक्तं न तु चंद्रमा इत्यादिसमा
सोक्त्युदाहरणे चंद्रादौ जारत्वाद्यारोपहेतोस्तद्वाचकपदसमभिव्याहारस्याभावात् निरीक्ष्य विद्युन्नयनैः पयोदो मुखं निशायामभिसारि
कायाः धारानिपातैः सह किंतु वांतश्चंद्रोऽयमित्यार्ततरं ररास इत्याद्येकदेशविवर्तिरूपकोदाहरण इव प्रस्तुतेऽप्रस्तुतरूपसमारोपग
मकस्याभावात् तत्र विद्युन्नयनैरित्यत्र निरीक्षणानुगुण्या उत्तरपदार्थप्रधानमयूरव्यंसकादिसमासव्यवस्थितेरुत्तरपदार्थीभूतनयनान्वे
यानुरोधात्पयोदे तूक्तमपि इष्टप्रकृष्टत्वरूपगाङ्गामभ्युपगम्यते न चेह तथा निरीक्षणावत् त्वया गते किमिति वेपते पयसां निधिरिति श्लोके सेतु
कृत्वादिवत्राप्रस्तुतासाधारणवृत्तांत उपात्तोऽस्ति ॥ ४ ॥

वानित्यर्थः उदाहरणाद्वेति व्यतिरेकदृष्टांतः अन्वयथा गमकमस्ति तादृशस्य समासोक्त्युदाहरणेऽभावादित्यर्थः तथा चार्थारोपोऽप्यनाशंक्य इति
भावः ननु विद्युन्नयनैरित्यत्र किमप्रस्तुतारोपगमकं पदभावात्समासोक्तौ तदभाववदत्रतो गमकं दर्शयन्नमाह तत्रेति आनुगुण्यादानुकूल्यात्
उपमितसमासस्य पूर्वपदार्थप्रधानतया नयने ... सदृशविद्युत्करणकत्वस्य निरीक्षणेऽसंभवान्नुपितिरूपत्व तमिति भावः अनुक्तमपि अश्रोतमपि रूप राम॰ ४४
णोऽप्यारोपः न चेहेति इह समासोक्त्युदाहरणे तथा निरीक्षणावत् नयनकरणकनिरीक्षणावत् सेतुकृत्वादीत्यादिना मथनकारित्वपरित्वपरिग्रहः ४ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नन्विहापि परनायिकामुखचुंबनरूपस्याप्रस्तुतवृत्तांतस्याप्रस्तुतसाधारणधर्मत्वादप्रस्तुतारोपगमकत्वं स्यादित्याशंकां परिहरति नापीति साधारणादित्याक्षिप्तसाहचर्यगर्भविशेषणसंग्रहः वृत्तांतयोरिति निर्धारणषष्ठी वृत्तांतयोर्मध्येऽन्यस्येत्यर्थः विद्युन्नयनवदिति प्रस्तुताप्रस्तुतयोर्विद्युन्नयनयोर्मध्ये यथा नयनस्य उत्तरपदार्थप्रधानसमासात्प्राधान्यं तथा नास्तीत्यर्थः सेतुमंथकृदिति पाठः सेतुबंधनकृदिति क्वचित्पाठः कथंचिदर्थतो ऽनुवादत्वेनन्याय्ये यः उपसंहरति तस्मादिति मात्रपदेनाप्रस्तुतारोपव्यवच्छेदः विद्युन्नयनवत्समासकृतप्रोक्तप्राधान्याभावेऽपि विशेषणसामर्थ्यावगतस्याप्रस्तुतवृत्तांत

नापि श्लिष्टसाधार[illegible]णादिविशेषणसमर्पितयोः प्रस्तुताप्रस्तुतवृत्तांतयोरप्रस्तुतवृत्तांतस्य विद्युन्नयनवत्प्राधान्यमस्ति येन तदनुरोधाच्चं सेतुमंथनकृदित्यत्रैवानुक्रमाद्विप्रस्तुते ऽप्रस्तुतरूपसमारोपमभ्युपगच्छेम: तस्मात् विशेषणसमर्पिताप्रस्तुतव्यवहारसमारोपमात्रमिह चारुताहेतुः यद्यपि प्रस्तुताप्रस्तुतवृत्तांतयोरिह श्लिष्टसाधारणादि विशेषणसमर्पितयोर्भिन्नपदोपात्तविशेषणयोरिव विशेष्ययोर्गौणत्वसाम्यादन्यतरस्य प्राधान्यं तथाप्यप्रस्तुतवृत्तांतान्वयानुरोधान्न प्रस्तुते ऽप्रस्तुतरूपसमारोपोंगीकार्यः ५॥॥

स्यार्थतः प्राधान्यमस्तीति शंक्यते यद्यपीति [illegible] प्रस्तुतवृत्तांताभिन्नत्वेनावगतस्य प्रस्तुतवृत्तांतस्य प्रस्तुतविशेष्ययोगान्वयात्कथमप्रस्तुतवृत्तांतस्य प्राधान्यमिति शंकानिरासायाह विशेष्येणैवेति न तु तद्विशेषणाभिन्नप्रस्तुतवृत्तांतेनेत्येवकारार्थः समाधत्ते तथापीति अयमाशयः श्लिष्टादिविशेषणैः समर्पितः परनायिकामुखचुंबनादिरूपो ऽप्रस्तुतवृत्तांतः शाणैकदेशपि प्रस्तुतत्वप्रस्तुततागतत्वेन भासते यद्बलादप्रस्तुतव्यापारारोपेण व्यक्तिः स्यात्त अपि तु तास्थ्येनावगते तस्मिन्नप्रस्तुततासंबंधस्य कविसंरंभगोचरत्वायोगात्प्रस्तुतसमारोपितत्वेन पर्यवसानमिति ५ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु·नं· नन्वेवं तर्हि प्रस्तुतवृत्तान्तस्याप्रस्तुतवृत्तान्ताश्रयधर्मिणा प्रत्ययोक्तेः असंबद्धाभिधानप्रसंगपरिहारस्य तुल्यत्वादित्याशंक्याह तथाहीत्यादि प्र
४५ वृत्तयोग्यतारूपविनिगमकविरहेऽपि माऽस्तु तर्हि कस्याप्यन्यतरत्राग्रह इत्यत आह अवश्यमिति अन्यथाऽसंबद्धाभिधानप्रसंगापत्तेरिति भावः किं त
र्हि विनिगमकं तत्राह प्रस्तुतस्यैवेति तथा च प्रस्तुतप्रस्तुतार्थोपस्कार[२]कृते या चमत्कारहेतुत्वमेव विनिगमकमिति भावः अप्रस्तुतस्य· अप्रस्तु

२ कस

तथाहि यथाऽप्रस्तुतविशेषेऽप्रस्तुतवृत्तान्तस्य नास्त्यन्वययोग्यता तथैवाप्रस्तुतेऽपि जारादौ नास्ति प्रस्तुतवृत्तान्तस्यान्वययोग्य
ता एवं च समप्रधानयोः प्रस्तुताप्रस्तुतवृत्तान्तयोरन्यतरस्यावश्यमारोपेऽभ्युपगते स्वप्रस्तुत एव प्रस्तुते प्रस्तुत [illegible] स्यारोप
चारुताहेतुरिति युक्तं नन्वेवं सति विशेषणसाम्यात् अप्रस्तुतस्य गम्यत्वे समासोक्तिः विशेषणानां साम्येन यत्र प्रस्तुतव
र्त्तिनां अप्रस्तुतस्य गम्यत्वं सा समासोक्तिरित्यतः इत्यादि दीक्षितानां समासोक्तिलक्षणानि न संगच्छेरन् प्रस्तुतेऽस्मिन्नेषा ना ४
धारणमादिरूपविशेषणसमर्पितानुरागपूर्वकवदनचुम्बनाद्यप्रस्तुतवृत्तान्तसमारोपमात्रस्य चारुताहेतुत्वाभ्युपगमेन
विशेषणसाम्यकृतकामुकाद्यप्रस्तुतधर्मिव्यंजनानपेक्षणादिति चेत् उच्यते स्वरूपतोऽप्रस्तुतवृत्तान्तस्यारोपो न चारु
ताहेतुः किन्त्वप्रस्तुतकामुकादिसंबंधित्वेनावगम्यमानस्य तस्यारोपः तथाभूतस्यैव रसानुगुणत्वात् ६ ॥ ॥

वृत्तान्तस्य नन्वेवमिति एवं च प्रस्तुतसमारोपाङ्गीकारे विशेषणानामित्यादिदीक्षितानामथोक्तं लक्षणं प्रस्तुतवर्त्तिनां विशेषणानां साम्येने
त्यन्वयः प्रस्तुते समारोपार्थं अप्रस्तुतधर्मिव्यंजनानपेक्षणात् मपि समारोप्यमाणवृत्तान्तविशेषणत्वार्थं तदपेक्षणात् लक्षणसंगतिरित्याह ॥ रा·कु·
स्वरूपत इत्यादि स्वरूपतः अप्रस्तुतसंबंधित्वेनाज्ञायमानस्य ६॥ ॥ ॥ ॥ ४५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नन्वपेक्षासत्त्वेपि विशेषणसाम्यस्य तद्व्यंजनासामर्थ्यात् लक्षणासंगतिः तादवस्थ्यमिति शंक्यं साक्षात्सामर्थ्येपि हृतां तामित्यादिक्षिप्तारातत्संभवानन्दो ष इत्या
ह नचेत्यादि तदीयत्वानुसंधानं कामुकसंबंधित्वानुसंधानं तत्र सुखचुंबनादौ अनुसंधानं तद्वदिति पाठः अनुसंधानवदिति पाठे यथेत्यस्यासंगतेः अ
तएव अप्रस्तुतव्यंजनस्यापेक्षणादेव नन्वप्रस्तुतधर्मिव्यंजनानपेक्षणेऽर्हणप्रवादः कुतो न युक्त इत्यत आह कंडुकेऽपीति विशिष्टेत्यस्य मेयत्वेनान्वयः
संबंधित्वेनैवेत्येवकारोक्तमेवार्थं सोपपत्तिकमाह स्वरूपतइति अप्रस्तुतकामुकसंबंधित्वानालिंगितरूपेणेत्यर्थः तथा चारोपासंभवान्नादृशप्र
वादानुपपत्तिरिति भावः श्लिष्टविशेषणायामप्येतेंद्रीत्यादौ सुखचुंबनादेः स्वरूपतोप्यारोपसंभवसत्त्वात्तदाधारणविशेषणाया अनुपष्टंभकत्वेन प्रवादो

न च तावदवगमने विशेषणपदानां सामर्थ्यमस्ति तत्र श्लेषादिमहिम्ना विशेषणपदैः स्वरूपतः समर्पितेन वदनचुंबनादिना तत्संबंधिनि
कामुकादावुपस्थितेप्यनत्वरीयत्वानुसंधानं तत्र भवति यथा स्वरूपतो दृष्टेन राजादिना तत्संबंधिनि राजादौ स्मारिते पुनरस्यादौ तदीयत्वानुसंधा
नं तद्वदिति विशेषणसाम्येन वाच्योपस्कारकस्याप्रस्तुतव्यंजनस्यापेक्षा अत एव श्लिष्टविशेषणायामिव साधारणविशेषणायामप्यप्रस्तुतव्य
वहारसमारोपणं इत्येवं प्राचीनानां प्रवादः कंडुकेप्यावल्गुक्वचभारत्वादिविशिष्टवनितासंबंधत्वस्य कामुकसंबंधित्वेनैव समारोपणीयत्वात् स्वरू
पतः कंडुकेपि तत्संबंधत्वेन समारोपणीयत्वात् किंच सारूप्यनिबंधनत्वेनोदाहृतायां समासोक्तौ अप्रस्तुतवृत्तांतस्य शब्दार्थस्य प्रस्तुतवृत्तांतरूपेणैव
गम्यत्वे यादृशेन रूपेण तस्य समारोपसिद्धेः व्युत्पादितत्वेनैव युक्तमिति युक्तमेव प्राचीनानां लक्षणमिति भावनीयं ७॥॥

पंन्यासः ननु तत्रापि तादृशवनितासंबंधत्वस्य तादृशवनिताकृतविपरीतरतपात्रत्वरूपस्याप्रस्तुतवृत्तांतरूपस्य स्वरूपतोप्यारोपस्यैव संभवः तादृशप्रवादानुपपत्तिरत आह
किंचेति युक्तमिति तत्सामान्यादिरेव तथात्वमिति सामान्यादिति भावः लक्षणमिति ज्ञाताकवचनं तदेव युक्तरीत्या यथेंद्री मुखं पश्यरक्त इत्युक्ति चेद्मा इत्यत्र शक्तिवां ज
नाभ्यां प्राचीप्रारंभसंबंधाश्रयश्च द्वैजारसंबंधिसानुरागपरनायिका मुखचुंबनाश्रयइति बोधः अप्रस्तुतवृत्तांतः अभिन्नत्वेनाध्यवसितस्य प्रस्तुतवृत्तांतस्य तादात्म्येनाप्रस्तु
तारोपविषये युक्तंतद्धर्मिणान्वयइतिमते तु सानुरागपरनायिकामुखचुंबनाभिन्नप्राचीनप्रारंभसंयोगाश्रयो जाराभिन्नश्चंद्र इति बोधः एवमुदाहरणांतरेप्यनेनैव प्रका
रेण बोधप्रकारा ऊहनीयाः॥ ॥इत्यलंकारचंद्रिकायां समासोक्तिप्रकरणं ७॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुधांशुकलितोत्तंस इति विशेषणं तापहरणसमर्थं ... व्यञ्जनया प्रतीयते १

प्रकृत २ नि:शेषच्युतचंदनमिति त्र २ कुंभप्रकृते २

कु. लं. गुणीभूतव्यङ्ग्यप्रभेदभूतसमासोक्त्यलंकारप्रसंगात्तत्प्रभेदं परिकरालंकारं लक्षयति अलंकार इति अलंकारत्वोक्तिस्तत्र दोषाभावेनैव गतार्थत्वमिति
४६ शंकानिरासार्थं तत्प्रपञ्चं वक्ष्यामि करिष्यते साभिप्राये प्रकृतार्थोपपादकार्थविषयकाभिप्रायपूर्वके तथाभूतार्थव्यञ्जक इति यावत् इत्थं च प्रकृतार्थोपपा-
दकार्थव्यञ्जकविशेषणत्वं लक्षणं बोध्यं ... नातिव्याप्तिवारणाय प्रकृतार्थोपपादकेति हेत्वलंकारवारणाय बोधकत्वं विहाय व्यञ्जकत्वनिवेशः ब-
हुसाभिप्रायपरिकराङ्कुरालंकारवारणाय विशेषणेति तत्र तु विशेष्यं तथेति नातिप्रसङ्गः सुधांश्विति सुधांशुना कलितः कृत उत्तंसः शेखरो येन स इति
हरविशेषणं उत्तंसः कर्णपूरे स्यात् शेखरे चावतंसवदिति विश्वः सामर्थ्याभिप्रायं सामर्थ्यव्यञ्जकं तवेति इदं प्रति कामस्योक्तिः तव प्रसादात् कुसुमायु

अलंकारः परिकरः साभिप्राये विशेषणे । सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः ॥ ५४ अत्र सुधांशुकलितोत्तंस इति विशेषणं
तापहरणसामर्थ्याभिप्रायं यथा वा तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा । कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं पि॰
के मम धन्विनोऽन्ये ॥ अत्र पिनाकपाणेरिति हरविशेषणं कुसुमायुध इत्यर्थलभ्याहमर्थविशेषणं च सारासारायुधत्वाभिप्राय
गर्भं यथा वा सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः । शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥ अत्र शरीरविशेषणानि तस्य
हेयत्वेनासंरक्षणीयत्वाभिप्रायगर्भाणि ८ ॥

सोऽप्यहं मधुं वसन्तमेवैकं मुख्यं सहायं लब्ध्वा पिनाको धनुर्विशेषः पाणौ यस्य तादृशस्यापि हरस्य धैर्यच्युतिं धैर्यस्खलनं कुर्यां अन्ये धन्विनो धनुर्धरा मम पुरः
के अगणनीया इत्यर्थः कुसुमायुध इति विशेषणाच्चेत्यन्वयः अर्थलभ्येति कुर्यामित्युत्तमपुरुषाक्षिप्तेत्यर्थः अभिप्रायगर्भं अभिप्रायपूर्वकं अत
एवावयवार्थमात्रविश्रान्तत्वाद्रूपकेन पौनरुक्त्यमपि सर्वेति सर्वेषामशुचिनां रक्तपूयादीनां निधानस्य स्थानभूतस्य कृतघ्नस्य उक्तमार्गेण राम॰
नादिकृतोपकारनाशकस्य शरीरकस्येति कुत्सायां कप्रत्ययः कृते तदर्थं तत्संरक्षणार्थमिति यावत् विशेषणानि सर्वाशुचीत्यादीनि तस्य शरीरस्य ८ ॥ ४६

तपं कृजकमलत्वत २ पिनाकपाणेरिति हरविशेषणं कुर्यामित्युत्तमपुरुषाक्षिप्तयोऽस्मदर्थस्य विशेषणं कुसुमायुध इति च सारासारायुधकत्वाभिप्रायगर्भं २

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

व्यास्थमिति राजानं प्रति कवेरुक्तिः हे देवराज त्वद्गुणानां वृन्दस्य समूहस्य वर्णनं कर्तुमहं कथं शक्नुयां शक्तो भवेयमित्यन्वयः कुतस्तत्राह यतोऽहमेकस्व
पतया स्थितं वेदसमूहं न व्यास्थं अनेकशाखारूपेण न विभक्तवान् तथा च तत्कर्ता व्यासोऽहं न भवामीति व्यज्यते एवमग्रेऽपि वल्मीकतो वल्मीकात् जन्मा
ऽस्यास्तीति जन्मी न भवामीति शेषः तथा च नाहं वाल्मीकिरिति अच्युतस्य नाभौ नाऽभवं नोऽभवं नोत्पन्नः इत्यनेन नाहं चतुर्मुख इति सुमहत् भाष्यं महाभाष्यं च नाऽ
भाषिषि न भाषितवानित्यनेन नाहं सहस्रजिह्वः शेष इति चित्रो विचित्रोऽर्थोऽस्यास्तां बृहत्कथां नाऽचकथं कथितवानित्यनेन नाहं तद्वक्ता शिवो गुणाढ्यो विजातीयप्रश्ना वानु १

यथा वा व्यास्थं नैकतया स्थितं श्रुतिगणं जन्मी न वल्मीकतो नाभौ नाभवमच्युतस्य सुमहद्भाष्यं च नाभाषिषि। चित्रार्थां न बृह
त्कथामचकथं सुत्राम्णि नासं गुरुर्देव त्वद्गुणवृन्दवर्णनमहं कर्तुं कथं शक्नुयां॥ अत्र श्रुतिगणं न व्यास्थमित्यादीनि विशेष
णानि त्वत्तोऽन्यः साधसाधारणकार्यकरणप्रतिषेधमुखेन नाहं व्यास इत्याद्यभिप्रायगर्भाणि। तत्र द्वयोरुदाहरणयोरेकैकं
विशेषणं समनन्तरयोः प्रत्येकं बहूनि विशेषणानि। तत्रापि प्रथमोदाहरणे सर्वाणि विशेषणान्येकाभिप्रायगर्भाणि पदा
र्थरूपाणि च द्वितीयोदाहरणे भिन्नाभिप्रायगर्भाणि वाक्यार्थरूपाणि चेति भेदः तेषु व्यंग्यार्थस्य सद्भावेऽपि न ध्वनिव्यपदेशः॥४॥

वेति सुत्राम्णि इन्द्रे गुरुरुपदेशको नासमित्यनेन नाहं वाचस्पतिरिति च व्यज्यते उक्तेषूदाहरणेषु वैलक्षण्यं दर्शयति तत्रेत्यादिना एकैकं एकस्य विशेष्य
स्य एकमेव समनन्तरयोः अनन्तरोक्तयोः प्रत्येकं एकं विशेष्यं प्रति तत्रापि तयोर्मध्येऽपि एकाभिप्रायगर्भाणि एकार्थाभिप्रायपूर्वकाणि पदार्थे २
ति न व्यास्थमित्यादि निषेधवाक्यार्थबहुस्वीकारी त्वाहेतुत्वेनांतिमवाक्यार्थे विशेषणत्वादिति भावः तेषूक्तोदाहरणेषु ध्वनिव्यपदेशः ध्वनिव्यवहारः

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु॰नं॰ ४७ तत्र हेतुमाह तापहरणा इत्यादिना तापहरणो इत्यादिसमस्तान्तचतुष्टयस्य वाच्य इत्यनेन सामानाधिकरण्येनान्वयः उपस्कारकत्वादिति तथा चापरां
गरूपगुणीभूतव्यंग्यभेदत्वान्न ध्वनिव्यवहार इति भावः नन्वेवमपि यथाक्षतलक्षणस्यानिःशेषच्युतेत्यादिष्वनाव्याप्तिव्याप्तिरिति चेन्न अत आह अतए
वेति वाच्योपस्कारकत्वादेवेत्यर्थः परिकरत्वात् अंगत्वात् तथा च परिकरपदमहिम्ना प्रकृतार्थोपपादकत्वस्य व्यंग्यविशेषणस्य लाभान्नातिव्या
प्तिरिति भावः अपुष्टार्थेति भावप्रधानं उक्तत्वादिति अर्थोऽपुष्टः कष्टो व्याहत इत्युक्तेः कामयामा इत्यादिना लंकारिकैरुक्तत्वादित्यर्थः कथं स॰ह॰

तापहरणो मन्मथस्य केतुरुन्नत्यायेन सर्वेषां विशेषैर्व्यंजकत्वे शरीररक्षणार्थं पापमाचरंतीमस्ठत्वे तस्य वर्णनीयराजगुणाकथ
नाशक्तत्वेन च वाच्यस्योपस्कारकत्वादेतस्य व्यंग्यार्थस्य वाच्यपरिकरत्वात्परिकर इति नामास्यालंकारस्य केचित्तु निष्प्र
योजनविशेषणोपादाने अपुष्टार्थदोषस्योक्तत्वात्सप्रयोजनत्वं विशेषणस्य दोषाभावमात्रं न कश्चिदलंकारः एकनिष्ठतादृशा
नेकविशेषणोपन्यासः परं वैचित्र्यविशेषात्परिकर इत्यलंकारमध्ये परिगणित इत्याहुः वस्तुतस्तत्रानेकविशेषणोपन्यास
एव परिकर इति न नियमः श्लेषयमकादिष्वपुष्टार्थ॰ दोषाभावेन तत्रैककरणापि विशेषणस्य साभिप्रायस्य विन्यासे विच्छित्तिविशे
षसद्भावात्परिकरत्वोपपत्तेः १०॥॥

तर्हि तेनैवास्यालंकारत्वेन कथनमत आह एकनिष्ठेति तादृशेति साभिप्रायेत्यर्थः दोषाभावेनेति अपुष्टार्थत्वस्य दोषभावेनेत्यर्थः उक्तालंकार
संपत्त्या सहृदयवैमुख्यसंपादकत्वाभावादिति भावः विच्छित्तिविशेषसद्भावादिति परिकरत्वोपपत्तेः परिकरस्यालंकारत्वोपपत्तेः तत्र दोषस्याप्रसक्त्या राम॰
विच्छित्तिविशेषस्य तदभावप्रयुक्तत्वासंभवान्नास्य योजकमलंकारान्तरमावश्यकमिति भावः १०॥ ॥ ॥ ४७

विशेष २

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यमके ... उदाहरति यथेति । निजां देवतामतिक्रम्य यदि यजेत अर्थात् देवतान्तरं अर्चयेत् तदा उभयतः लोकद्वयात् च्यवते भ्रश्यति अस्य पापमपि जुषते सेवते प्रा
प्नोतीति यावत् । का निजा देवता तत्राह वयं वनवृत्ताः स्वकर्णयुक्ते नहि क्षितिभृता गोवर्द्धनगिरिणा सदैवतकाः दैवतसहिताः स एवास्माकं दैवतमित्यर्थः । अनवता
अरक्षकेन अहिहुताशे इत्यादि किं प्रयोजनमिति शेषः । अहिहुताशः पुरुहूत इति विग्रहः । नन्वेवं सति तत्रैवालंकारता स्यात् तत्र तद्धर्मप्रकलितो नं सदृत्यादाव
तत्राह एवमिति विच्छित्तिविशेषेति दोषाभावप्रयुक्तविच्छित्तिव्याहतेत्यर्थः नतु यमकादावपि तादृशविच्छित्तिविशेषमानाभावः विच्छित्तिसामान्यं तु पर्युद

यथा अतियजेत निजां यदि देवतामुभयतश्च्यवते जुषतेऽप्यघं क्षितिभृन्नैव सदैवतका वयं वनवृत्तावनवता किमहिहुताशे अत्र पुरुहूतपूजो
द्युक्तान् नन्दादीन् प्रति भगवतः कृष्णस्य वाक्यं गोवर्द्धनगिरिरेवास्माकं रक्षकत्वेन दैवतमिति स एव पूजनीयः नारक्षकः पुरुहूत इत्ये
वं परं वनवृत्तेति गोवर्द्धनगिरेर्विशेषणं काननवृत्त्या निर्झरादिमत्त्वात् पुष्पफलमूललतातृणजलादिभिः रक्षकानामस्माकं अस्मद
नानां च गवामप्ययमेव रक्षक इत्यभिप्रायगर्भं एवमेकस्यापि साभिप्राय विशेषणविन्यासस्य विच्छित्तिविशेषवशादलंकारत्व
सिद्धावन्यत्रापि तद्धर्मप्रकलितो नं सदृशादौ तस्यालंकारत्वाभावो न निवार्यते अपि च एकपदार्थहेतुकं काव्यलिंगमलंकार इति सर्वसंमतं तद्व
देकस्यापि विशेषणस्य साभिप्रायस्यालंकारत्वं युक्तमेव ॥ ॥ ॥

तादोषाभावेनाप्युपपन्नं आपत्कालपर्युदस्तस्य मच्छ्रीवहीनतादोषस्याभावेनैव तदानीमपि मच्छौचकर्तृरतिशयाधानमिति नालंकारत्वमिति चेदित्यत आह ।
अपि चेति भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शुभं हा सोपानपरंपरां गिरिसुताकान्तालयालंकृतिं अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखालो
कोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे इत्यादौ कृत्स्नमहामोहत्वे सुखालोकोच्छेदित्वं सुखालोकोच्छेदिनीत्येकपदार्थो हेतुरिति काव्यलिंगमलंका
रत्वेन यथा स्वीकृतं तेन तन्निर्दिष्टं तत्त्व दोषाभावमात्रतया विच्छित्तिविशेषस्यानुभवसिद्धत्वान्न थेहापीति भावः ॥ ॥ इत्यलंकारचन्द्रिकायां परिकरप्रकरणं ॥१॥

मो२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु.नं. साभिप्रायइति अत्रविशेषणपदस्थानेविशेष्यमितिप्रक्षिप्यपूर्ववल्लक्षणंबोध्यं तद्व्यतिरेकेऽनतिव्याप्तिवारणार्थं लक्ष्येलक्षणंसंगमयति अत्रचेति यद्यपिदे
४८ वांतरव्यावर्त्तकतयाचतुर्भुजइतिविशेषणं तथापिदृष्टादिसाधारणदेवपदशक्तेर्विष्णौनियमेनविशेष्यप्रतीतौपर्यवसिततयाविशेष्यपदत्वमभिमतंबोध्यं
अस्मिन्दिश्युदाहरति फणीन्द्रइति राजानंप्रतिकवेरुक्तिः तवगुणान्वक्तुंफणीन्द्रःशेषःसमर्थइत्यध्याहार्यं एवमग्रेपि हैहयाधिपःकार्त्तवीर्यःआ

साभिप्रायेविशेष्येतुभवेत्परिकराङ्कुरः चतुर्णांपुरुषार्थानांदातादेवश्चतुर्भुजः ५५ अत्रचतुर्भुजइतिविशेष्यंपुरुषा
र्थचतुष्टयदानसामर्थ्याभिप्रायगर्भं यथावा फणीन्द्रस्तेगुणान्वक्तिलिखेद्धैहयेश्वरः द्रष्टुमाखंडलःशक्तःकाहमे
षक्वतेगुणाः फणीन्द्रइत्यादिविशेष्यपदानिसहस्रमुखत्वाद्यभिप्रायगर्भाणि १२ ॥ ॥

खंडलइंद्रःउभयत्रगुणानित्यनुषज्यते एषःमर्त्यधर्माअहंक्वतेगुणाःक्वेतिकशब्दोमहदंतरंसूचयति यतःसहस्रमुखत्वादीत्यादिनासहस्रबाहुत्वसहस्रन राम.
यनत्वयोःसंग्रहः अत्रानेकेषांविशेष्यपदानांतत्तदभिप्रायगर्भत्वंविशेषः॥ ॥इतिपरिकराङ्कुरप्रकरणं॥ १२ ॥ ॥ ॥ ४८

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्लेषं लक्षयति नानार्थेति नानार्थैः शब्दस्य संश्रयो योजनं श्लेष इति लक्षणं वर्ण्येत्यादिर्विभागः वर्ण्यं वावर्ण्यं च वर्ण्यावर्ण्ये उभयं च एतत्त्रयाश्रितस्त्रिविध इत्यर्थः सर्वेति सर्वदः समाधवः पायात् यः अंगं गोवर्द्धनपर्वतं गां पृथ्वीं च वराहावतारे धृतवानिति विष्णुपक्षे हरपक्षे तु स उमाधवः सर्वदा पायात् यो गंगां धृतवानित्यर्थः हरिणेति मृगेणांककरूपतया आहिता कृता सक्तिः संयोगो यस्येति चंद्रपक्षे हरिणा सूर्येणेति कमलपक्षे उच्चैरत्र शस्त्रपाते सञ्जच्छलत्कीलालं रुधिरं यस्य स वाहिनीपति सेनापतिः तथा वाहिनीनां नदीनां पतिः समुद्रश्चेति पक्षे कीलालं जलं समितौ संग्रामे जातइति येनकरुणाणुक्रांतः करणेनदो

नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयास्पदः सर्वदो माधवः पायात्स यो गंगामदीधरत् ५६ अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः ५७ अनेकार्थशब्दविन्यासः श्लेषः स च त्रिविधः प्रकृतानेकविषयः अप्रकृतानेकविषयः प्रकृताप्रकृतानेकविषयश्च सर्वदेत्यादिना क्रमेणोदाहरणानि तत्र सर्वदो माधव इति स्तोतव्यत्वेन प्रकृतयोर्हरिहरयोः कीर्तनं प्रकृतश्लेषः अब्जं कमलमब्जश्चंद्रस्तयोरुपमानमात्रत्वेनाप्रकृतयोः कीर्तनमित्यप्रकृतश्लेषः वाहिनीपतिः सेनापतिः समुद्रश्च तत्रसमितोशाव प्रख्यातो यत उच्छ्रितस्य सेनापतेरेव वर्णनं प्रकृतमिति प्रकृताप्रकृतश्लेषः यथा वा जातः काकोदरो येन द्रोणाधिपकरुणात्मना पूतनामारणाख्यातः सोऽस्तु शरणं प्रभुः नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः सदृशे वनवृद्धानां कमलानां त्वदीक्षणे १॥ ॥

हेकन्नीफिन्सूदरोभयश्लन्यः काकस्तु जातो रक्षितः न तु हतः स पवित्रनामा रणेऽख्यातः शिष्टरूपो मे शरणमस्त्वित्यर्थः कृष्णपक्षे तु काकोदरः कालियसर्पः पूत
वि नाया राक्षस्या मारणेन ख्यात इति शेषः नीतानामिति दयितां प्रति नायकोक्तिः तव ईक्षणे नेत्रे कमलानां पद्मानां हरिणानां च सदृशे स्त इत्यन्वयः कीदृशानां वने जले अरण्ये च वृद्धिं प्राप्तानां तथा लुब्धैर्लोभशालिभिर्भूरिभिः शिलीमुखैर्भ्रमरैराकुलीभावं व्याप्तत्वं नीतानामिति पद्मपक्षे हरिणपक्षे तु लुब्धैर्व्याधैः कर्तृभिर्भूरिशिलीमुखैर्बाणैः करणभूतैराकुलीभावं चपलतां नीतानामित्यर्थः मृगपद्मे हे कमल इति विशेषः १॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु.नं. असाविति उदयशैलं अभिरूढः रक्तः रक्तवर्णोऽनुरक्तश्च मंडलं बिंबं देशश्च राजा चंद्रो नृपश्च मृदुलैः रश्मिभिः अल्पैश्च करैः किरणैः ग्राह्यधनैश्च प्रजगृादि
४९ गेति अभिनवोदितेत्यर्थः ननु प्रकरणेनाभिधाया नियमनादप्रकृतार्थस्य व्यंग्यत्वमेवेति कथं श्लेष इत्याशंक्याह यद्विति अलंकारस्येति न चैवं शब्दशक्ति
मूलवस्तुध्वनेरुच्छेद इति वाच्यं शनिरशनिश्च तमुच्चैर्निहंति कुप्यसि नरेंद्र यस्मै त्वं यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च त्यत्र शनिविरुद्धरूपेऽप्रकृतेऽ
शनिशब्देनाभिधया प्रतीयमानेऽपि तन्मूलकस्य विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुत इति वस्तुध्वनेः शनिशब्दशक्तिमूलस्य संभवात् अलंकारस्येत्यस्यो

असावुदयमारूढः कांतिमान् रक्तमंडलः राजा हरति लोकस्य हृदयं मृदुलैः करैः अत्राद्योक्तौ नव्यत्वेन प्रकृतयो रामकृष्णयोः श्लेषः द्वितीयेऽप
मानत्वेनाप्रकृतयोः पद्महरिणयोः श्लेषस्तृतीये राज्ञि वर्णनप्रस्तावे प्रकृतस्य प्रत्यग्रोदितचंद्रस्याप्रकृतस्य नवाभिषिक्तनृपतेश्च श्लेषः यदत्र प्रक
ताप्रकृतश्लेषोदाहरणे शब्दशक्तिमूलध्वनिमिच्छंति प्राचः तत्प्रकृताप्रकृताभिधानमूलकस्योपमादेरलंकारस्य व्यंग्यत्वाभिप्रायं न तत्प्रकृता
र्थस्यैव व्यंग्यत्वाभिप्रायं अप्रकृतार्थस्यापि शक्त्या प्रतिपाद्यस्याभिधेयत्वावश्यंभावेन व्यंजनानपेक्षत्वात् यद्यपि प्रकृतार्थप्रकरणवलात्स्फुरिति तु
द्विस्थितेमस्त्वेव पश्चा नृपतिग्राह्यधनादिवाचिना राजकरादिपदानामन्योन्यसन्निधानवलाद् द्विविषयशाब्दांतरोन्मेषः पूर्वं कामप्रकृतार्थः स्फुरेत् तेनैताप्र
वृत्तान्तस्य व्यंग्यत्वं शक्त्या प्रतिपाद्यमानेऽसर्वथैव व्यंजनानपेक्षणात् पर्यवसिते प्रकृतार्थाभिधाने पश्चात्स्फुरंतीति चेत् कामं गूढश्लेषो भवतु अप्रति
गान्यत्रापि गूढश्लेषः यथा अयमतिजरठाः प्रकाममगुर्वीरलघुविलंबिपयोधरोपरुद्धाः सततमसुमतामगम्यरूपाः परिणतदिक्करिकास्तटीर्बि

पलक्षणात्वात् अन्योन्यसंनिधानवलात् परस्परार्थसंबंधिवाचकसमभिव्याहाररूपशब्दांतरसंनिधिवलात् तथा चाप्रकृतेऽप्यभिधानियामकमस्तीति भावः रुता
वृता पूर्वापरभावमात्रेण तस्य अप्रकृतार्थस्य गूढश्लेषइति गूढत्वं चाप्रकृतत्वेन झटिति प्रतीत्यर्थस्य शीघ्रमप्रत्ययात् अयमिति माघे रैवतकगिरिवर्णनं अयं गि
रिस्तटीर्बिभर्तीत्यन्वयः किंभूताः अत्युंततकठिनाः प्रकाममगुर्वीः अतिमहतीः अलघुभिर्विलंबमानैर्मेघैर्व्याप्ताः निरंतरं प्राणिनामगम्यस्वरूपाः परिणतास्तिर्यक्
दंतप्रहारिणः दिग्गजा यास्ताः वेश्यापक्षे तु जरठा जीर्णाः पयोधराः कुचाः अगम्याः संगमयोग्याः परिणते प्रकटे दिक्करिके यासां ता इत्यर्थः दिक्क्व तुलंद

तिर्यग्दंतप्रहारयोगजः परिणतः कुञ्जर इति हलायुधः १

कुवलयानन्दटीका १॥ रामं ४९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अ

मंदमिति ओषधीनां पत्युश्चन्द्रमसः संनिधौ सति अर्यमोपलाः सूर्यकान्ता मंदीभूतमग्निं धृतवंतः तमेव दर्शितः सुवपथुः उष्णत्वं येन तथा भवन् दृष्टपत्ति मिरजं दोषं आं ध्यं सिषेविरे पक्षान्तरे औषधिपतिर्वैद्यः एवं मंदाग्नित्वशोथतिमिरादिरोगविशेषाः हतौ तादृशं तादिष्टमार्गेणे वैद्य हन्तं तत्परिहृत्यते । अमंगश्लेषइति तथाच श्लेषस्थले वांजनाविरहादद्यस्तु तत्स्त्रीकारे श्लेषव्यवहारः सर्वेषामनुपपन्नः स्यादिति भावः रम्याइति माघएवद्वारकावर्णनं यस्यां द्वारकायां पांशुवातो वधूमिः समं वलभीःशालादौ परितन्तगृहानि असेवंत असेवितवंतः किंभूताः रम्याइतिहेतोः पताकावैजयंतीः शालवतीः विविक्ताविजनाइतिहेतोः रागं रतिं वर्द्धयंतीः तमंतिवजीकानिछादनपटलस्थांता यासां ताः वधूपक्षे पताकाः सौभाग्यानि पताका वैजयंत्यां स्यात्सौभाग्यनाटकांकयोरिति मेदिनी । रागमनुरागं विविक्ताः सतीत्वेन पवि

मंदमग्निमधुर्यमोपलादर्शितशुद्धपथुचाभवन्नमः दृष्टपत्तिमिरजं सिषेविरे दोषमोषधियतेरसंनिधौ अत्रहि समासोक्त्युदाहरणयोः एकस्मिन्नेवार्थे प्रकरणादिना नियमितेऽपि विशेषणसाम्यात् प्रकृतोऽपि हृद्वेष्णहन्तादिः प्रतीयते तत्र समासोक्तेरिष्टं श्लेषइति सर्वेषामभिमतएषः एवम त्राऽपि श्लेषेऽदेषु निबुद्धिर्न कार्याः रम्याइतिशालवतीः पताकारागं विविक्ताइति वर्द्धयंतीः यस्यामसेवनतमहलीकाः समं वधूमिर्वलभी र्धुवातः अत्रहि द्वितीयांतादिविशेषणसमर्पितार्थान्तराणां शाब्दसामर्थ्येन वधूमिरन्वयः विभक्तिभेदात् नच विभक्तिभेदेऽपि तदन्वयाक्षेपकसाधर्म्यमिहनिवद्धमस्ति यतः एतस्मिन्नधिकपयः श्रियं वहंसः संक्षोभं पवनभुवाजवेननीताः वाल्मीकेररहिताममलश्रमणानां साधर्म्यं दधतिगिरां महासरस्यः इत्यत्रेवाक्षिप्तश्लेषो भवेत् ३॥॥

ताः तमस्त्रिवलीकाश्चेति नचेति यतइत्यत्रेवाक्षिप्तः श्लेषो भवेदित्यग्रेतनेनान्वयः एतस्मिन्निति रैवतकगिरिवर्णनं एतस्मिन् गिरौमहत्यः सरस्यः वाल्मीकेर्मुनेर्गिरां साधर्म्यं सादृश्यं दधति धारयंति किंभूतां तां गिरं अरहितो संवद्धो रामलक्ष्मणौ यासु तत्तथाभूतानां [illegible] हितोसंस्थौ रामलक्ष्मणौ [illegible] भूता नां सरसीपक्षे अरहिताः संयुक्ताः रामाः पत्तयो यास्ताः तथाभूताः लक्ष्मणाः सारसवनिता यासु ताइति किंभूताः सरस्यः अधिकां जलशोभां वहंसः पवनसंभूतेन वेगेन संक्षोभं तरंगाकुलत्वं नीताः प्रापिताः वाल्मीकिगिरःपक्षे अधिकाः कपयो यासु ताः पवनभुवा हनुमता वेगेन तिजेन संक्षोभमसुद्र्रत्वं प्रापिता इति ३॥ ॥

अध्यि १

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰न॰ ५० नन्वत्रापि सममित्यस्य तुल्यार्थत्वात्साधर्म्यनिर्वचोऽस्तीति कुतोऽत्र श्लेषाक्षेप इत्यत आह सममिति द्राक् शीघ्रं साम्यार्थ्यं साम्यार्थकत्वं तथा चानुपपत्त्यभावात्तन्मूल
कश्लेषाक्षेपो न संभवतीति भावः कथं तर्हि तदवगम इत्यत आह अर्थमिति दर्शयेति विशेषणानां च भूमिरूपत्वे चमत्कृतेरनुसंधानात्तदन्वय [illegible] इति भावः तदनु श्ले
षानुसंधानानंतरं तद्बलात् श्लेषबलात् साधर्म्यार्थेति साधर्म्यरूपार्थस्येत्यर्थः अर्थसाम्याभावेऽपि समकलकलेऽबुरमेतज्ज्ञातं सपातिस्वर्भानुविवमित्येत्यादिवच्छ
ब्दसाम्यस्य संभवादिति भावः एवकारेणाव्यंग्यत्वव्यवच्छेदः तत्र तयोर्मध्ये शब्देति जतुकाष्ठन्यायेन शब्दयोरेव श्लिष्टत्वादिति भावः अर्थेति शब्दाभेदादेकवृंतग

सममित्येतत्क्रियाविशेषणं तत्सहार्थत्वेनाप्युपपन्नं वं भूषुश्लिष्टविशेषणार्थान्वयात् प्राक् द्रागवगतीतं साम्यार्थ्यं नालंबते तस्मादर्थमेनं
दर्शयबलादेव तदन्वयानुसंधानमिति गूढश्लेषः तदनु तद्बलादेव समशब्दस्य साधर्म्यार्थकत्वमिति वा अश्लेषोपमालंकारस्य तदंगमयं श्ले
षइत्युत्तमतिप्रपंचेन तत्किंद्वं श्लेषद्वैविध्यं एवं श्लेषः प्रकारांतरेणापि द्विविधः संपन्नः उदाहरणगतेष्वन्नकीलालग्राहिनीत्या
दिशब्देषु परस्परं विलक्षणां पदभंगमनपेक्ष्य नानार्थकोडीकारादभंगश्लेषः सर्वदो माधवो गंगा हरिणा हितसक्तिनेत्यादिषु परस्परं वि
लक्षणां पदभंगमपेक्ष्य नानार्थकोडीकारात्सभंगश्लेष इति तत्र सभंगश्लेषः शब्दालंकारः अभंगश्लेषस्त्वर्थालंकार इति केचित् उभयमपि
शब्दालंकार इत्यन्ये उभयमप्यर्थालंकार इति स्वाभिप्रायः एतद्विवेचनं तु चित्रमीमांसायां द्रष्टव्यं ४ ॥ ॥

तफलद्वयन्यायेनार्थयोरेव श्लिष्टत्वादिति भावः केचित् अलंकारसर्वस्वकारादयः उभयमपीति सभंगाभंगश्लेषद्वयमपीत्यर्थः शब्दस्य परिवृत्त्यसहत्वेनान्व
यव्यतिरेकाभ्यां तद्गुणत्वावधारणादिति भावः अन्ये मम्मटभट्टाः स्वाभिप्रायस्यार्थालंकारमध्यकथनादवगतस्यापि विशेषतः कथनमंतरेण कथमुपपत्ति
रित्याशंक्याह एतदिति यद्यप्युत्प्रेक्षाग्रंथानंतरं चित्रमीमांसा न क्वापि दृश्यते तथाप्ययमाशयोऽनुमीयते चमत्कारेऽर्थमुखप्रेक्षित्वादर्थालंकारत्वमिति राम॰ ५०
अनुप्रासयमकादेस्तु न चमत्कारेऽर्थमुखप्रेक्षित्वमिति न तेषामर्थालंकारत्वमपि तु शब्दैकनिष्ठत्वात् शब्दालंकारत्वमेवेति ॥ ॥ ४ ॥ ॥इति श्लेषप्रकरणम् ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[illegible]

विशेषस्य ३

अप्रस्तुतेति। सा अप्रस्तुतप्रशंसा प्रस्तुताश्रया प्रस्तुतमाश्रय प्राधान्येन तात्पर्यविषयो यस्याः सा याऽप्रस्तुतात् प्रस्तुतस्य अप्रस्तुतवर्णनम् अप्रस्तुतप्रशंसेत्यर्थः एक इति
कृती कुशलः शकुन्तेषु पक्षिषु मध्ये यस्मात् कः शक्रादिर्ज्ञातत्वात्तस्माच्चातक इत्यर्थः कार्य इति कार्ये प्रस्तुते सति तदन्यस्य कारणस्य वचः प्रतिपादनं निमित्ते कारणे
प्रस्तुते सति तदन्यस्य कार्यस्य एवं सामान्ये प्रस्तुते सति तदन्यस्य विशेषस्य विशेषे प्रस्तुते सति तदन्यस्य सामान्यस्य तुल्ये प्रस्तुते तदन्यस्य तत्सदृशस्येत्यर्थः अन्यापदेश

अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते ॥ ५८ ॥ यत्राप्रस्तुतवृत्तान्तवर्णनं प्रस्तुतावगतिपर्यवसायि तत्रा-
प्रस्तुतप्रशंसालंकारः अप्रस्तुतवृत्तान्तवर्णनेन प्रस्तुतावगतिश्च प्रस्तुताप्रस्तुतयोः संबन्धे सति संबन्धश्च सारूप्यं सामान्यविशेषभावः का- भवति २
र्यकारणभावो वा संभवति सामान्यविशेषभावे सामान्याद्विशेषस्य विशेषाद्वा सामान्यस्यावगतौ द्वैविध्यं कार्यकारणभावेऽपि कार्यात्कार-
णस्य कारणाद्वा कार्यस्यावगतौ द्वैविध्यं सारूप्ये त्वेको भेद इत्यस्याः पञ्च प्रकाराः यदाहुः कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति तद-
न्यस्य वचस्तुल्ये तुल्यस्येति पञ्चधेति तत्र सारूप्यनिबन्धनाप्रस्तुतप्रशंसोदाहरणम् एकः कृतीति अत्राप्रस्तुतस्य चातकस्य प्रशंसा प्रशंस-
नीयत्वेन प्रस्तुते तत्सरूपे कस्मिंश्चिदभिमानिनि पर्यवस्यति तथा वा आबद्धकृत्रिमसटाजटिलांसभित्तिरारोपितो मृगपतेः प-
५८ दवीं यदि श्वा मत्तेभकुम्भतटपाटनलम्पटस्य नादं करिष्यति कथं हरिणाधिपस्य अत्र शुनकस्य निन्दनीयत्वेन प्रस्तुते तत्सरूपे कृत्रिम-
व्यवहारमात्रेणाविदग्धानभिनयति वैधेये पर्यवस्यति ॥ १ ॥

प्रतिसंबन्धिपरत्वात् तत्सरूपे तत्सदृशे आबद्धेति अवबद्धायाः कृत्रिमायाः सटाः स्कन्धलोमानि तैर्जटिलायाः अंसभित्तिः स्कन्धदेशो यस्यैवंभूतः श्वा शुनकः मृगपतेः
सिंहस्य पदवीं स्थानं यद्यारोपितः तादृशसटायुक्तत्वेन सिंहसाम्यं प्रापित इत्यर्थः तथापि मत्तानामिभानां गजानां कुम्भतटस्य पाटने विदारणे लम्पटस्य व्यस-
निनो हरिणानामधिपस्य नादं सिंहनादं कथं करिष्यतीत्यर्थः अभिनयति अनुकुर्वतीति सम्प्रत्यं तं वैधेये मूर्खे मूर्खवैधेयबालिशा इत्यमरः ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पेर्वाहः खलेषु जाग्रत्सुमात् पुत्राद्भिरितः कलहं कुर्वाणेषु पुरुषे पर्यवस्यति। एवं चलक्ष्यलक्षणयोः प्रसंगाशङ्कामपि निंदा साधारणस्वरूप[illegible]

कु० नं० ५१ अंतरिति छिद्राणि रंध्राणि दोषस्थानानि च कंटकाः सूक्ष्माः खलाश्च भंगुराः भंगशीलाः गुणाः सौभाग्यादयः तंतवश्च अनक्तेति निंदोदासीनस्वरूपारव्यानमात्रमिति श्लिष्टविशेषणात्वमिति तद्भेदः एवं चेति उक्तोदाहरणेषु प्रस्तुतपरस्याप्रस्तुतवर्णनस्य विरूपत्वे सतीत्यर्थः विधायेति येनराः मनुष्याः सक्रोधे ऽरौ शत्रौ वैरं विधायोदासीना भवंति ते कक्षे तृणे उदर्चिषमग्निं निक्षिप्य अभिमारुते पवनाभिमुखे शेरते निद्रां कुर्वंतीत्यर्थः सोढारो इति सोढारो निमे आप्ये व

यथा वा अंतश्छिद्राणि भूयांसि कंटका बहवो बहिः कथं कमलनालस्य मा भूवन्भंगुरा गुणाः अत्र कमलनालवृत्तांतकीर्तनं तत्सरूपकीर्तनमात्रपरो द्रष्टव्यः सामान्यनिबंधना यथा विधाय वैरं सामर्षे नरोऽरौ य उदासते। निक्षिप्योदर्चिषं कक्षे शेरते ते ऽभिमारुतं अत्र प्रागेव सामर्षो शिशुपालेन क्लिष्टो हरणादिना वैरं हढीकृतवता कृष्णेन तस्मिन्नुदासितुमयुक्तमिति विशेषे वक्तव्ये ऽर्थप्रस्तुते तत्तत्पर्यतार्थसामान्यमभिहितं यथा वा सोढारस्त्वरिरेवा रणांगुश्चावचभिदाञ्जुषां परोक्षमिति कोप्यस्ति परीक्षाने कषोपलः अत्र यदि त्वं प्रत्यक्षं इत्थं परोक्षेपि मम महितमाचरसि तदा त्वमुन्नमस्तदिति विशेषे वक्तव्ये तेन प्रस्तुतसामान्यमभिहितं विशेषनिबंधना यथा ॥ अकाधिरोपितमृगश्चंद्रमा मृगलांछनः केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः अत्र कलंकपतिवलमद्वाक्ये मार्दवदूषणपरे पूर्वप्रस्तावेना नुसारेण क्रूरेणरवख्यातिर्भवतिनतुमृदुरिति सामान्ये वक्तव्ये तत्समर्थनार्थमप्रस्तुतो विशेषोभिहितः एवं हलक्यादिषु सामान्यतः कंचिदर्थं प्रस्तुत्य तद्विवरणार्थमप्रस्तुतकथा विशेषोदाहृतो क्षिप्यमेवाप्रस्तुतस्यांशा द्रष्टव्याः १॥ ॥

५२

स्वरारि रेवा इति रूपकं तासां परीक्षणे निकषोपलः परोक्षमिति संश्लिष्टः कोप्यस्तीत्यन्वयः अंकेति मृगलांछन इत्युच्यत इति शेषः निष्ठुरं क्षिप्तानि निरस्तानि मृगयूथानि येन तादृशः केसरी सिंहो मृगाधिप इत्युच्यत इति शेषः २॥ ॥ ॥ राम० ५१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वेति छतोगंभीरायां खव्यां गत्तैरस्याकाशस्य नीलिमायेनेति मंडलविशेषाणां आश्रितेति हे देव प्रतिमासंभिन्नाश्चमृतद्युतयश्चंद्रास्तेऽखिलोः पदमाकाशमेव पदं च रणमाश्रित्य देहस्वरूपे उपनतं संपन्नं दिव्यपदस्याभिमुखत्वं येषामेवंभूताः सन्तस्त्वदास्यरूपे सुहृदि मित्रेऽनन्तलावण्यस्वरूपस्य पुण्यस्य नित्यं नित्यस्यमिहरसूर्यप्र जियांतीत्यन्वयः मंत्रलिंगादिति नवोनवो भवति जायमान इत्यादिमंत्रसामर्थ्यादित्यर्थः मंत्रस्यमानंतरं सिद्धार्थानुवादकत्वादाह तुष्टीति कृतीति तत्तत्कृतउ

काश्यानिबंधनायथा त्वन्मारमिवेडुमंडलं दमयंतीवदनायवेधसा कृतमध्यविलं विलोक्यते धृतगंभीरखनीखनीलिम अत्राशाकरणीकेंदुमंडल गततयोत्प्रेक्ष्यमाणेन दमयंतीवदननिर्माणार्थं सारांशहरणेन तत्कार्यरूपेणोवर्णनीयतया प्रस्तुतो दमयंतीवदनागतो लोकोत्तरसौंदर्यातिशेषः प्रतीयते यथावामदीपे वरदराजस्तवे आश्रितास्तु नमस्तद्युतयः पदं ते देहस्वरूपोपनतं दिव्यपदाभिमुख्याः लावण्यपुण्यनिचयं सुहृदि त्वदास्ये विन्यस्य यांति मिहिरं प्रतिमासभिन्नाः अत्राशाकारणीकचंद्रगतध्यतयोत्प्रेक्ष्यमाणेन लावण्यनिचयविन्यासेन कारणेन तत्कार्यमनंतकोटिचंद्रलावण्यशालित्वमनन्यसुखसाधारणं भगवन्मुखे वर्णनीयतया प्रकृतं प्रतीयते तथाहि चंद्रस्तावन्मंत्रलिंगात्सहस्रया भीभेदाध्वस्थापा प्रतिमासंभिन्नत्वेन वर्णितः तेनातीतास्वं द्राश्चनंतकोटयः इति लब्धं कालस्यानादित्वात् सर्वेषां च तेषामाकाशसमाश्रयणं शेषमहिम्ना भगवच्चरणसमाश्रयणात्वेनाध्यवसितं भगवच्चरणाप्रपन्नानां च देहरूपोपस्थितौ परमपदप्राप्त्याभिमुख्यं तदानीमेव सत्सु हृदयैः स्वकीयसुकृतस्तोमनिवेशनं ततः सूर्यमंडलप्राप्तिश्चेत्येतत्सर्वं श्रुतिसिद्धमिति तद्गुणोधेतेषां देहरूपकालस्यामावास्यारूपस्योपस्थितौ सूर्यमंडलप्राप्तिः प्राकृप्रतिपादिकं सिद्धं पुण्यत्वेनातिरूपितस्य लावण्यस्य प्रहाणां निमित्तीकृत्य तस्य चंद्रमाहरणस्वरूपो पचरि ततस्तेभ्योऽसांदं वाति भगवन्मुखेनासमनमुखेक्षितं ३ ॥ ॥ १०७४

श्रुतेरिति पुत्रते तस्यापियज्ञातयः सुकृतमुपयंति अप्रियाडुष्कृतमिति कौषीतकि श्रुतिः स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छतीति स एतं मागच्छति सतत्राविजिहीते यथारथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छतीति छांदोग्ये स आदित्यमागच्छतीत्यनंतरं स आगच्छति विरजां नदीं तां मनसैवात्येतीति तत्सुकृतदुष्कृते विधू

उद्दीप्तिकौ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृ॰ नं॰ शारीरकेति शरीरे भवः शारीरः स एव शारीरक आत्मा तत्प्रतिपादके इत्यर्थः अर्थवशात् प्रयोजनवशात् सर्वपापादित्यागाभावे ऽर्चिरादिमार्गप्राप्तिपूर्वकब्र
५१ ह्मप्राप्तेरसंभवेन पाठक्रमस्य अर्थक्रमेण बाधादिति भावः स्थापित इति सांपरायेतर्त्तव्याभावात् तथाह्यन्यइति तान्तीयाधिकरणे सिद्धान्तितइत्यर्थः नाथे
यद्यपि क्षेत्रे सूर्यमंडलप्राप्त्यनंतरं भाविविरजानद्युतिक्रमणानंतरमेव सुहृत्सु सुकृतसंक्रमणं श्रूयते। तथापि शारीरक
दृ
यद्यपि सुहृत्कृते तावत्सुकृतपुण्यसंक्रमणं भवतितथाप्यत्र सुहृदीयेकवचनेन भगवन्मुखमेवचंद्रस्य सुहृद्भूतं तन्मुखं नराणि चं
द्रमाद्रक्षणं धर्मपाभावादिति भगवन्मुखस्येतरसुखेभ्यो व्यतिरेकोपि व्यंजितस्ततश्च तस्मिन्नेव सर्वेषां चंद्राणां स्वत्वयाचस्थाबस्था
पितः सौन्दर्य श्रेष्ठेन प्रागवर्णितः प्रकृतोर्थः स्पष्टमेव प्रतीयते। दृष्टान्तेन तस्यार्थवशात् भगवत्या स्थापित इति तदनुसारेण पित्
समिहिरं याति इति नक्के कार्ये निबंधनाया नाथत्वदंघ्रिनखभावनतो पलव्यास्तत्कांतिलेशकणिकाजलधिं प्रविष्टाः तास्ववत
स्य मथनेन घनीभवंत्यो नूनं समुद्रनवनीतपदप्रपंन्नाः अत्र भगवत्पादांबुजपाल्ल् नतो रूपायां दिव्यसौरिति अलंकारसादिवस
ज्ञानं तयासहस्तुः प्रविष्टानां नखकांतिलेशकणिकानां परिणामतयासंभाव्यमानेन समुद्रनवनीतपदवाच्येन चंद्रेण कार्येणात
न्नखकांत्युत्कर्षः प्रतीयते ४॥ ॥

ति हेनाथ विस्मोत्सवरणनखप्रकाल्लनजले गंगारूपे लग्नाः तेषां नखानां कांतिलेशकणिकाः समुद्रं प्राप्ताः ताएव च कणिकास्तस्य जलधेर्मथनेन सान्द्र
तां प्राप्तान्नूनं समुद्रसंबंधि नवनीतस्य चंद्रस्य पदे प्राप्ताः चंद्ररूपेण परिणता इत्यर्थः तथा तद्वारेण ... ... इहैत्तु राम॰
रितिशेषः तद्वैत्तु नखकांत्युत्कर्ष इत्यर्थः ४ ॥ ॥ ॥ ५१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्यां स्वेदिति अस्याः कामिन्या गतिर्मे कुमार्यं हंसं चेदित्यत्र यथाहाराणामन्वयः एवं संलापो भाषणं यदि स्यात्तत्तदा परभृतैः कोकिलैर्वा चं पठतीति वा ...तस्य भा चंपकः
यो भीतं नमेव वक्रतं तां साध्यतां अकगोरतां मार्दवं यदि दृश्यते तेतदा साच सिद्धा मालती दृष्ट्वा येव पाषाणा त्वल्पैव लक्ष्यत इति कांतिर्दृष्टा चेत्तदा कमलाऽलक्ष्मीः का
षायं व स्वः मालं वता मा श्रयतु किमत्र वक्तुं लोके नेत्यन्वयः गत्यादिषु गतिसौंदर्यादिषु संभाव्यमानानि उत्प्रेक्ष्यमाणानि इत्युदाहरणानि लक्षणे

यथा वा अस्या स्वेद्गतिर्मे कुमार्य मधुना हंसस्य गतेर्वा लं संलापो यदि स्या ध्वान्तं पं इतैर्वा वंयम त्वं वनं अंगाना मक ठोरता यदि दृष्ट्
वा येव सा मालती कांति स्वोत्कमला किमत्र वक्तुना काषाय मालं वतां स्वत्रनायिकागत्या दिषु वर्णनीयत्वेन प्रकृतेषु हंसादिग
तगर्व शंत्यादि रूपणाये वितर्केनसं भाव्यमानानि कार्याणि क्रमेणाभिहितानि एतानि च इत्युदाहरणाइवन वक्तुकार्याणि किं तेन
त्रिनिरीक्षणकार्याणि लज्जा तिरश्चां यदि चेतत्स्या दसंशयं पर्वतराजपुत्र्याः तं केशपाशं प्रसमीक्ष्य कुर्युर्वालप्रियत्वं शिथिलं
इत्यर्थः इत्याद्युदाहरणांतरेतस्यैव स्पष्टं ५॥॥

माह एतानीति कार्याणीत्यर्थः लज्जेति तिरश्चां दीनां चेत् स्यादि लज्जा स्यात्तदा चमर्यः गोमृगाः पर्वतराजपुत्र्यास्तं तथा रमणीयं केशपाशं प्रसमीक्ष्य त्व
त्वाः केशाः प्रियायाः मेरा तास्तयातत्वं शिथिलं कुर्युरित्यन्वयः तथैव निरीक्षणकार्यत्वमेव ५॥ ॥ ॥
या

पत्र ७२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु.तं. अर्थाक्षेपेति इष्टत्वायत्तस्वरूपार्थाक्षिप्तेत्यर्थः इदमपि अप्रशस्ततबुद्धेः कार्यत्वमपि अपिनाप्रशस्ततबुद्धेः कारणत्वं शागुक्तं समुच्चीयते त्वदंतेगमाईवेंदृष्टेक
५३ स्यचिन्नेनभासते मालतीशशभृल्लेखाकदलीनांकठोरतेतित्तुल्ययोगितायांपाशुदाहृतेतन्तु कार्यस्वरूपेणाप्रशस्ततेनार्यत्वयत्रप्रशस्ततंतत्कारणमप्रगम्य
गेसाकार्यनिवंधनाअप्रशस्ततप्रशंसोच्यते नचोदाहृतेपुतत्तंभवः मालतीकठोरत्वादेरप्रशस्ततस्यार्थस्याकार्यतायास्त्वयैवदर्शितत्वात् एवंप्रशस्ततस्यका

अंगानामकठोरत्वेशितृतीयपादेतुवर्णनीयांगस्यैकुमार्यातिशयनिरीक्षणकार्यत्वमपिनार्थाक्षेपमालतीकठोरत्वेविवक्षितंशति
योगिविशेषापेक्षकठोरत्वस्यतदकार्यत्वात् किंतुतद्बुद्धेरेवेदमपित्वदंगमार्दवेदृष्टइत्युदाहरणोतथैवस्पष्टं अर्थस्यकार्यत्वइवबुद्धेः
कार्यत्वेपिकार्यनिवंधनत्वेनहीयतइतिताट्टशान्यपिकार्यत्वेधनाप्रशस्ततप्रशंसायामुदाहृतानिशाचीनैः ६॥ ॥

निवं

मिनीगतिनिष्ठस्पैदर्यातिशयादेर्निरीक्षणस्यैवकारणत्वेनतत्स्वरूपतत्तस्याकारणत्वादित्यतआह अर्थस्येति अयमाशयः अर्थस्याप्रशस्ततत्वेसुतरांतरबुद्धेरप्रशस्त दौतेपिज्ञातसदेहत्वादिति ६ ॥ राम.
तत्वात्कार्यत्वाच्चनतावदप्रशस्ततकार्यत्वांशासंभवः अर्थत्वस्यप्रयोजनाभावेनलक्षणोऽनिवेशादव्यावर्तकत्वाच्च नापिप्रशस्ततस्यकारणत्वांशस्यासंभवःस्वरूपतत्तस्या ५३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्तु गतिसौंदर्यादेर्ज्ञानमेव हेतुर्न तु ज्ञायमानं गतिसौंदर्यादि तदभावेपि ज्ञानमात्रात्कार्योत्पत्तेरित्यस्वरसादाह वस्तुत इति तदतिरेके तस्याः प्राचीनोदाहृताप्रस्तुतप्र
शंसाया अतिरेके प्रकारपंचकाधिक्ये ताद्धेति हे हरे त्वन्निश्वासरूपमंदमारुतेन निस्तुषीकृतस्य तुषरहितीकृतस्य स्मितरूपस्याध्यात्मिकादितापत्रयोपबाधस्य
स्य विप्रकीर्णाः कंडंकरचया तुषसमूहा इवेति जैवातृकस्य चंद्रस्य किरणाज्जगति भ्रमंतीत्यन्वयः तस्मात्त्वदास्यः किरणसारतारूपः एवमिति त्वत्स्मारमित्युदा
हरणे चंद्रवदन उपमानोपमेयपदार्थाद्वाक्षिप्तप्रशंसांशत्वरणस्याकारणस्य सतः कविप्रौढोक्तिकल्पितकारणत्व एवमन्येष्वपि दृष्टव्यं कालिंदीति नर्मदायाः

वक्ता तस्य तदतिरेकेपि न दोषः नत्वप्रस्तुतप्रशंसायां प्रस्तुताप्रस्तुतयोः पंचविध एव संबंध इति नियंतुं शक्यते संबंधांतरेष्वपि तद्दर्शनात् त य
था तावत्त्रयोपबाधवत्स्मितस्य निश्वासमंदमारुता निस्तुषीकृतस्य एते कंडंकरचया इव विप्रकीर्णा जैवातृकस्य किरणा जगति भ्रमंतीति अत्रात्र प्र
स्तुतानां चंद्रकिरणानां भगवन्मंदस्मितरूपदिव्यौषधधान्यविशेषकंडंकरचयत्वोत्प्रेक्षणेन भगवन्मंदस्मितस्यातत्सारांगतारूपः कोप्युत्कर्षः प्र
तीयते न तु धान्यकंडंकरचययोः कार्यकारणभावादिसंबंधोस्ति अतः सहोत्पत्त्यादिकमपि संबंधांतरमाश्रयणीयं एवमुपमानोपमेययोराश्रि
त्यतत्त्वकविकल्पितकार्यकारणभावनिबंधने अप्रस्तुतप्रशंसे दर्शिते ततोन्यत्रापि दृश्यते यथा कालिंदि ब्रूहि कुंभोद्भव जलधिरहं नाम गृह्णासि
कस्माच्छत्रोर्मे नर्मदाहं त्वमपि वदसि मे नाम कस्मात्सपत्न्याः मालिन्यं तर्हि कस्मादनुभवसि मिलत्कज्जलैर्मालवीनां नेत्रांभोभिः किमासां समजनि कु
पितः कुंतलक्षोणिपालः अत्र किमासां समजनीति मालवीनां तयारोदनस्य निमित्ते पृष्टे तत्प्रियमरणरूपं निमित्तमनाख्याय कुपितः कुंतलक्षोणि
पाल इति तत्कारणमभिहितमिति कारणनिबंधना मालवानृपतिश्चास्थितेन कुंतलेश्वरेण किं ते निर्जिता इति पृष्टे तद्बधानंतरभाविजलानि विनर्मदाप्र
श्नोत्तररूपं कार्यमभिहितमिति अत्रैव कार्यनिबंधनापि पूर्वस्याप्रश्नः शाद्ः अस्यायमार्थ इति भेदः ७ ॥॥

समुद्रस्य च संवादोयं तत्र यमुनाभ्रांत्या समुद्रेण कालिंदीत्युक्ते कोपात्साकूतं नर्मदा प्रत्युत्तरं हे कुंभोद्भवनगात्मर्त्ये न ब्रूहीति ततः पुनः समुद्रस्य प्रतिवचनं अहं जलधिर्भवामि म
म शत्रोर्नाम कस्माद्धेतोर्गृह्णासीति साप्युत्तरमाह नर्मदाहमित्यादि ततः समुद्रः पुनराह तर्हि कुतो मालिन्यमनुभवसीति साप्युत्तरमाह मिलत्कज्जलैर्मालवदेशांगनानां नेत्रा
म्बुभिरिति ततः किमासां जातमिति समुद्रस्य प्रश्नः कुंतलदेशाधिपः कुपित इति नर्मदाया उत्तरमिति॥ ॥इति अप्रस्तुतप्रशंसाप्रकरणं ७॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

×नाभिनं तमस्य तत्प्रसक्तं तेषोऽस्यैतत्त्वप्रसक्तं तां कुरो लेकारः ॐ नरह्नि मृगहरलं हृप्रियतमे ममसहे शुध्याने ५×

कु. टी. ५४ "प्रसक्ततेनेति प्रधानभूतप्रसक्ततां ताराभिव्यंजकं प्रसक्तवर्णानं प्रसक्ततं कुशलंकारः प्रसक्ततस्याभिव्यंजकत्वादंकुर इति युक्तं तेनेः किमिति हे भ्रमर मालत्यां विद्यमा
नायां कंटके द्रुमा कंटकव्याप्तया केतक्याः किं प्रयोजनमिति प्रसक्ततेन धमाहृत्तं तेनमयि प्रमोहारिण्यास्तस्याः किमुद्वेगकारिण्या परवनितये ति नाम कहत्तं
नः प्राधान्येन प्रसक्ततो ऽभिव्यज्यते कथमिह भृंगवृत्तांतस्य प्रसक्ततत्वं तत्राह हृदयेति तथा च भृंगसंबोधकत्वात्तवृत्तांतोऽपि प्रसक्तत इति भावः अत्रामंत्रणीया
मंत्रणेन संबोध्यतायोगप संबोधनेन वाच्यासंभवात् भृंगसंबोधकत्वाच्यार्थासंभवात् कस्त्वमिति शाखोटकतरुं प्रति कस्यचित्पथिकस्य प्रश्नोक्तिः क

"प्रसक्ततेन प्रसक्ततस्य घोतनेन प्रसक्ततांकुरः किं भृंगस्त्वां मालत्यां केतकं कंटके द्रुमा ५५ यत्र प्रसक्ततेन वर्ण्यमानैर्विहरंतीकाचिद्भृंगैः प्रत्येता
हेतिवाच्यार्थस्य प्रसक्ततत्वं अनुमामंत्रणीयामंत्रणेन वाच्यासंभवादेव प्रसक्ततमेव वाच्यमिह स्वरूप प्रसक्ततावगतये निर्दिष्टमिति वाच्यं मो
ध्यादिना भृंगादावप्यामंत्रणस्य लोके दर्शनात् यथा कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं वैराग्यादिव वक्षि साधु विदितं कस्मा तरु
दिदं कथ्यते वामेनात्र वटस्तमध्वजनः सर्वात्मना सेवते न च्छायापि परोपकारकरिणी मार्गस्थितस्यापि मे इत्यत्र चैतन्यचेतनप्रश्नोत्तरवर्तिति ४४
र्यगामंत्रणस्यात्यंतमसंभावितत्वाभावात् एवं प्रसक्ततेन वाच्येन भृंगोपालंभस्त्वेणाव्यताः कुलवध्वाः सौंदर्याभिमानशालिन्याः क्रूरजनपरि
हृतिदुष्प्राप्यापं परवनितायां विरसर्वस्वापहरणां संकल्पदुरासदायां वेश्यायां कंटकसंकुलकेतकीकल्पायां प्रियतमं प्रसक्तमुपालंभो द्योत्यते ॥

×वा ५× ×प्रवर्त्तमानं ६×

यथा मीत्याद्युत्तरं वैराग्यादिव वदसीति पुनः प्रश्नः साधु विदितमिति शाखोटकस्योत्तरं कस्मादिदं वैराग्यमिति पुनः प्रश्नः कथ्यत इति उत्तरं तत्प्रतिज्ञाय शाखो
टकस्त्वाह वामभागे नोपलक्षितो वटवरोऽस्तितं पांथो जनः सर्वात्मना समित्यत्र छायादिभिः सेवते आश्रयति ममपुनर्मार्गस्थितस्यापि न छायापि परोपकार
संपादकेति भ्रमाधारत्वादितिभावः वामेनेति मार्गेति चाश्लिष्टं अत्यंतं आरोपेणापि परवनितायामिति वेश्यायामिति च विषय सप्तमी तद्विषये त्वर्थः वि
रानां सर्वस्वस्यापहरणे यः संकल्पस्तेन दुःप्राप्येति वेश्याविशेषणं १॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्येति हे भृंग अन्यास्वपमर्दक्षमासु सुमनसां पुष्पाणां लतासु तावत् यावत् नवमालिकायाः कलिकासंजातरजस्का भवति लोलं चपलं मनो विनोदय लो
लमिति क्रियाविशेषणं वा नवमालिकापाललता विशेषस्य बालामभिनवां अजातरजस्कां कलिकामकाले व्यर्थं किमिति कदर्थयसि पीडयसि अन्यत्र पक्षे रजः
पुष्परजः स्त्रीणां रेतश्च श्रावतीति एतद्वचनं श्रावतिमतीत्यर्थः कोशेति इयं नलिनी कमलिनी कोशद्वंद्वं मुकुलयुगलं कादंवस्य हंसस्य चंच्वाकृतं कृतं श्रुते

यथावा अव्यास्तुतावदुपमर्दसहासु भृंग लोलं विनोदय मनः सुमनोलतासु बालामजातरजसं कलिकामकाले व्यर्थं कदर्थयसि किं
नवमल्लिकायाः अत्रापुष्पानमध्ये चरंतं भृंगं प्रत्यपमुपालंभ इति वाच्यार्थस्यापि प्रस्तुतत्वं इदं चशोदागतास्तु विद्यमानास्तु बालिकां रत
ये क्लेशयति कामिनि श्रावतिकस्याश्चिद्विदग्धायाः वचनमिति तं प्रत्युपालंभो द्योत्यते यथावा कोशद्वंद्वमियं दधाति नलिनी कादं
व चंचुक्षतं धत्ते चूतलतानवं किसलयं पुंस्कोकिलास्वादितं इत्याकर्ण्य मिथः सखीजनवचः सा दीर्घिकायास्तटे चेलांतेन तिरोदधे
स्तनतटं बिंबाधरं पाणिना अत्रेयमिति नलिनी व्यक्तिविशेषनिर्देशेन दीर्घिकायास्तटइत्यनेन वाच्यार्थस्य प्रस्तुतत्वं स्पष्टं प्रस्तुतांतर
द्योततं च स्वयमेव कविना विष्कृतमुत्तरार्द्धे अत्रापीदाहरणापौरन्यापदेशध्वनिमाह लोचनकारः १॥॥

धत्तेदधाति तथेयं चूतस्याम्रस्य लतान्नूतनं पल्लवं पुंस्कोकिलेनास्वादितं च वर्त्तितं धत्ते इति दीर्घिकायावाप्यास्तटे मिथः परस्परं सखीजनस्य वचश्चाकर्ण्य सा प्रस्तुता
नायिका कमलमुकुलान्यपल्लवव्याजेनैतामदीयस्तनाधरक्षतं कथयंतीति ज्ञात्वा चेलस्य वस्त्रस्यांतेन प्रांतेन स्तन तटं तिरोदधे बिंबरूपमधरं च पाणिना ति
रोदधेऽच्छादितवतीत्यन्वयः अन्यापदेशेति अन्यस्यापदेशोऽमिषं यत्र तादृशमित्यर्थः १॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰ नं॰ ५५ तदीयमेव ग्रंथं दर्शयति अप्रस्तुतेत्यादि व्यवस्थापितमिति प्रस्तुतत्वेपि मुख्यतया तात्पर्याभावादभिधापर्यवसानाभावादिति भावः सान्निध्येति
सान्निध्यालङ्कृति ध्वनेः सकाशादन्येवेत्यर्थः प्रस्तुतत्वलंभनेन प्रस्तुततत्त्वप्राप्त्या रात्रिरिति हे विलोचने शिवाकल्पाग्रस्वरूपा काचनानिर्वचनीय
प्रभावा रात्रिः शिवरात्रिरित्यर्थः संनिधत्ते संनिहिता भवति अतः पुर्वां अप्रमत्ते जागृतं जाग्रद्रूपेण वर्तं कुतस्तत्राह ध्रुवयोः सकाशे समीपे अचिरेण

अप्रस्तुतप्रशंसायां वाच्यार्थोऽप्रस्तुततयादवर्णनीय इति तत्राभिधाया अपर्यवसितायां तेन प्रस्तुतार्थव्यक्तिरलंकारः इह
तु वाच्यस्य प्रस्तुतत्वे तत्राभिधायां पर्यवसितायामर्थसौंदर्यबलेनाभिप्रेतार्थव्यक्तिर्ध्वनिरेवेति प्रस्तुतस्त्वयमप्यलंकारो न
ध्वनिरिति व्यवस्थापितं चिरमीमांसायां तत्रीयोदाहरणास्य त्वलंकारत्वे न कस्यापि विवादः उक्तं हि ध्वनिकृता शब्दार्थशक्त्याक्षि
प्तोपि व्यंग्योर्थः कविना पुनः यत्राविष्क्रियते स्वोक्त्या सान्येवालंकृतिर्ध्वनेरिति एतानि सारूप्यनिबंधनान्युदाहरणानि संबंधांत
रनिबंधनान्यपि कथंचिद्वाच्यव्यंग्ययोः प्रस्तुतत्वलंभनेनोदाहरणीयानीति दिङ्मात्रमुदाह्रियते रात्रिः शिवा काचन सन्निधत्ते
विलोचने जागृतमप्रमत्ते समानधर्मा ध्रुवयोः सकाशे सखा भविष्यत्यचिरात्कश्चित् अत्र शिवसारूप्यमिव तदेकदेशतया तद्वा
च्यभालुलोचनमपि शिवरात्रिमाहात्म्यप्रयुक्तत्वेन वर्णनीयमिति तन्मुखेन प्रस्तुतं शिवसारूप्यं गम्यं ३॥ ॥

समानधर्मा सदृशः सखा कश्चित् भविष्यति तृतीयं लोचनं भाले भविष्यतीत्यर्थः तदेकदेशतयेति शिवरात्रिमाहात्म्यप्रयुक्तत्वे हेतुः तच्च वर्ण्यते तद्वाच्यं राम॰
उदाहृतकाव्यवाच्यं एवं चैकदेशे एकदेशभावसंबंधनिबंधनत्वमत्र दर्शितं ३॥ ॥ ॥ ५५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वहंतीति भगवत्याः सीमंतवर्णनमिदं अपिशिवेन व सीमंतसरणिः नंक्ते संततनोत्थितप्चयः कीदृशी सिंदूरं वहंती किमिव प्रवलानां केशपाशरूपांधकारंदी
प्तीनां समूहै र्वंदीकृतं बालार्ककिरणमिव सरणिः केव तद्वदनसौंदर्यलहरीणां परिवाहरूपा स्रोतः सरणिरिवेति परीवाहो जलनिर्गममार्गः ज
लोछ्वासाः परीवाहा इत्यमरः अंगेति विरहसंतापवर्णनं अंगसंबद्धं मृणालकांडं भृंगेभ्योतिशीघ्ररहितां तत्समीपं रूच कांतिमयते प्राप्नोति तापाति

यथावा वहंती सिंदूरं प्रबलकवरीभारतिमिरत्विषां वृंदै र्वंदीकृतमिव नवीनार्ककिरणं तनोतु क्षेमं नस्तव वदनसौंदर्यलहरी लहरी२
परीवाहस्रोतः सरणिरिव सीमंतसरणिः अत्र वर्णनीयत्वेन प्रस्तुतायाः सीमंतसरण्यो वदनसौंदर्यपरीवाहत्वोत्प्रेक्षणेन परिपु
र्णतरागवत्परिवाहकारणीभूता तस्यातिशयांतीवदनसौंदर्यसमृद्धिः प्रतीयते सापि वर्णनीयत्वेन प्रस्तुतैव यथावा अंगासंगि
मृणालकांडमयते भृंगावलीभांरुचनाशामौक्तिकसिंदूरनीलसरणिं प्रकाशानिलाज्झाहते दत्तेयं हिमवालुकापि कुचयो र्धत्ते
कृशांदीपतांतप्तायःपतितातु करतले धारांतु संलीयते अत्र नायिकाविरहासहत्वातिशयप्रकर्षनाय संतापवत्तत्कार्याणि पा२
मृणालम्लानित्वादीन्यपि वर्णनीयत्वेन विवक्षितानीति तन्मुखेन संतापोऽवगम्यः यत्रकार्यमुखेन कारणस्यावगतिरपि ने

वहानतत्त्वायमलंकारः ४॥॥

धायेन मलिनीभावात् नाशामौक्तिकं प्रकाशानिलादस्तु श्लाघ्येतोरिंद्रनीलमणेः पदवीत त्साम्यंगाहते प्राप्नोति यथा कुचयोर्ह्युन्नानि हितेयं हिमवालु
काकर्षंकृशांदीपरूपतां धत्ते। एवं करतले धारारूपेण सिक्तं जलं तप्तायःपिंडवत्तत्क्षणवत्संलीयते तापातिशयात् शोषं प्राप्नोतीत्यर्थः उ
दाहरणद्वयेपि कार्याणिते धनतत्वयुक्तं नतत्वायमिति द्वयोरपि वाच्यत्वादिति भावः अयमित्युपलक्षणं अप्रस्तुतप्रशंसापि नेति बोध्यं ४॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

किंकृतस्तर्हि तत्र चमत्कारोऽत आह किंत्विति परीति रत्नावल्यां स्वविरहातुरायाः सागरिकायाः शयनमुपगतः स राजेयमुक्तिः इदं बिसिनीपत्रशयनं कृशांग्याः संतापं वदत्यनुमापयति किंभूतं पीनस्तनजघनसंगादुभयत ऊर्ध्वाधोभागयोः परिम्लानं तनोः कृशाया मध्यस्य परिमिलनं संघर्षमप्राप्य अंतर्मध्यभागे हरितवर्णं एवं प्रकर्षेण शिथिलयोर्भुजयोराक्षेपैश्चलनैश्च व्यस्तः विषमीकृतो न्यासो रचना यस्य तादृशमिति॥ ॥इति प्रस्तुतांकुरप्रकरणं॥ ॥पर्यायोक्तमिति वचः प्रतिपादनं भंग्यंतराश्रयं भंग्यंतरप्रकारकं लक्षणं परिष्कुरुते यदेवेति तथा च विवक्षितस्य प्रकारातिरिक्तेन चारुतरेण रूपेण व्यंग्यस्याभिधानं पर्यायोक्तमिति लक्षणं पर्यायेण भंग्यंतरेणोक्तमभिहितं व्यंग्यं यद्वेति व्युत्पत्तेः लक्षणे स्वपदं व्यंग्यपरं न च व्यंग्यस्यैव वाच्यत्वेनि

किंत्वनुमानमेव यथा परिम्लानं पीनस्तनजघनसंगादुभयतस्तनोर्मध्यस्यांतः परिमिलनमप्राप्य हरितं इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशांग्याः संतापं वदति बिसिनीपत्रशयनं ननु प्रस्तुतकार्याभिधानमुखेन कारणगम्यत्वमपि प्रस्तुतांकुरविषयश्चेत् किं तर्हि पर्यायोक्तमित्याकांक्षायामाह ऽपर्यायोक्तं तु गम्यस्य वचो भंग्यंतराश्रयं नमस्तस्मै कृतो येन मुधा राहुवधूकुचौ ६० यदेव गम्यं विवक्षितं तस्यैव भंग्यंतरेण विवक्षितरूपादपि चारुतरेण रूपांतरेणाभिधानं पर्यायोक्तं उत्तरार्द्धमुदाहरणं अत्र भगवान्वासुदेवः स्वासाधारणरूपेण गम्यः राहुवधूकुचवैयर्थ्यकारकत्वेन रूपांतरेण स एवाभिहितः ५॥॥

फलं विरुद्धं चेति वाच्यं प्रकारभेदात् तदुक्तं मम्मटभट्टैः यदेवोच्यते तदेव व्यंग्यं यथा तु व्यंग्यं न तथोच्यत इति चारुतरेणेति विशेषणात् नमो राहुशिरश्छेदकारिणे दुःखहारिणे इत्यत्र न पर्यायोक्तप्रसंगः स्वासाधारणरूपेण वासुदेवत्वेन तन्नुशिरश्छेदकारित्वरूपव्यंग्यमादायैव पर्यायोक्तं वक्तुमर्हं न तु विशेषणासामर्थ्यलभ्यं वासुदेवत्वमादायेति तदुक्तं राहुशिरश्छेदकारित्वस्य वाच्यसिद्ध्यंगत्वेन तेनापि व्यंग्यं विवक्षितं प्रधानभूतं वासुदेवत्वमादायैव तत्कथनौचित्यात् राहुस्त्रीकुचवैफल्यकारिणा हरये नम इत्यत्र तु राहुशिरश्छेदकारित्वमेव विवक्षितं व्यंग्यमिति युक्तं तदादाय पर्यायोक्तमिति विभावनीयं ५॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोकमिति यस्मात्कृपादस्यांघ्रिः लोकं पश्यतीति अथवा यः लोकः यस्य पतंजलेः शेषावतारस्यांघ्रिं न पश्यति उरगत्वात् ताभ्यां कृपादपतंजलिभ्यां अपरिछे
द्या अनाकलनीया निवेद्यतामिति न लभते इदमयं तात्पर्यार्थः तव अत्यद्भुतमनः कर्तृ शिरीषकलिकामृदुलाम् इमाम् नमयन् अयं तो इमौ पादौ किं पदूरपर्यंतं यथा सेनिधात
मिह्युतिहं तरवेदे एतन्निवेद्यतां कथ्यतामित्यर्थः वेदे देवमिति देवता सार्वभौमं सकलदेवताधीश्वरं देवं वदे कीदृशं जलधिरेव शारधिस्तं तस्य तथा भूतं त्रिपुरसंहा

यथा वा लोकं पश्यति यस्यांघ्रिः स यस्यांघ्रिं न पश्यति ताभ्यां पपरीछेद्यावित्यावि स्वगुणोस्तव अज्ञातो नमः पतंजलि स्वस्वा
धाराणां रूपाणां तथा रूपे तो णाधिहितौ यथा वा निवेद्यतां हं नमस्कार्यपर्यंतो शिरीषकोमलस्मितमानं पादौ किं पदूरमियोप श्री
८ यासे निधिस्तते तउ ऊर्ध्व मनले अवकिं पदूरं जितमिवेति नमस्काराय पांतराणामिहहितः देवं वदे सलधिशारधिं देवतासार्वभौमं
आस स्वप्ना भुवनविहितापसवाहामिवाराः भणापेरामुवननयराणकाष्णवारीशारीपानाः शतमसलवगतासुरंदनपुर्यतांमः ९

देशरीकृतस्य विसोर्विश्रांतिस्थानत्वात् तथा भुवनेषु विदितौ ख्याताः आस्तः प्रष्टोऽग्योयेषां ते बासवमुखा वषिष्ठाद्याः यस्य वाहानां वाहनानां वेदानां अधिवा
हाः वाहनाधिकृता भवंति पुरोगाग्रे सर पश्चाग्रतः सरपुरःसराउत्तमरः एवमधरभुवनेषां तालं भ्रष्टशापे टिकाः दिक्पालाः शारीपालनाधिकृताः दिगंबर
त्वेन दिशामेव शारीरूपत्वात् मनोभूस्तंदनतरुः चंदनस्थानीय भस्मसंवेधित्वात् मदनभस्मना शिवे तां गात्रे मनुलेपनस्यपुराणो पुष्पसिद्धेः ६॥ ॥

×सर्पभूषणत्वात् पुष्कराका पुष्पवाटिका पुष्पस्थानीयं चंद्रो द्रुमाधारत्वात् तमस्वंदृश
मुस्वा अस्मादयो ×

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ ५१ अथ र्लक्ष्याणां संगमयति अत्रेति व्यवस्थितौ विवक्षायां सत्यां अवगम्याः चापाः विनेयत्वेति शिक्षणीयत्वेत्यर्थः आदिना पाताजगुप्सत्वादिपरिग्रहः अभिहिताइ
ति वाहाद्यभिहितत्वादिना व्यासादिप्रतिपत्तौ समानाविति वेद्यत्वेन व्यासादिविनेयत्वादेरपि तेष्ववगमादिति भावः साक्षादेव व्यासादिविनेयत्वाद्याकारेण किमि
ति न निर्दिष्टमित्याशंक्याह परंत्विति यद्यप्युक्तविशेष्यविशेषणभावेऽपि देवतासार्वभौमत्वमवगम्यते तथापि स्फुटप्रतिपत्त्यर्थं तद्वैपरीत्यं कृतमित्यर्थः चकेति·
यो देवः स्वदर्शनवक्तृत्वाभिधानेऽपि प्रसभं अज्ञातपैवराक्रवभ्रूजनतस्य स्वरतो तत्वं आलिंगनस्य उद्दामाउद्दराये विलासाक्षिवैधव्यरहिते चुंबनमात्रावशेषं चकारेत्यत्र

अत्र यत्वदेशः नाहः पुत्तंगमाप्रणानि रक्षास्थितत्वाच्छा स्वार्थस्य च व्यवस्थितौ वेदत्वाद्याकारेणावगम्यत्वे वेदाः सो व्यासप्रभृतिवि
नेयत्वाद्याकारेणाभिहिताः प्रत्युत देवतासार्वभौमस्य स्फुटीकरणाय विशेषणविशेष्ययोर्व्यत्यासेन सम्यगभिहिताः शूलेनैकार्थसंघ
टनामाश्रित्य योजनायामप्युक्तप्रकारेणान्वयेऽपि अनयोरेव विशेषणविशेष्यभावो विवक्षितो न विपर्ययः
कार्याकारेणाभिधानमस्य आलिंगनादेरनिवृत्तत्वं प्रतीयते चुंबनमात्रशेषं ... ...
न विशिष्टेन रतोत्सवेन नराशिरश्छेदकारिणा फणिनाऽपि ... देवतासार्वभौमस्य ... अभिधाने अनुपपत्तिमाशंक्य योजनायां ...

यः विशिष्टेन उक्तविशेषणविशिष्टेन एवं च ईदृशोदाहरणायोजनेव अनुपपन्नेति मिति गम्यस्य राहुशिरश्छेदस्य भंग्यंतरेणानभिधानादयानिमाशंक्ये
त्यर्थः अभिधानायोगादिति· अयमाशयः अत्र हि राहुशिरश्छेदकारी तिवास्तुदेव इति वाच्यं परावृत्तवधूजनसंबंधिता दृशरतोत्सवकारित्वेन प्रकारांतरेणा
भिधीयत इति न वक्तुं शक्यं धर्मिणो वास्तुदेवस्य प्रक्रांतत्वेन यच्छब्देनाभिहितत्वेन च भंग्यंतरायोगात् भंग्यंतरस्य च राहुशिरश्छेदकारित्वस्य वास्तुदेवत्वस्य वा
धर्मस्य प्रकारांतरेणानभिधानात् तस्मात्पर्यायेण कार्यादिद्वारेणोक्तं गम्यमाक्षिप्तमेवेति लक्षणार्थ इति अभिधानं आक्षेपो व्यंजनं वा ७॥ ॥ गम॰ ५७

५ सू॰ ३५ धानायोगात् कार्यादिद्वारेणोक्तं वाच्यं न तत्र क्रमाद्विवक्षितं पतिवक्रत्वं क्षिप्तं गम्यमायोजितं ५

'गम्य वक्तृ पवि [illegible]
व प्र पु [illegible] अभिधाना
नार्थ;

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पर्यायोक्तमिति क्वचित्पर्यायोक्तइतिपाठस्तत्वयुक्तः व्यंग्येनोपलक्षितमुक्तमितिव्याख्यानग्रंथविरोधात् नविग्रहइति यत्त्वत्राभिहितस्यापिभगवतोवासुदेवत्वादिनारूपांतरेणाव्यंग्यतयायथाश्रुतेबाधोक्ताभावादितिभावः नचाभिधाविषयेकथंव्यंजनेतिवाच्यं वासुदेवत्वादिनाप्रतीयमानेभगवत्यभिधाविषयत्वासंभवात् तस्याःस्वावच्छेदकधर्मेणैवबोधकत्वात अतएवोक्तं शक्यादन्येनरूपेणज्ञातेभवतिलक्षणेति इहतुलक्षणाहेत्वभावाद्व्यंजनोपग

लोचनकृतापिपर्यायोक्तंयदन्येनप्रकारेणाभिधीयतेइतीदमेवलक्षणमंगीकृत्यतदुदाहरणेचकार्येणशाब्दाभिहितेतत्कारणं व्यंग्यंसम्यक्प्रदर्श्यतत्रलक्षणेलक्ष्यनामचक्लिष्टगत्यायोजितोवाच्यादन्येनप्रकारेणाव्यंग्येनोपलक्षितंसयदभिधीयतेतत्पर्यायेणप्रकारांतरेणव्यंग्येनोपलक्षितंउक्तमितिसर्वोयंक्लेशःकिमर्थमितिनविग्रहः दर्शितानिहिगम्यस्यैवरूपांतरेणाभिधानेबहून्युदाहरणानि चक्राभिघातप्रसभाज्ञयेतिप्राचीनोदाहरणमपिस्वरूपेणगम्यस्यभगवतोरूपांतरेणाभिधानसंभवात्तुयोजनमेव यत्तुतत्रराहुशिरश्छेदावगमनंतत्रप्रागुक्तरीत्याप्रस्तुतांकुरएव ८ ॥ ॥

म्यतइति ननुप्रस्तुतेनतादृशरतोत्सवरूपेणकार्येणाप्रस्तुतस्यैवराहुशिरश्छेदरूपकारणस्यप्रतीतौचमत्कृतिविशेषस्तस्याऽलंकारत्वंगमयतितेत्वालोच्यमानमप्रस्तुतप्रशंसायाअसंभवादुक्तरीत्यापर्यायोक्तरूपतयैवस्वीकर्तव्यमित्याशंक्याहयत्त्विति अलंकाराणामियत्तानियमाभावेनप्रस्तुतांकुरस्याप्यलंकारांतरत्वादेवंविधशाब्दस्वारस्यभंगेनप्राचीनलक्षणव्याख्यानमयुक्तमितिभावः ८ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कुटी॰ ५८

संक्षेपतो दर्शितमपि पर्यायोक्तविषयं विशदयति प्रकृतेनेत्यादिना । रूपांतरेणोपपादिते सतीत्यर्थः । यत्तु भगवद्रूपेणागमनं विशेषणमर्यादालभ्यते नास्तं
दरेन पर्यायोक्तस्य विषय इति तदविचारितरमणीयं नहि पर्यायोक्ते व्यंग्यस्य सौंदर्यकृतो विच्छित्तिविशेषः किंतु भंग्यंतराभिधानकृत एव व्यंग्यं तु भंग्यंत
राभिधानतोऽस्तु दूरमेव ज्ञायशो दृश्यते । यथा इहागंतव्यमिति विवक्षिते व्यंग्ये पञ्चपदेशोऽलंकरणीयः सफलतामुपनेतव्य इत्यादौ वक्तव्यदस्तु दूरे त्वोद्भा
वनमकिंचित्करमेव अलंकारसर्वस्वकारग्रंथविरोधोद्भावनं तु तच्छिक्षाकारिणां प्रतिभाशोभते उपजीव्यत्वोद्भावनमपि ग्रंथस्याकिंचित्करमेवेत्युक्तं

प्रकृतेन राहोः शिरोमात्रावशेषणेनालिंगने वंध्यत्वापादनरूपेण वाच्ये भगवतो रूपांतरेणोपपादिते भगवद्रूपेणागमनं पर्यायो
क्तस्य विषयः पर्यायोक्तं तदप्याहुः यद्व्याजेनेष्टसाधनं यामि चूतलतां द्रष्टुं युवाभ्यामास्यतामिह अत्र नायिकां नायकेन संगम
य्य चूतलतादर्शनव्याजेन निर्गच्छंत्या सख्या तद्वाञ्छितसंपादनरूपेष्टसाधनं पर्यायोक्तं यथा वा देहि मत्कंदुकं राधे परिधाननिगू
हितं इति विसृष्टप्रजीवीतस्याः कृष्णोऽभ्युदेत्तवः पूर्वत्र परेष्टसाधनमत्र कंदुकमुद्राम्रोधनार्थिनी वीविस्रंसनव्याजेन स्वेष्टसा
धनमिति भेदः ९ ॥ ॥

विरोध इति परोत्कर्षासहिष्णुत्वमात्रमुद्भावयितुरवगमयतीत्यलं विस्तरेण । प्रकारांतरेण पर्यायोक्तं लक्षयति पर्यायोक्तमिति रमणीयेन व्याजेन मि
षेण स्वस्य परस्य वा इष्टस्य यत्साधनं संपादनं तदपि पर्यायोक्तं पर्यायेण व्याजरूपेणोक्तं यत्रेति व्युत्पत्तेः संपादनेति संपादनरूपं यदिष्टं तत्साधनं त
त्करणमित्यर्थः देहीति परिधानेन अधरवस्त्रेण निगूहितं आच्छादितमित्यर्थः एवं च प्रकारद्वयसाधारणं तदन्यतरत्वसामान्यलक्षणं बोध्यं राम॰ ५८
॥ ॥इति पर्यायोक्तप्रकरणं॥ ॥ ९ ॥ ॥ ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उक्तिरिति अत्र निंदास्तुतिभ्यामिति स्तुतिनिंदयोरिति चेतरेतरयोगेन विवक्षितः तथा च निंदया स्तुतेः स्तुत्या च निंदायाः स्तुत्या स्तुतेः स्तोः उक्तिरभिव्यक्तिर्व्याज
स्तुतिरित्यर्थः इयमेव व्याजेन स्तुतिरिति वा समासो व्याजरूपा स्तुतिरिति च मुख्यत्वेः अत एव व्याजस्तुतिपदार्थानुगमाभावान्निंदया निंदाभिव्यक्तिर्व्याजनिंदाख्य
मलंकारांतरमित्यग्रे वक्ष्यते एवमाद्ये प्रकारद्वये स्तुतिनिंदयोः समानविषयत्व भिन्नविषयत्वाभ्यां प्रत्येकं द्वैविध्यमिति चत्वारो भेदाः अन्यस्तुति भिन्नविषयस्तु

उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यां स्तुतिनिंदयोः कः स्वर्धुनि विवेकस्ते पापिनो नयसे दिवं ८१ साधु दूति पुनः साधु कर्तव्यं किमतः परं य
न्मदर्थे विलूनासि दंतैरपि नखैरपि ८२ निंदया स्तुतेः स्तुत्या निंदः पाका अत्र गमनेव्याजस्तुतिः कः स्वर्धुनीत्युदाहरणे विवेको ना
स्तीति निंदाव्याजेन गंगायाः स्तुतिवदेव महापातकिनोपि स्वर्गं नयतीति तत्स्वभावातिशयस्तुतिः साधु दूतीत्युदाहरणे मदर्थमियंतं क्ले
शमनुभूतवत्यसि दूतिव्याजरूपया स्तुत्या मदर्थं न गतासि किंतु रंतुमेव गतासि धिक् त्वां दूतिकाधर्मविरुद्धकारिणीमिति निंदावगम्य
ते यथा वा कस्ते शौर्यमदो योद्धुं त्वय्येकं संप्रति मास्थिते सप्तस्वपि समासरूढा भवंति परिपंथिनः ११ ॥ ॥

८२

न्निकस्य कस्येवेति पंच भेदाः लक्षणं तु व्याजनिंदाभिन्नत्वे सति स्तुतिनिंदान्यतरपर्यवसायि स्तुतिनिंदान्यतरत्वं सर्वानुगतं बोध्यं कस्तइति नृपं प्रति कवेरुक्तिः
त्वयि योद्धुमेकं संप्रति मास्थिते आस्कंदे संप्रति परिपंथिनः शत्रवः समासन्नसमारूढा भवंतीत्यन्वयः सप्त समुद्रास्तेषां समाहारः सप्तसमुद्रीत्यर्थः सप्त च ते समुद्राः सप्तसमुद्रास्तत्र समारूढा
इति द्वितीयार्थो निंदा घोतकः त्वया सप्तसमुद्रा हताः सूर्यमंडलमित्यादिवत्पुनरागता इति स्तुतौ पर्यवसाने १ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ अर्धमिति शिवस्य देहार्धं दानवानां वैरिणा हरिणा आहृतं हरिहरात्मकस्यैकस्य विग्रहस्य प्रसिद्धेः एवं गिरिजया अपि अवशिष्टार्धमाहृतं हे देव राजन्नित्य
५९ मुक्तप्रकारेण जगतीतले स्मरहरस्याभावे समुन्मीलति प्रकाशमाने सति गंगा सागरं प्रत्यगमदित्याद्यन्वयः नागाधिपः शेषः क्ष्मातलं पातालं त्वामि
ति सर्वान्वितः चेद्बुधादीति विद्वदादीत्यर्थः आदिना तपःशीलादिपरिग्रहः दारिद्र्यादीत्यादिपदेन कुटुंबबाहुल्यादिपरिग्रहः नचात्र राजवर्णनप्रस्ता
वे कथमस्तुतेर्व्याजरूपत्वमिति वाच्यं स्तुतिपर्यवसानविवक्षायां स्वकीयभिक्षाटनोद्घाटनस्यासंगतत्वेन स्तुते रूक्षनिंदारूपोपालंभपर्यवसानस्यानुभ

अर्द्धं दानववैरिणा गिरिजयाप्यर्द्धं शिवस्याहृतं देवेत्थं जगतीतले स्मरहराभावे समुन्मीलति गंगा सागरमंबरं शशिकला नागाधिपः क्ष्मा
तलं सर्वज्ञत्वमधीश्वरत्वमगमत्त्वां मां च भिक्षाटनं अत्राद्योदाहरणे समस्तमपि पद्यगतस्तोषमूलनिंदाव्याजेन स्तुतिर्गम्यते द्वितीयोदाहर
णे सर्वज्ञः सर्वेश्वरोसीति राज्ञः स्तुत्या व्याजरूपया मदीयवैदुष्यदारिद्र्यादि सर्वं जानन्नपि कल्पदानेन रक्षितुं शक्तोपि न ददासीति निंदा
व्यज्यते सर्वमिदं निंदास्तुत्योरेकविषयत्वे उदाहरणं भिन्नविषयत्वेन निंदया स्तुत्यभिव्यक्तिर्यथा कस्त्वं वानर राम राजभवने लेखार्थसं
वाहको यातः कुत्र पुरागतः स हनुमान्निर्दग्धलंकापुरः बद्धो राक्षससूनुनेति कपिभिः संताडितस्तर्जितः सव्रीडात्तपराभवो वनमृगः कुत्रेति
न ज्ञायते अत्र हनुमन्निंदया इतरवानरस्तुत्यभिव्यक्तिः १ ॥ ॥

वसिद्धस्याविरुद्धत्वात् कस्त्वमिति अंगदं प्रति कस्यचिद्राक्षसस्य प्रश्नः राम रूपस्य राज्ञो भवने लेखार्थस्य संदेशस्य वाहकोस्मीत्युत्तरं पुरा पूर्वमागतः निर्द
ग्धलंकापुरः स हनुमान् कुत्र यात इति पुनः पूर्वस्य प्रश्नः बद्ध इत्यादि उत्तरं अंगदस्योत्तरं राक्षसरावणस्य सूनुना बद्ध इति हेतोः कपिभिर्वानरैः सं राम॰
ताडितस्तर्जितः स वनमृगः हनुमान् व्रीडया लज्जया आत्तः प्राप्तः पराभवो येन तादृशः कुत्र यात इति न ज्ञायत इत्यन्वयः १॥ ॥ ॥ ५९

सुधा स्तुते ष्व्रगम्पे ते व्याजस्तुतिरुदाहृता ॥ धन्योसि भृंग यत्संतन्मुखद्युतिं चुंब
ति
५९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यदिति हे कुरंग यद्यस्मात् धनिनां मुखं मुहुर्वारंवारं नेत्रसंकोचेन पश्यसि· वृथा मिथ्या चाटु प्रियवचनं न वदसि· यदिति सर्वत्र संबध्यते एषां धनिनां गर्वयुक्तं वचनं न शृणो
षि तान् धनिकान् प्रति आशया धनाशया न धावसि परं केवलं काले क्षुधासमये बालतृणानि खादसि निद्रायां आगमे च निद्रां प्राप्नोषि तत्तस्मात् कुत्रत्यं किं नाम तपस्त
प्तं तत् ब्रूहीत्यन्वयः निर्विण्णस्य खिन्नस्य तेन हीत्यस्य इति भृत्यादितमितस्य ग्रेतननान्वयः कल्हारं जलजपुष्पविशेषः तत्संबंधिनः काल्हाराः स्तवयंतीति स्तवकास्त

त्पानिंदाभिव्यक्तिर्यथा यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून्मृषा नैषां गर्ववचः शृणोषि न च तान्प्रत्याशया धावसि काले बालतृ
णानि खादसि परं निद्रासि निद्रागमे तन्मे ब्रूहि कुरंग कुत्र भवता किं नाम तप्तं तपः अत्र हरिणस्तुत्या राजसेवानिर्विण्णस्यात्मनो निंदाव्य
ज्यते अयमप्रस्तुतप्रशंसाविशेष इत्यलंकारसर्वस्वकारः तेन हि सारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणानंतरं वैधर्म्येणाप्युदाहृत्य ते यथा।
धन्याः खलु वने वाताः काल्हाराः स्तवशीतलाः राममिंदीवरश्यामं ये स्पृशंत्यनिवारिताः अत्र वाता धन्या इत्यप्रस्तुतार्थाद्दहमधन्य इति वै
धर्म्येणाप्रस्तुतार्थः प्रतीयत इति भृत्यादितं इयमेव अप्रस्तुतप्रशंसा न कार्यकारणनिबंधनेति दंडी अप्रस्तुतप्रशंसा स्यादप्रकांडे तु या स्तु
तिः सुखं जीवंति हरिणा वनेष्वपरसेविनः अर्थैरयत्नसुलभैर्जलदर्भांकुरादिभिः सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते राजानुवर्तन
क्लेशनिर्विण्णेन मनस्विनेति वस्तुतस्त्वत्र व्याजस्तुतिरित्येव युक्तं स्तुत्या निंदाभिव्यक्तिरित्यप्रस्तुतप्रशंसातो वैचित्र्यविषयविशेषसद्भावा
त् अन्यथा प्रसिद्धव्याजस्तुत्युदाहरणेष्वप्रस्तुताभ्यां निंदास्तुतिभ्यां प्रस्तुते स्तुतिनिंदे गम्येते इत्येतावता व्याजस्तुतिमात्रमप्रस्तुतप्रशं
सा स्यात् ३॥ ॥

ते शीतलाः अन्ये त्वर्थाः अप्रकांडे अप्रस्तावे तथा चाप्रस्तुता चासौ प्रशंसा चेति भृत्यन्निरितिनिमाद्भः न परसेविनो अपरसेविनः प्रशस्यते स्तूयते मनस्विपम्लरस
वीजं दर्शयति वस्तुतस्त्विति अभिव्यक्तिरिति यो अप्रस्तुतप्रशंसातो वैचित्र्यस्य विषयस्य आलंबनभूतो विशेष इत्यन्वयः अन्यथा गतो वैचित्र्येऽपि तदंतर्भावांगीकारे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰ नं॰ एवं चेति अन्यगतस्तुतिनिंदाभ्यामन्यगतनिंदास्तुत्योरभिव्यक्तौ व्याजस्तुतिरिति सिद्धौ चेत्यर्थः प्रक्रियया प्रकारेण शिखरिणीति नायिकां प्रति नायकस्योक्तिः
९० हे तरुणि असौ शुकशावकः नाम वितर्के क नु कस्मिन् शिखरिणि पर्वते कियत्कालं चिरं किमभिधानं किं नामकं तपः अकरोत् येन हेतुना अमुना अधरवत् पाटलं रक्त
वर्णं बिंबफलं दशतीत्यन्वयः इति व्याजस्तुतिप्रकरणं व्याजनिंदां लक्षयति निंदाया इति यत्रान्यनिंदयाऽन्यस्य निंदाया अभिव्यक्तिः पर्यवस्यति सा व्याजनिं
दा एतन्निंदाव्याजेन निंदेति व्युत्पत्तेः विधे इति हे विधे ब्रह्मन् त्वया कृशं एतत् तत् एकमेव शिरो यः अहरत् छिन्नत् स एवार्थो हरो निंद्य इत्यन्वयः निंदयेत्यभिव्यंग्ये

एवं वानया प्रक्रियया चैत्राद्यन्यगतस्तुतिविवक्षयान्यस्य स्तुतिः क्रियते तत्रापि व्याजस्तुतिरेवान्यस्तुतिव्याजेन तदन्यस्तुतेरिति अर्था
नुगमस्तत्र भावात् यथा शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः तरुणि येन तवाधरपाटलं दशति बिंबफलं शुक
शावकः अत्र शुकशावकस्तुत्या नायिकाधरसौभाग्यातिशयस्तुतिर्व्यज्यते निंदाया निंदया व्यक्तिर्व्याजनिंदेति गीयते विधे स निंद्यो
यस्ते प्रागेकमेवाहरच्छिरः अत्र हरनिंदया विषमविपाकं संसारं प्रवर्तयतो विधेर्निंदाभिव्यज्यमाना व्याजनिंदा यथा वा विधिरेव विशेषगर्ह
णीयः करट त्वं रटकस्तवापराधः सहकारतरौ च कारयो यो सहवासं सरलेन कोकिलेन अन्यस्तुत्यान्यस्तुत्याभिव्यक्तिरिति पंचमप्रकार
व्याजस्तुतिप्रतिद्वंद्वीभूतेयं व्याजनिंदा ४ ॥ ॥

त्यनेनान्वितं निंदयाभिव्यंग्या विधेर्निंदा व्याजनिंदेत्यन्वयः विषमविपाकं दारुणपरिणामं विधिरेवेति विशेषतो गर्हणीयः निंदनीयः हे करट काक त्वं रटर
टं कुरुष्व सो विधिः आम्रवृक्षे सरलेन सौम्येन कोकिलेन सह वासं तव च कारेत्यन्वयः ननु केनाप्यालंकारिकेणानुक्ताया व्याजनिंदायाः कथमलंकारत्वेनांगी
कारणमित्याशंक्याह प्रतिवंदीति तुल्ययुक्त्या प्रतिवंदीस्थानीयेत्यर्थः तथा च स्तुतिवन्निंदायामपि प्रस्तुतप्रशंसातो वैचित्र्यविशेषान्न दूष्यं नंतर्भावे व्याज राम॰
स्तुतौ चार्थानुगमाभावादनंतर्भावे पृथगलंकारता या औचित्यायाततत्वात्प्राचीनैरनुक्तापि स्वीकर्तुमुचितेत्याशयः ५ ॥ ॥ ॥ ९०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥आभासत्व इति विरोधस्य आभासत्वे आपाततो भासमानत्वे सति विरोधाभासो नामालंकारः आभासत इत्याभासः विरोधस्याभासो वाभास इति व्युत्पत्तेः ईषदर्थके
नञाङ्गाभानस्यापाततस्पष्टत्वमर्थान्तरपरिहार्यत्वरूपं बोध्यते तथा चैकाधिकरणेन प्रतीयमानयोः कार्यकारणत्वेनाशृत्यमानयोर्धर्मयोराभासमानाः
पर्यवसन्नविरोधित्वं लक्षणं बोध्यं शानिरशोनिश्चुतत्वद्वैरित्यादावतिव्याप्तिवारणाय द्वितीयं विशेषणं अप्पलाकृरसासिक्तंभकीत् द्वरणं द्वयमिति विभावनाया
स्तापद्वितीयं पर्यवसितस्य विरोधस्य दोषत्वादपर्यवसन्नत्वविरोधविशेषणमिति दिक् श्लेषेति हारो रत्नयोरस्तीत्यर्थे विरोधः मनोहारिणाविलत्यर्थेन तत्परि
हारः प्रतीयेति तस्मात्रजातभयेन कृत्वा प्रतिकूलत्वं परैरिव विरुद्धधर्मैरपि भेत्तृता भेदकारितात्युक्ता किमित्युत्प्रेक्षा यस्मात्स्तनलः आमित्राणां शत्रूणांज

आभासत्वे विरोधस्य विरोधाभास इष्यते विनापि तन्वि हारेण वक्षोजौ तव हारिणौ ६८ अत्र हाररहितावपि हारिणाविति श्लेष
मूलको विरोधाभासः यथा वा पतीयभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्तृतोज्झिता अमित्रजिन्मित्रजिदोजसा सयद्विचा
रदृक्चारदृगप्यवर्तत अत्र विरोधसमाधानोत्प्रेक्षाशिरस्को विरोधाभास इति पूर्वस्माद्भेदः ९॥ ॥

यद्यपि ओजसा मित्रस्य सूर्यस्य जेता अथ च मित्रजिदेव न मित्रजिदिति विरोधः चारदृष्टिरपि विचारे दृष्टिर्यस्य तादृशः विगतचारदृगिति च विरोधः॥विरो
धेति विरोधसमाधानरूपोत्प्रेक्षा शिरःप्रधानं यस्य तादृश इत्यर्थः यत्तु विरोधसमानात्मिकया मुखस्थितयोत्प्रेक्षया विरोधस्योत्थानमेव भग्नमिति कथमत्र वि
रोधालंकार इति केनचिदुक्तमात्मनापि विमनसैवाभिहितं तदसारं विरोधभानमन्तरेण विरुद्धधर्मैरपीत्यादावुत्प्रेक्षाया एवानुत्थानेन श्लेषमूलमाभासमा
नविरोधमुपजीव्यैव विरोधस्यागोत्प्रेक्षायाः अर्थान्तरानुगृहीतायास्तत्समाधानत्वेन पश्चादवस्थितत्वादिति॥ ॥इति विरोधप्रकरणम्॥ २॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु॰नं॰ विभावनेति प्रसिद्धकारणाभावेपि कार्योत्पत्तिर्विभावनालंकारः विभाव्यते कारणांतरं यस्यामिति व्युत्पत्तेः कारणाभावस्य शाब्दस्यार्थो वेति सर्वत्र लक्षणासम
६३ न्वयो बोध्यः एतदेव तंत्रेण सकलविभावनाप्रकारसाधारणं सामान्यलक्षणमाद्यप्रकारस्य विशेषलक्षणं च बोध्यं तत्राद्ये दर्शितमेव द्वितीयं तु कारणाविना
भावकथनपूर्वकं कार्योत्पत्तिकथनमित्युदाहरणविशेषबलादेव गम्यत इति विविच्य न दर्शितं प्रतिबंधके सति कार्योत्पत्तिरूपे तृतीयप्रकारे तु व्याप्तिकारणा
यान्वितेति तत्र प्रतिबंधकस्य वस्तुतः कारणाभावरूपस्य कथनेपि न कारणान्वितत्वेन कथनमिति तन्निरासः प्रकारपंचकेपि कारणान्विताभावस्यार्थ

विभावना विनापि स्यात्कारणं कार्यजन्म चेत् अप्यलाक्षारसासिक्तं रक्तं तच्चरणद्वयं ६६ अत्रालाक्षारससेककारणाभावेपि रक्तिमा क
थितः स्वाभाविकत्वेन विरोधपरिहारः यथा वा अपीतक्षीबकादंबमसंमृष्टामलांबरं अप्रसादितशुद्धांबु जगदासीन्मनोहरं अत्र
पानादिप्रसिद्धहेत्वभावेपि क्षीबत्वादि निबद्धं विभाव्यमानशरत्समयहेतुकत्वेन विरोधपरिहारः यथा वा चारुतनुकवरीविधायिना स्मर
भिन्नत्वेन नैरपाणिना अवचितकुसुमापि वल्लरी समजनि हंत निलीनषट्पदा वल्लर्यां पुष्पाभावेपि भृंगालिंगनं निबद्धं अत्र वरतनुक
बरीसंक्रांतसौरभनरपतिनखसंसर्गरूपहेत्वंतरं विशेषणमुखेन दर्शितमिति विरोधपरिहारः १ ॥ ॥

तोगम्यत्वात्कथनेति अप्यलाक्षेति लाक्षारसेन आसमंतात्सिक्तं लाक्षारसासिक्तं पश्चान्नञ्समासः तस्याः कामिन्याः अपीतेति अपीताः पानशून्याः क्षी
बा मत्ताः कादंबाः कलहंसा यत्र तथा असंमृष्टं समार्जनशून्यममलमंबरमाकाशं यत्र एवं अप्रसादितं वस्त्रगालनकतकक्षोदप्रक्षेपादिना यत्प्रसादनं तेन च्छुद्धमं
बु यस्मिंस्तदेवंभूतं जगन्मनोहरमासीदित्यन्वयः परमार्थतस्तु शुद्धांबुत्वेव कात्यादर्शे दृष्टः पाठः विभाव्यमानेति वर्ण्यमानेत्यर्थः वरेति वरतनोः राम॰
केशपाशरचनासंपादकेन अतएव स्मरभिन्नत्वेन राज्ञो हस्तेन अवचितकुसुमा लूनपुष्पापि लता हंत आसक्तभ्रमरा संजातेत्यर्थः १ ॥ ॥ ॥ ६३

हेतुत्वमिति असमग्रत्वे हेतुतावच्छेदकस्य धर्मस्य संबंधस्य वा वैकल्ये सतीति अस्त्रैरिति धर्मवैकल्योदाहरणं संबंधवैकल्ये उदाहरति उद्यानेति विलोचने कर्मभूते उदस्रयंतीति उन्नताश्रूणि कुर्वंतीत्यर्थः क्रियेति धात्वर्थताभिप्रायं स्पर्शनस्य संयोगरूपत्वात् इमां द्वितीयप्रकाररूपां विभावनां व्याजहारेति गुणजातिक्रियादीनां यत्र वैकल्यदर्शनं विशेषदर्शनायैव सा विशेषोक्तिरिष्यत इति ग्रंथेन व्यवहृतवानित्यर्थः एतेन प्रथमप्रकारात् द्वितीयप्रकारस्य

हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति मन्मथः ॥ अत्र जगज्जये साध्ये हेतूनामस्त्राणामसमग्रत्वे तीक्ष्णत्वादिगुणवैकल्यं यथा वा उद्यानमारुतोद्धूतचूतचंपकरेणवः उदस्रयंति पांथानामस्पृशंतो विलोचने अत्र बाष्पोद्गमनहेतूनां रेणूनामसमग्रत्वे स्पर्शनक्रियावैकल्यं इमां विशेषोक्तिरिति दंडी व्याजहार यतः प्रथमोदाहरणे मन्मथस्य महिमातिशयरूपो द्वितीयोदाहरणे चंपकरेणूनामुद्दीपकत्वातिशयरूपश्च विशेषः ख्यापित इति अस्माभिस्तु तीक्ष्णत्वादिवैकल्यमपि कारणवैकल्यरूपमिति विभावना दर्शिता । कार्योत्पत्तिस्तृतीया स्यात्सत्यपि प्रतिबंधके नरेंद्रानेव ते राजन्दशत्यसिभुजंगमः ॥ अत्र नरेंद्रा विषवैद्याः सर्पदंशप्रतिबंधकमंत्रौषधिशालिनः श्लेषेण गृहीता इति सत्येव प्रतिबंधके कार्योत्पत्तिः ॥ ३ ॥॥

वैलक्षण्यं दुरुपपादमिति वदंत्यपास्ताः वैलक्षण्याभावे हि प्राचामलंकारत्वेन कथनमसंगतानुपपन्नमेव स्यात् अस्ति च स्वरूपतः कारणाभावकथनात्कारणमात्रधर्मवैकल्यद्वारेण तद्विशिष्टकारणाभावकथने सहृदयसिद्धो विच्छित्तिविशेषः प्रकारांतरास्वीकारे लाघवमिति तु स्वीयलाघवोद्भावनमिति द्रष्टव्यमधिकेन कार्योत्पत्तिरिति प्रतिबंधके सत्यपि कार्योत्पत्तिकथनं तृतीया विभावना नरेंद्रो वार्तिके राज्ञि विषवैद्येपि कथ्यत इति विश्वः असिः खड्गस्तद्भु

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु०नं० चित्रमिति छत्रापएवतपनः सूर्यः आतपत्रं छत्रं तद्रहितमनातपत्रं आतपत्रेण सहितं सातपत्रं उदिते इति कस्यचिद्राजकुमारस्य प्रतापवर्णनं कुमाररूपे सूर्ये उदिते सति कोकः।
६४ पृथिव्यावलयं मंडलमेव कुवलयं कुमुदं पुष्पमंश्रप्नोति एतं कृत्रिम कुलं न भाति अथ च नक्षत्रं भातीति चित्रं तथा परेषां राजकुमाराणां करकमलानि मुकुलीभवंति मु
कुर्वंति अंजलिबंधानंदाकृतीनि च भवंतीत्यर्थः अविवेकीति विवेको विशेषदर्शनं विश्लेषश्च तच्छून्यं परस्परं संश्लिष्टत्वात् कुचयुगं कर्तृजगत्रयं हृद्वं नाम क्षति
वैदः कर्णश्च श्रवणयोः परिचयः यश इति करस्य दानेत्वाकृत्यतरुः अत्र पयोधिजन्याकल्पतरोः कारणस्य पयोधेरुत्पत्तिः षष्ठी विभावना ज्ञातेति जातु कदाचित् क
नकलतेव कनकलताका मितिवी गिरिद्वयमिव स्तनद्वयं॥ ॥इति विभावनाप्रकरणं॥ ॥३॥ ॥विशेषोक्तिं लक्षयति कार्याजनिरिति पुष्कलेसह कारिसंपन्ने कारणे

यथा वा चित्रं तपति राजेंद्र प्रतापतपनस्तव अनातपत्रमुत्सृज्य सातपत्रं द्विषज्जनं अकारणात्कार्यजन्म चतुर्थी स्याद्विभावना शंखाद्वीणानिनादोय
मुदेति महदद्भुतं ६९ तत्रांगत्वेन कामिनीकंठकंठीनादत्वेन तन्नीतेचाध्यवसीयते इति अकारणात्कार्यजन्म विरुद्धात्कार्यसंपत्तिर्दृष्टा काचिद्विभाव
ना शीतांशुकिरणास्तन्वी हंतसंतापयंतितां ७० अत्र तापनिवर्तकतया तापविरुद्धैरिंदुकिरणैस्तापजनिरुक्ता यथा वा उदिते कुमारसूर्ये कुवलयं मुकुल
मतिभातिनक्षत्रं मुकुली भवंति चित्रं परराजकुमारपाणिपद्मानि यथा वा अविवेकि कुचं द्वंद्वं हंतु नाम जगत्रयं श्रुतिप्रणायिनोरक्ष्णोरयुक्तं जनमार
णं स्वर्वैदाहरणे योः कारणानिरोधित्वं सम्भाविकमिहश्रुतिप्रणायित्वस्वरूपागंतुक गुणाश्रयुक्तमितिभेदः कार्यात्कारणजन्मापि दृष्टा काचिद्वि
भावना यशः पयोधिरभवत्करकल्पतरोस्तव ७१ यथा वा जाता लता हि शैले जातु लतायां न जायते शैलः संप्रति तद्विपरीतं कनकलतायां गिरिद्वयं
जातं ३॥ ॥कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे हृदिस्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि ७२ यथा वा अनुरागवती संध्या दिवसस्तत्पुरः
सरः अहो दैवगति श्चित्रा तथापि न समागमः असंभवोर्थनिष्पत्तेरसंभाव्यत्ववर्णनं को वेद गोपशिशुकः शैलमुत्पाटयेदिति ७३ यथा वा अयं वारामेको ४२
निलय इति रत्नाकर इति श्रितोस्माभिस्तृष्णाकवलितमनोभिर्जलनिधिः क एवं जानीते निजकरपुरीकोटरगतं क्षणादेनं तन्नाम्यन्निमिमकरमापास

सति प्रसिद्धकारणसमूहे सती तियावत्कार्यस्याजनिरनुत्पत्तिर्विशेषोक्तिः विशेषस्याख्यानं निमित्तस्योक्तिरनिर्यचेति सुत्पत्तेः अनुरागेति अनुरागो रक्तिमा
रतिश्च पुरःसरो अग्रवर्ती आज्ञाकरश्च स्वर्वैदाहरणे अनुक्तानिमित्ता इह दैवगतिर्वैचित्र्यस्य निमित्तस्योपादानादुक्तनिमित्तेति भेदः॥ ॥इति विशेषोक्तिप्रकरणं॥ ॥अ राम
संभव इति कस्यचित्पदार्थस्य निष्पत्तेरसंभावनीयत्ववर्णनमसंभवो नामालंकारः गोपशिशुकः गोपालबालकः निंदायां कुत्सायां वा कप्रत्ययः उत्पाटयेत् उद्धरेत् अयमि ६४
ति तारा जलानां निलयः स्थानं तृष्णापिपासा अर्थाभिलाषश्च तरलितं चंचलीकृतं श्रितः आश्रितः स्तुतिरागस्य पुनः स्तुत्वं कृपण आसमंतात्ता स्यति इदं को जानीत इ
त्यन्वयः कीदृशं निजाकरपुरीकरसंपुटमेव कोटरं बिलं तद्गतं तथा तान्यतोऽग्लायं तस्तिमयो मत्स्या मकराश्च यस्यैवंभूतमित्यर्थः॥ इत्यसंभवाप्र
कारप्रकरणम्॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विरुद्धमिति अदृष्टमित्यर्थः भिन्नदेशत्वं भिन्नाधिकरणत्वं विषं जलं हालाहलं च संगतस्य भावः सांगत्यं तदभावोऽसांगत्यं अजस्रमिति दमयन्तीं प्रति हंसोक्तिः हे दमयन्ति त्वं तदीयां नलसंबन्धिनीं दूरगमनां दीर्घां संकल्पो मनोरथस्तद्रूपसोपानपरंपरां अजस्रं निरंतरमारोहसि सततं नलः अधिकं श्वासान् स वर्षति मुंचतीति यत्त्वद्ध्यानात्त्वन्मयतां त्वत्स्वरूपतामवाप्येत्यन्वयः अत्र चतुर्थपादेनासंगतिसमाधानं भ्रूचापेति भ्रूचापवल्ली भ्रूलतारूपधनु- (का०१) लतां यावदिति परिमाणार्थे वक्रतां नयति आकर्षतीति यावत् तावत्परिमाणं हृदयं भिद्यत इत्यर्थः अत्र हृदयभेदधनुराकर्षणयोः कार्य

विरुद्धं भिन्नदेशत्वं कार्यहेत्वोरसंगतिः। विषं जलधरैः पीतं मूर्छिताः पथिकांगनाः ७४ ययोः कार्यहेत्वोर्भिन्नदेशत्वं विरुद्धं तयोस्तादृशत्वेन निबध्यमानमसंगत्यलंकारः यथा विषपानमूर्छनयोर्भिन्नदेशत्वं यथा वा अहो खलभुजंगस्य विपरीतो वधक्रमः अन्यस्य दशति श्रोत्रमन्यः प्राणैर्वियुज्यते क्वचिदसंगतेः समाधाननिबंधने चारुतातिशयः यथा अजस्रमारोहसि दूरदीर्घां संकल्पसोपानततिं तदीयां (४ प्रस्तुताहरणमिदम्) श्वासान्स वर्षत्यधिकं पुनर्यद्ध्यानात्तव त्वन्मयतामवाप्य विरुद्धमिति विशेषणाद्यत्र कार्यहेत्वोर्भिन्नदेशत्वं नाविरुद्धं तत्र नासंगतिः यथा भ्रूचापवल्लीं सुमुखी यावन्नयति वक्रतां तावत्कटाक्षविशिखैर्भिद्यते हृदयं मम अन्यत्रकरणीयस्य ततोऽन्यत्र कृतिश्च सा। अन्यत्कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिस्तथा ७५ (मुद्रि२) अपारिजातां वसुधां चिकीर्षन् द्यां तथाकृथाः। गोत्रोद्धारप्रवृत्तोऽपि गोत्रोद्भेदं पुराकरोः ७६ अत्र कृष्णं प्रति शाक्रस्योपालंभवचने चिकीर्षितत्वार्थात्त्वत्र करणीयमपारिजातत्वं दिवि कृतमित्येकाऽसंगतिः पुरा गोत्राया उद्धारे प्रवृत्तेन वराहरूपिणा तद्विरुद्धं गोत्राणां दलनं पुरा कृद्देनैः कृतमिति द्वितीया। द्विविधापि श्लेषोत्थापिता ५ ॥ ॥ (पं०१)

कारणयोर्भिन्नदेशत्वमेव दृष्टमिति नासंगतिरलंकारः अन्यत्रेति अन्यत्र कर्तव्यस्य वस्तुनस्ततोऽन्यस्मिन्नधिकरणे या कृतिः करणं तदपि असंगतिरित्यनुषज्यते तथा अन्यत्कार्यं कर्तुं प्रवृत्तस्य तद्विरुद्धकार्यकरणं तृतीयाऽसंगतिः अपारिजातमविद्यमानपारिजातं यस्यास्तां द्यां स्वर्गं तथा पारिजाततरुरहितां अकृथाः कृतवान् एवं गोत्रायाः पृथिव्या उद्धाराय पुरा वराहावतारे प्रवृत्तोऽपि त्वं गोत्राणां पर्वतानामुद्भेदं दलनमकरोः कृतवानित्यर्थः स्नेवोत्थिता श्लेष

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु·नं· यथा वेति हे प्रभुवनैकवीर चोलदेशाधिपसिंहसदृश तवारवङ्गेन खंडिता ये सपत्नाः शत्रवस्तद्विलासिनीनामभिनवाश्रुबिंदव एव भूषाभूषणानि भवंति यथा नेत्रेषु
६५ कंकणां जनकणमेव कंकणां वलयं भवतीत्यनुषंगः अथेति समुच्चये कुचपत्रवल्ली मेव पत्रिकारचना करपल्लवेषु तिलयुक्तं कज्जलमेव ललाट
भूषणमिति मोहमिति हे अखिलेश्वर जगत्त्रयवर्त्तिनां देहधारिणां मोहमपनेतुं यत्तत्रूपं कस्य शरीरमादायमर्यादातिक्रांतकांतिरूपरससमुद्रेणामुनैव
रूपेण सुंदरस्त्रीणां मोहं प्रवर्धयसीत्यन्वयः अत्रेति अनयोर्मध्ये आद्योदाहरणे इति लक्षणानुगतिरित्यन्वयः भवतिनामभवत्यर्थेन भवने नेतियावत्

यथा वा त्वत्खड्गखंडितसपत्नविलासिनीनां भूषा भवंत्यभिनवा भुवनैकवीर नेत्रेषु कंकणमथो कुचपत्रवल्ली चोलेंद्रसिंह तिलकं कर
पल्लवेषु मोहं जगत्त्रयभुवामपनेतुमेतदादाय रूपमखिलेश्वर देहभाजां निःसीमकांतिरसनीरधिनामुनैव मोहं प्रवर्धयसि मुग्धवि
लासिनीनां अत्राद्योदाहरणे कंकणादीनामन्यत्रकरणीयत्वं प्रसिद्धमिति तन्नोपस्थितं भवति ना भावनारूपा न्यत्र कृतिरीतिरिष्यते इति
लक्षणानुगतिः ६॥ ॥

भावनारूपा भवनप्रयोजकव्यापाररूपा यत्तु अन्यत्रकरणीयस्येत्याद्यसंगतिप्रकारद्वयान्तरकथनमयुक्तं अपारिजातामित्युदाहरणे पारिजातराहित्यस्य चिकी
र्षारूपकारणस्य कार्येण पारिजातराहित्येन वैयधिकरण्यापनिबंधेन प्राथमिकासंगतितो वैलक्षण्यानुपपत्तेः आलंबनाख्यविषयतासंबंधेन चिकीर्षायाः
सामानाधिकरण्येन कार्यमात्रं प्रति हेतुत्वात् एवं नेत्रेषु कंकणमित्यादौ कंकणत्वनेत्रालंकारत्वयोर्विरुद्धयोः सामानाधिकरण्यवर्णनाद्विरोधाभास राम·
उद्देश्यताख्यविषयतार ६५

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वमुचितं एवं गोवर्धनोद्धारप्रवृत्तोऽपीत्युदाहरणे विरुद्धात्कार्यसंपत्तिर्दृष्टा काचिद्विभावनेत्युक्तविभावनाप्रकारेणैव गतार्थत्वादसंगतिभेदांतरकल्पनानुचि
ता मोहमित्यादावपि मोहनिवर्त्तकत्वमोहजनकत्वयोर्विरुद्धयोरेकत्रवर्णनात् विरोधाभास एवेति केचिदुक्तं तदसंगतं उक्तसंबंधेन चिकीर्षाया
हेतुत्वासिद्धेः नहि यदधिकरणे कार्यचिकीर्षा तदधिकरणमंतर्भाव्योक्तसंबंधेन चिकीर्षायाः कार्यहेतुत्वं तत्प्रतियोगिकसमवेतत्वमुक्तं वा अन्यत्र चिकी
र्षितस्यापि प्रमादादिनान्यत्रकरणेन व्यभिचारात् अत एवं वैयधिकरण्यस्याविरुद्धत्वादपि न श्लाघ्याभिकासंगत्यंतर्भावसंभवः वस्तुतस्तु वि
षं जलधरैः पीतं मूर्च्छिताः पथिकाङ्गना इत्यत्रेव नात्र कार्यकारणवैयधिकरण्यप्रयुक्तो विच्छित्तिविशेषोऽपि त्वन्यत्र कर्तव्यस्यान्यत्रकरणप्रयुक्त एवे
ति स्वहृदयमेव प्रत्यक्षं एवं नेत्रेषु कंकणमित्यत्र सत्यपि विरोधाभासेऽन्यत्र चमत्कारित्वेन तत्क्रमालंकारभावोऽन्यत्रकर्तव्यस्यान्यत्रकरणरूपाऽसंग
तिरपि प्रतीयमाना न शक्या निराकर्तुं एवं गोवर्धनोद्धारप्रवृत्तोऽपीत्युदाहरणे गोवर्धनोद्धारविषयकप्रवृत्तेर्गोवर्धनोद्धाररूपकार्यविरुद्धत्वाद्विरुद्धात्कार्यसंप
त्तिरिति विभावनेत्यपि न युक्तं गोवर्धनोद्धारप्रवृत्तेर्गोवर्धनोद्धेदनिवर्त्तकत्वाभावेन तद्विरुद्धत्वाभावात् कथंचित्तदभ्युपगमेऽपि अन्यत्कार्यं कर्तुं प्रवृत्तेन तद्विरु
द्धकार्यान्तरकारणरूपाऽसंगतिरपि मोहं जगत्त्रयभुवामित्यादौ चमत्कारित्वेन लब्धात्मिका न निवारयितुं शक्यते नचात्रापि मोहनिवर्त्तकात्मोहोत्पत्तेः
सैव विभावनेति वाच्यं मोहनिवर्त्तकत्वस्य सिद्धवदप्रतीतेः अत एव न विरोधाभासोऽपि विशेषोक्तिकथनं त्वत्रासंगतमेव नहि गोवर्धनोद्धारविषयकप्र
वृत्तिरूपकारणत्वेऽपि गोवर्धनोद्धाररूपस्य कार्यस्यानुत्पत्तिरिह प्रतिपाद्यते किंतु विरुद्धकार्योत्पत्तिरेवेति विभावनीयं॥ ॥इति संगतिप्रकरणं ६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषममिति परस्परमननुरूपयोर्घटितयोः पदार्थयोर्यत्र घटना संबंधो वर्ण्यते तत्र विषमं नामालंकारः संबंधश्च संयोगादिः उत्पाद्योत्पादकभावश्चेति सर्वप्रकारसाधा रणमेतल्लक्षणं बोध्यं अभिलषसीति अंकंकलंकं संक्षालय प्रक्षालय अथ प्रक्षालनानंतरं नो चेत्तस्या मुखं कांतं कोपि वदेदित्यन्वयः वक्तसती वक्तगता विद्यमाना चेदेति चेदस्य वदनलक्ष्म्याश्च तयोरित्यर्थः विरूपेति कारणविलक्षणस्वरूपेत्यर्थः रूपाणिकारवङ्कः प्रक्रमेणेति प्रक्रमः परिपाटी स्वसजाती यकार्यगुणोत्पादकत्वरूपा विरुद्धात्कार्यसंपत्तिरितिपंचमविभावनाप्रकारेणाभेदमाशंक्याह कार्येति स्वयं विषम उक्तविषमालंकारप्रभेदः तृतीय

विषमं वर्ण्यते यत्र घटनाननुरूपयोः क्वेयं शिरीषमृद्वंगी क्व तावन्मदनज्वरः ७७ अत्रातिमृदुत्वेनातिदुःसहत्वेन चाननुरूपयोरंगना मदनज्वरयोर्घटना यथा वा अभिलषसि यदीदो वक्तुलक्ष्मीं मृगाक्ष्याः पुनरपि सकृदब्धौ मज्जसंक्षालयांकं सुविमलमथ बिंबं पारिजातप्र सूनैः सुरभय वद नो चेत्वं क्व तस्या मुखं क्व अत्र वक्तृसती घटना अत्र चंद्रवदनलक्ष्म्योर्निर्किता घटनेति भेदः विरूपकार्यस्योत्पत्तिरपरं वि षममतं कीर्तिं प्रसूते धवलां श्यामा तव कृपाणिका ७८ अत्र कारणगुणप्रक्रमेण विरुद्धश्यामाद्धवलोत्पत्तिः कार्यकारणयोर्भिन्न वर्णत्वेन पंचमी विभावना विलक्षणगुणशालित्वेऽयं विषम इति भेदः अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात् भक्ष्याशयाहि मंजूषां दृष्ट्वाखुस्तेन भक्षितः ७९ इष्टार्थमुद्दिश्य किंचित्कर्मारब्धवतः ततो न केवलमिष्टस्यानवाप्तिः किंतु ततरवानिष्टस्यापि प्राप्तिले भश्चेद्विषमं यथा भक्ष्यापेक्षया सर्पपेटिकां दष्ट्वा प्रविष्टस्य मूषकस्य न केवलं भक्ष्यालाभः किंतु स्वरूपहानिरपीति ७ ॥ ॥

प्रकारमाह अनिष्टस्यापीति अपिर्भिन्नक्रमः इष्टार्थसमुद्यमात्तस्यानिष्टस्यावाप्तिरपि च तत्तद्विषममित्यर्थः अपिना इष्टानवाप्तिः संगृह्यते चकारः प्र वोक्तविषमसमुच्चयार्थः भक्ष्येति अहिमंजूषां सर्पपेटिकां दृष्ट्वा भक्ष्यस्याशया प्रविष्ट आखुर्मूषकस्तेनाहिना भक्षित इत्यन्वयः यत्तु प्रविष्ट इत्यस्या गम्यमानत्वान्न्यूनपदत्वमिति केनचिदुक्तं तदभिनिवेशाद्युष्टस्य तद्दयाऽनुभवविकत्थनमित्युपेक्षणीयं अनिष्टस्यापि प्राप्तिलंभ इत्यत्राप्यपिर्भिन्नक्रमो बोध्यः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गोपालइति हे कृष्ण त्वं गोपालइतिहेतोर्व्रजे दुग्धवांछया श्रितः आश्रितः त्वयातु मातृस्तनदुग्धमप्यलभ्यं कृतं मुक्तिदानेनेतिभावः पूर्वत्रेष्टानवाप्तिरर्थगम्या इहतुविशिष्टगम्येतिविशेषः इत्यमितिउदाहरणमिति जातावेकवचनं दिवीति भुवि मे हि केयमसिद्धौ पुत्रस्य सिद्धस्य भयात् दिवि स्वर्गकाशे चंद्रमाश्रितवतः शशस्य मामाश्रयस्याश्रयसहितस्य ततः सिंहिकेयाद्राहोर्भयमेतत् हेतत्वं गिपश्यत्यन्वयः परेति अरस्यानिष्टावाप्तिरूपोयइष्टार्थ इत्यर्थः तदुभयं इष्टानवाप्त्यनिष्टावाप्तिद्वयं दिधक्रन्निति दशानतोगावशाः मारुतेहेतुमतोकालं पुच्छंदग्धुमिच्छत्तंवालमादीप्यदीपयतिस्मेत्यर्थः प्रत्येकमपीति अपि नाइष्टानवाप्तिसमुच्चितायाअनिष्टावाप्तेर्विषमपदेनान्वयः समुच्चीयते विषम

अप्रधा २ यथांवा गोपालइति कृष्ण त्वं प्रचुरक्षीरवांछया श्रितोमातृस्तनक्षीरमप्यलभ्यं त्वया कृतं इदमर्थावाप्तिरूपेष्टार्थसमुच्चयमाद्याष्टानवाप्त्यावनिष्टप्रतिलंभेचोदाहरणं अनर्थपरिहाररूपेष्टार्थसमुच्चयमात्तउभयंयथा दिवि श्रितवतस्त्वं मे हि केयभयादुवि शशस्य पश्यतत्वं गिरामाश्रयसततोभयं ॥ अत्रतकेवलं शशस्यानर्थपरिहारानवाप्तिः किंतुत्वाश्रयस्याप्यनर्थावाप्तिश्चेतिदर्शितं परानिष्टप्रेष्टार्थसमुच्चयमात्तउभयंयथा दिधक्षन्मारुतेर्वालं तमादीप्य दृशाननः आत्मीयस्य पुरस्यैवमसद्योदहनमन्वभूत उरस्यैवेत्येवकारेणापरानिष्टप्राप्त्यभावोदर्शितः अनिष्टस्यायवाप्तिश्चेतिस्त्रोकेइष्टानवाप्तेरपिग्रहः संगृहीततयाद्दृष्टानवाप्तिश्चेतित्रयेकमपि विषमपदेनान्वयः ततश्चकेवलानिष्टप्रतिलंभः केवलानिष्टानवाप्तिः केवलेष्टानवाप्तिश्चेत्यपि विषमद्वयं लक्षितं भवति तत्र केवलानिष्टप्रतिलंभोयथाः पद्मातपत्र रसिकेसरसी रुहस्य किंकरमर्पयितुमिच्छसि वायो कालः कालिजगदिदं न कृतज्ञमत्रे स्थित्वा हरिष्यति तवैव मुखस्य लक्ष्मी अत्र पद्मातपत्रलिप्सया पद्मवीजायां वायोंकृतवत्यास्तल्लाभोत्स्यैव किंतु मुखशोभाहरणरूपो वा. प्रि. १ पि. का. २

पदेन विषमपरामर्षकेनतत्पदेन तथा च तात्पर्यवलाद्वाक्यभावर्ननीयमितिभावः यत्तनिष्टस्यैवतदुत्तरापिशा हृसमुच्चितायाइष्टानवाप्तेर्याप्रोतिनैवान्वयो नतु तत्पदपरामृष्टेन विषमेण अस्मत्येरिति तस्यागेवापिग्राह्यान्वयव्याख्यानेन निरस्तंवेदितव्यं पद्मेति दपितांप्रतिनायको क्तिः पद्मस्यातपत्रे छत्रे तत्र रसिके हेतत्वित्रापिकायांसरसीरुहस्य पद्मस्य कं दमर्पयितुं किमितीच्छसि यतः हे अत्रे कलियुगरूपः कालः इदं जगत कृतज्ञं च न भवति ततः किं तत्राह इदं सरसीरुहं स्थित्वा तवैव मुखस्य लक्ष्मीं हरिष्यतित्यत्वस्याइत्यर्थः ८॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु.नं. रिवन्नोस्मीति निश्रमःश्रारयामः वदतस्तुगोपेषु शिथिलोभुजोपस्फः भरेणशैलभारेणाभुग्यावक्राःविनताविस्तीर्णावाहवोयेषांतथाभूतेषुसत्सुहसन् अत्रेति नत्रभरभुग्नेत्य
६० तेनवाङ्गतास्थिसंधिभंगःरूपानिष्टप्राप्तिःसाक्षादुपात्तात्तावर्गिच्चूर्णीभावगर्वापहारस्याप्यान्स्फुटंगम्यमानत्वात्कथमिष्टप्राप्तिमात्रमित्युच्यतइतिवाच्यं अस्थिसंधिभंगस्य
शाब्दार्थत्वात्भगवद्भुजयोरिष्टत्वप्रत्युक्तभाराधिक्येनवक्रतामात्रस्यशाब्दोपात्तस्यक्लेशविशेषदातायकत्वेनानिष्टव्यपदेशानर्हत्वात् स्तुत्त्वदृष्टांतगोपानामनिष्टप्राप्तिःहू
स्पोनुपपन्नेश्च अत्रएवसर्वांगचूर्णीभावोपिगम्यःगर्वप्रसक्तभावाच्च नतदपहारोपि यतःश्रीरकालशैलधारणंजनप्रश्नपरिजिहीर्षयागोपानांचहन्तिरेहावगम्यतइति
निरवद्यं लोकइति हेनाथ लोकेप्रसिद्धंकलंकमथहंतुनिवारयितुंमृगांकलवसुतंजातः तत्रापित्वनस्मिकयाजेतकलंकरेखांत्वंकल्पयसिकरोषि हियस्मान्नार्यःसमाश्रि
तजनंस्वाश्रितजनंकलंकिनंकुर्वतीत्यन्वयः ९ शापोपीति मृगमायांश्रमादतोहतत्पुत्रेणतापसेनत्वमपिपुत्रशोकान्मरिष्यसीतिशापेदत्तेतंप्राप्तदशरथस्येयमुक्तिः अ

२पि२ केवलेष्टानवाप्तिर्यथा रिवन्नोस्मिसूचसैलंविभ्रमोनयमिधिनेवद्दतस्तुशिथिलभुजः भरभुग्नविलतवाङ्गभुगोपेषुहसन्हरिर्जयति अत्रयद्यपि [illegible]
शैलस्योपरिपतनरूपानिष्टावाप्तिःप्रसक्ता तथापिभगवत्कराम्बुजस्पर्शमहिम्नासाचनजातेतिशैलधारणरूपेष्टानवाप्तिमात्रं यथावा लोकेकलंकमपहातु
६४ मयंमृगांकोजातोत्रुत्वंतवपुनस्तिलकच्छलेन तत्रापिकल्पयसितन्निकलंकरेखांनार्यःसमाश्रितजनंहिकलंकयंतिः अत्रानर्थपरिहाररूपेष्टानवाप्तिः ९ यथावा
शापोप्यदृष्टतनयाननपद्मशोभेसानुग्रहोभगवतामपिपातितोयं कृषींदहन्नपिखलुक्षितिमिंधनेद्धोबीजप्ररोहजननींदहनःकरोति अत्रपरानिष्टप्राप्तिरूपेष्टानवाप्तिः स्व
तोनिष्टप्राप्तिपुनिशापस्यमहाप्रुषार्थपुत्रजन्मस्यादशरथेनेष्टत्वेनस्वीकृतत्वात् यत्रकेनचित्स्वेष्टसिद्ध्यर्थंप्रेषितेनानीतनियोक्तारिष्टमुपेत्यस्वसेवेष्टसाधुतेतत्रा
पीष्टानवाप्तिरूपमेवविषमंयथा त्वंपतिप्रेषितादूतीतस्मिन्नेवलग्नागता सत्यः पश्यतमेवरूपमेविपाकंवाविवेरमुतस्मिन्नेवलग्नागतेतिहत्वानायकेसत्वंछदूतीतत्पश्या
तुसकामितिज्ञात्वाश्रियायेप्रेषितमतः तन्तु तत्रैवरमतेहताः पाणिनितावुर्यं गतानिसर्वथैवेष्टानवाप्तिर्दाहरणानि किंचिदिष्टावाप्तिपूर्वकंतदनवाप्तिर्यथामदीप
वरदराजस्तवे नान्तुर्निशास्तुभवदंघ्रिनखप्रभालोभात्स्वताप्यकिरणात्करमाप्तभातं तेनाह्नतेक्षतवहाक्षुराण्युप्ररागतामेभजत्यनुदिनंसहिमंदतामः यथावा
त्वद्यक्रमाश्रिमयमंबुजकोशमुद्रांभंगात्ततत्क्षुमितिकरोपलब्धा तद्धापिपवरिविधुःक्रमहीयमानःशंसत्यमीस्तुपचितोश्रियमांशुनाशी १० ॥ ॥

रूपां४ हेष्णुतरवरपंकजशोभेमपिभगवतात्वयाप्यातितःअयंशापोपिमानुग्रहोभवति खलुनिश्चितंइंधनैरिद्धोदीप्तोदहनःकृषियोग्यांक्षितिंदहन्नपिबीजांकुरजननींकरो
तीतिहदृष्टांतमरेति पररूपदशरथस्यानिष्टप्राप्तिरूपंयादिष्टंतस्यानवाप्तिर्यथात्राप समस्येत्यर्थःकृततस्त्राहस्तत्रइति नियोक्तःप्रेषयितुःनप्रतीति मोहमूढत्वं स्पर्शे
धाया मामत्वबुद्धेः विधेर्दैवस्य विपाकं परिपाकंफलमितियावत् भानुरिति हेहरेभानुःसूर्यःभवच्चरणकिरणशोभयालोभात्स्तीयाकिरणास्तु हन्निशास्तुप्रभा
तपर्यंतप्रतापा राज्ञोस्सूर्यःकिरणानामग्नौप्रवेशान्तापपित्तान्तरेतस्मिन्कीरणोत्करणोत्करेकृतवहाद्ये सकाशात्तदुहृतेनतिरस्कृतादर्शनात्तमंदसंतापःसन्कृशा
मात्रेणत्वभरागेणेक्ष्यलोहितोसत्यनुदिनंतापंभजतीत्यन्वयः त्वदक्रेति हेहरेअयंविधुःपर्वणिपौर्णमास्यांअंबुजस्यकोशःकुड्मलःसएवांबुजस्यभंगःशरच्छहेतस्यमुद्रामुकु
लीभावोमुद्रणंचतस्यभंगेनाह्नात्ग्रहीतात्वस्तुत्रमातत्वशोभायेलाहशायेमित्रकराःसूर्यकिरणाःस्तुहत्याराज्यस्यतेषामुपलब्धालाभेनत्वद्क्रमस्यकांतिलब्धापिकमेणहीयमा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अत्रेति आगमसिद्धं तस्मादिवाग्निरादित्यं प्रविशति रात्रावादित्यस्तमिति श्रुतिसिद्धं प्रवेशनं तात्कालिकं तस्य सूर्यकर्तृकं तेषां किरणानां मग्नौ प्रतापनरूपं परिकल्प्य उत्प्रे
क्षा· एवं तेषां किरणानामरुणिमानं आरक्तत्वं च अरुणिमानुवृत्तिरूपं परिकल्प्य इति दर्शितमित्यन्वयः एवमग्रेपि स्तुस्तुत्वेन सूर्यं परिकल्प्य तत्किरणस्य चंद्रानु
प्रवेशं च शास्त्रसिद्धं तदरुणिमयोः विशेषणविशिष्टस्य चंद्रस्य शोभारूपं च परिकल्प्य इति दर्शितमित्यन्वयः। वल्लालेति हे एतन्नामक भूपाल त्वच्छत्रुनगरे संचरती भिल्ली

अत्राद्यश्लोके सूर्यकिरणानां रात्रिषु अग्नौ प्रवेशनमागमसिद्धं सूर्यस्य निजकिरणेषु भगवत्स्वरूपारुणिमप्रेक्षयात तत्कृतं। तेषामग्नौ प्रताप
नं परिकल्प्य तेषामुदयकालदृश्यमरुणिमानं च तत्प्रोद्भूततारा चानामिवाग्निसंतापनप्रयुक्तारुणिमत्वं वृत्तिं परिकल्प्य सूर्यस्य महतोपि ऽप्येन
नात्कालिके प्रवाग्निरेव आस्यते न सार्वकालिके प्रवाग्निरिति दर्शितं द्वितीयश्लोके चंद्रस्य भगवन्मुखलक्ष्मीसिद्धमानस्य तत्स्वेनमित्रशोभाप्र
वेशनात्सूर्यं परिकल्प्य तत्किरणस्य कमलमुकुलविलासकस्य चंद्रानुप्रवेशं च तद्वत्पारो भगवन्मुखलक्ष्मीनिधानगृहकोशस्य वाप्तो चतत्प्रवेशं
ततो गृहीत भगवन्मुखलक्ष्मीकस्य तस्या भगवन्मुखलक्ष्म्या चंद्रप्रसादता च चंद्रस्य शोभारूपं परिकल्प्य एतावतापि प्रयत्नेनापोर्णमास्यामेव गावन्मु
खसाम्ये प्रवाग्निर्जायते न सार्वकालिकेति दर्शितं क्वचिदिष्टाऽनवाप्तानवाप्तावपि तद्वाभिभ्रमनिबंधनविच्छित्तिविशेषो यथा। वल्लालक्षोणि
पालत्वदोहितनगरे संचरंती किराती कीर्णान्यादाय रत्नान्युरुतरखदिरांगारशंकाकुलांगी क्षिप्त्वा श्रीखंडखंडं तदुपरि मुकुलीभूतनेत्राधमंती श्वा
सामोदप्रसक्तैर्मधुकरपटलैर्धूमशंकां करोति अत्र प्रभूताग्निसंपादनोद्योगान्ततत्संपादकानामपि तत्राभ्रमोपमासेनाभिवद्धः ११॥ ॥·

प्रकीर्णानि रत्नान्यादाय उरुतरमहतीया खदिरांगारस्य शंका भ्रांतिस्तया व्याकुलांगी तदुपरि श्रीखंडकाष्ठशकलं क्षिप्त्वा मुकुलीभूतनेत्रा फूत्कारं कुर्वती सती श्वासप
रिमलेन प्रसक्तैः रागतेर्भ्रमरसमूहैर्धूमशंकां करोतीत्यन्वयः प्रभूतेति· वह्न्युत्पत्तिसामर्थ्यः एतेषु च समवेषु त्पादो त्पादकाभावरूपसंबंधगर्भेषु प्रभेदेषु कार्यकारणयोः क्वचि। द्वि
लेदाणगुणशालित्वेनानुरूप्याभावात्क्वचिदेष्टोत्पादकत्वेनाभिमतस्य कारणस्येष्टानवाप्तनिष्टावाप्तिरूपकार्येणानुरूप्याभावात्सामान्यलक्षणसमन्वयो बोध्यः॥ ॥

४३

विभावनालंकारः ११॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु०न० सममिति अनुरूपयोरित्यनंतरं संबंधस्येति शेषः परस्परमनुरूपयोः संबंधस्य वर्णनं समं नामालंकारः सद्म स्थानं शशिखंडमंडनं चंद्रकलाभूषणं हरं बिभ्रति
६८ ति अत्र विस्तरस्तु शरदयोर्यथाक्रमं विस्मयानिन्द्ययोर्विनाय परिणत पक्वं स्फीतिः समृद्धिः एतस्याः फलसमृद्धेः कवलनकला भक्षणचातुर्यं तत्र कोविदः पंडि
तः सारूप्यमपीति कार्यस्य कारणेन सारूप्यमपि समालंकारः नीचेति नीचप्रवणता नीचासक्तता जलजायाः समुद्ररूपजलजन्यायाः उचितेति
जलस्य तादृशत्वादिति भावः दवेति घनतां मेघरूपतां वर्षैर्जलवर्षणैः शमयति नाशयति हि यस्मात् सोऽपि दवदहनोऽपि दवमेव स्वोत्पादकं विनिहंतीति तथा च

समं स्याद्वर्णनं यत्र द्वयोरप्यनुरूपयोः स्वानुरूपं कृतं सद्म हारेण कुचमंडलं ८० प्रथमविषमप्रतिद्वंद्वीदं समं यथा वा कौमुदीव तुहिनांशु
मंडलं जाह्नवीव शशिखंडमंडनं यशः कीर्तिरनुरूपमाश्रिता त्वां विभाति नरसिंह भूपते चित्रं चित्रं वत वत महच्चित्रमेतद्विचित्रं जातो दैवादुचि यथा वा २
तरचनासंविधाता विधाता यन्निंबानां परिणतफलस्फीतिरास्वादनीया यच्चैतस्याः कवलनकलाकोविदः काकलोकः पूर्वस्मिन्निति पर्यवसा
यीदं निंदापर्यवसायीति भेदः सारूप्यमपि कार्यस्य कारणेन समं विदुः नीचप्रवणता लक्ष्मि जलजायास्तवोचिता ८१ इदं द्वितीयविषमप्रतिद्वंद्वि स स्तवोचिता ४
मं यथा वा दवदहनादुत्पन्नो धूमो घनतामुपेत्य वर्षैस्तं यच्छमयति तद्युक्तं सोऽपि दवमेव विनिहंति यथा वा आदौ हालाहलहुतभुजा दत्तह
स्तावलंबो बाल्ये शंभोर्निटिलमहसा वर्धमानो नितान्तं प्रौढो राहोरपि मुखविषैस्तरंगीकृतो यः सोऽयं चंद्रस्तपति किरणैर्मामिति प्राप्तमेतत् हि
पूर्वत्र कारणस्वभावानुरूप्यं कार्यस्य अत्र त्वागंतुकतदीयदुष्टसंसर्गानुरूप्यमिति भेदः १॥ ॥

कारणस्य स्वोत्पादकनाशकत्वात्कार्यस्यापि ध्वंसस्य तथात्वमुचितमित्यर्थः आदाविति विरहिण इयमुक्तिः सोऽयं चंद्रः मां किरणैस्तपतीत्येतत् प्राप्तं न्याय्य
मित्यर्थः सकः यः आदौ हालाहलरूपेण हुतभुजा अग्निना दत्तो हस्तावलंबो यस्य सः निटिलं ललाटं तत्संबंधि महस्तेजस्तेनाग्निना वर्धमानः वर्धमानोऽतिरूढः राम०
प्रसिद्धः प्रौढो युवा राहोर्मुखसंबंधिभिर्विषैस्तरंगीकृतः ग्रहणकाले संपर्कातिशयात्तरंगतां प्रापित इत्यर्थः अत्र कार्यस्य तस्य कारणीभूतचंद्रगतदुष्टसंसर्गा ६८

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भेदांतरमाह विनेति अनिष्टं विनायमर्थं कर्तुमुद्यतस्तत्सिद्धिरपि सममित्यनुवृत्त्या योज्यं यदर्थमिति पाठे यस्मादर्थश्चेत्यर्थः युक्त इति वारणां निवारणं वारणो गजश्च युक्तोनुरूपस्तदपि तस्यादेवेत्यर्थः शोभन इति क्वचित्पाठः साधुरेव अपि संगृहीतस्य अपि शब्दसंगृहीतस्य नर्मवचनं परिहासवचनं अत्रेष्टवाप्तिः श्लेषकल्पिता वो ध्या इष्टार्थप्राप्तीति रितिरिष्टार्थत्वेन प्रतीतिरित्यर्थः अप्रतिहत इति अनिष्टस्येष्टाभिन्नत्वेन ज्ञानकालेऽनिष्टत्वेनाप्रतिभासादिति भावः उच्चैरिति

विनानिष्टं च तत्सिद्धिर्यदर्थं कर्तुमुद्यमः। युक्तो वारणलाभोयं स्यान्न ते वारणार्थिनः ॥ ८१ ॥ इदं सममनिष्टस्याप्यवाप्तिश्चेति त्र्यर्थसंगृहीतस्य त्रिविधस्यापि विषमस्य प्रतिद्वंद्वि इष्टावाप्तेरनिष्टस्याप्रसंगाच्च अत्र गजार्थितया राजानमनुसरतं दौवारिकैर्वार्यमाणं प्रति नर्मवचनमुदाहरणं न चात्र निवारणमनिष्टमापन्नमित्यनुदाहरणत्वमाशंकनीयं राजद्वारि रुद्राणां निवारणं संभावितमिति तदंगीकृत्य प्रवृत्तस्य विषमालंकारोदाहरणोचितत्वात् किंतोक्तदानिष्टा[illegible]वाप्त्यभावात् किं च यत्रोक्तदानिष्टसत्त्वेपि श्लेषमहिम्ना इष्टार्थप्राप्तीति तत्रापि समालंकारोऽप्रतिहत एव। यथा उच्चैर्गजैरटनमर्थयमान एव त्वामाश्रयन्निह चिरादुषितोस्मि राजन्। उच्चाटनं त्वमपि लंभयसे तदेव मामद्य नैव विफला महतां हि सेवा॥ अत्र व्याजस्तुतौ यद्यपि स्तुत्या निंदाभिव्यक्तिविवक्षायां विषमालंकारस्तथापि प्राथमिकस्तुतिरूपवाच्यकक्ष्यायां समालंकारो न निवार्यते १ ॥ ॥

गजैरटनं तदारोहणाश्रयकं गमनं इहत्वन्नगरे उषितोस्मि वासं कृतवानस्मि तदेव मत्प्रार्थ्यमानमेव उच्चाटनं दूरनिरसनमेव उच्चैर्गजैरटनं प्रतिमां लंभयसे प्रापयसि हि यस्मात् महतां सेवा विफला न भवतीति मुखे स्तुतिः ततो दूरनिरसनरूपार्थांतरपरिग्रहेण विषमालंकारस्फूर्त्या निंदायां पर्यवसानं एतेन वैषम्यस्य निंदारूपस्य व्याजस्तुतिविषयत्वेन तया ऽपवाद इति निरस्तं विषमस्य निंदाश्रलत्वेन तद्रूपत्वाभावादिति १॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ इष्टार्थावाप्तिसत्वेपि॰ वास्तविके इष्टार्थप्राप्तिसत्वेपि न क्षतिरिति अनिष्टप्रतीतेराभाससरूपत्वेन पर्यवसानादिति भावः शास्त्रमिति तदेव॰ नखल्वेव एकपदत्वेने उप
९८ लक्षणोक्तोतीया एकपदत्वोपलक्षितं यद्वक्ष्यमाणदर्थान्तरपररूपान्तरमित्यर्थः अर्थान्तरं च वास्तविकं पदच्छेदात्रिकथनेन दर्शितमेव॰ श्लेषबलेति॰ श्लेषेणालब्धा अ
सतीव वक्ततोऽविद्यमानोयाइष्टावाप्तिस्तत्प्रतीतिमात्रेण समालंकारोदाहरणमपि गतं॰ अधिगतं॰ मात्रपदेनानिष्टावाप्तिप्रतीतिव्यवच्छेदः पुक्तो वारणात्ला
भोपमित्यत्र किंचिदनिष्टस्य उच्चैरित्यत्र चोक्तत्वानिष्टस्य प्रतीतिसत्वादुदाहरणान्तरमाह यथेति नायिकां प्रति नायकस्योक्तिः॰ हेतन्वितपः शोभनगतेर्भवती

प्रवमिष्टार्थावाप्तिसत्वेपि श्लेषवशादसतोऽनिष्टार्थस्य प्रतीतिस्तत्राप्यस्यालंकारस्य न क्षतिः यथा शास्त्रं न खलु कर्तव्यमिति पित्रा समीरितः तदे
व शास्त्रं कृतवान्पित्रराज्ञा न लंघिता॥ अत्रापि पितुराज्ञा न लंघितेत्यत्र विरोधालंकाराभिव्यक्त्यर्थं न खल्वित्यत्र पदद्वयविभागात्मकरूपा
न्तरस्यापि विवक्षणात्सत्वेपि नखं खलु नातीति नखल्वित्येकपदत्वेन वक्ष्यमाणदर्थान्तरपररूपान्तरमादाय समालंकारोप्यस्त्येव श्लेषबलम्प्रा
प्तदिष्टावाप्तिप्रतीतिमात्रेणाप्युदाहरणं यथा सत्यं तपःसु गतेष्यपदे प्रवृत्तरविप्रतीकाशं सत अनुभवति सुगतिमञ्जत्वत्पदजन्मनि
समस्तकमनीयं। विचित्रं तत्प्रयत्नो यद्विपरीतफलेच्छया नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिं ८६ यथा मलिनयितुं खलवदनं विम
वि॰ लयति जगन्ति देव कीर्तिस्ते मित्राह्लादं कर्तुं मित्राय दुह्यति प्रतापोपि ३॥॥

तिसत्यं यस्मादब्जं कमलं अम्बुजं जलेषु रविप्रतीकृते ताडयते सततस्नातपः सत्वात्वत्पदरूपेजन्मनि समस्तेभ्यः कमनीयं सुंदरं सततं सुगतिं शोभनां गतिमनुभवतीत्य
न्वयः अत्र कमलस्योत्तमलोकरूपगतिप्राप्तये तपस्सततस्नादत्वाभेपि शोभनगमनस्य गतिशब्दश्लेषवलादिष्टत्वेन प्रतीतेरिष्टावाप्तिप्रतीतिमात्रेणत्व निष्टप्रतिभासोपी
ति॥ ॥इति समालंकारः॥ ॥विचित्रमिति फलेच्छयाविपरीतः प्रयत्नः स्यात्तद्धि चित्रं नामालंकारः इष्टविपरीताचरणमिति यावत् नमन्तीति नम्रीभवन्तीत्यर्थः समु
न्नतिं उच्चतां मलिनयितुमिति मलिनीकर्तुमित्यर्थः विमलयति निर्मलीकरोति जगन्ति त्रिभुवनानि मित्रं सुहृत्॰ मित्रः सूर्यश्च॥ ॥इति विचित्रालंकारः ३॥ राघ॰ ९९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अधिकमिति पृथुलादाक्षेयापेक्षया विशालादाधारादाधेयस्याधिक्यवर्णनमेकोऽधिकालंकारः युगांतेति युगांतकाले प्रलये प्रतिसंहृतैः स्वस्मिन्लयं प्रापित
आत्मा स्वविलासरूपः प्रपंचो येन ताहृशस्य कैटभद्विषः श्रीकृष्णस्य यस्यां तनौ जगंति भुवनानि लिकाशसहितं यथा स्यात्तथा आसत स्थितानि यत्र तस्यां तनौ तयो
धनस्य नारदस्याभ्यागमात्तस्मै वोपागता मुदः प्रीतयो न ममुरित्यन्वयः पृथ्विति विशालादाधेयादाधारस्याधिक्यं तदप्यधिकं कियदिति अपरिमितमि

अधिकं पृथुलाधारादाधेयाधिक्यवर्णनं ब्रह्मांडानि जले यत्र तत्र मांति न ते गुणाः पृथ्व्यत्र महाजले येन अनंतानि ब्रह्मांडानि बुद्बुदाय
मानानि तस्याधारस्यातिविशालत्वं प्रदर्श्य तत्र न मांति नीसाधेयानां गुणानामाधिक्यं वर्णितं यथा वा युगांतकाले प्रतिसंहृतात्मनो जगंति
न ३ यस्यां सविकाशमासत तनौ तनौ तस्मिन्नेव कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः पृथ्व्याधेयाद्याधाराधिक्यं तदपि तन्मतं कियद्वाग्ब्रह्मण
ते ४ जैर्विश्राम्यंति गुणास्तव पृथ्व्यत्र हे ईश त्वत्प्रकृष्टमहाविभव त्वेन उक्तानां गुणानां विश्रामस्थानत्वसंबोधावुपस्थानौ तन्नाधारस्य वाग्ब्रह्मण पदपि २
आधिक्यं वर्णितं यथा वा अहो विशालं भूपाल भुवनत्रितयोदरं माति मातुमशक्योऽपि यशोराशिर्यदत्र ते अत्रोदाहरणद्वये पि क्रियेहा
कृत्व न्यस्य अहो विशालमिति तयोधारयोः प्रशंसा क्रियते तथापि तत्तुल्येन सिद्धवन्कृतयोः शब्दब्रह्मभुवनोदरयोः गुणयशोराश्यधिकर
णत्वेनाधिक्यं कल्पयित्वैव प्रशंसा क्रियत इति तत्प्रशंसा प्रकृतगुणयशोराशिप्रशंसायामेव पर्यवस्यति ४ ॥ ॥

त्पर्यः वाक्शब्दस्य ब्रह्मा इयं च परमेश्वरं प्रति भक्तस्योक्तिः असंबाधेति असंकटेत्यर्थः अहो इति माति संमाति मातुमशक्यः अपरिमितः अत्र भुवनत्रयोदरे
न त्वाधारयोः शब्दब्रह्मभुवनोदरयोः प्रकृततत्त्वेन प्रशंसनीयत्वात्तदाधिक्यवर्णनमयुक्तमित्याशंक्याह अत्रेति न त्वत्र प्रकृतप्रशंसा शंकनीया अप्रकृत
स्याप्यभिधानादिति इत्थं चाधाराधेयान्यतरस्य तनोरप्याधिक्यवर्णनमिति सामान्यलक्षणं बोध्यं ॥ ॥इत्यधिकालंकारः ४ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु॰ तं॰ अल्पमिति यदितिसामान्येनपुंसकं स्वापेक्षयासूक्ष्मादाधेयादाधारस्यसूक्ष्मतामन्तरल्पंनामालंकारः मणीति मणिपंक्तिरूपाऊर्मिकाअंगुलीयकंतव
७० करेअधविरहावस्थायांजपमालायतइत्यर्थः मणिशब्दस्यगुटिकापर्यायत्वात् अतिसूक्ष्मता आधेयभूतमालापेक्षयापिसूक्ष्मता यदितिहेचंचलाक्षितव

५२ ९१

अल्पंतुसूक्ष्मादाधेयाद्यदाधारस्यसूक्ष्मता मणिमालोर्मिकातेद्यकरेजपवटायते ६६ अत्रमणिमालामयोर्मिकातावदंगुलि
मात्रपरिमितत्वात्सूक्ष्मासापिविरहिणाकरेकंकणवत्प्रवेशितातस्मिन्जपमालावंद्भ्रमितइतिउक्ताकरस्याविहेकार्श्यादितिसू
क्ष्मतादर्शिता यथावा यन्मध्यदेशादपि तेसूक्ष्मंलोलाक्षि दृश्यते मृणालसूत्रमपितेनैवमातिस्तनान्तरे अन्योन्यंनामयत्र
स्यादुपकारःपरस्परं त्रियामाशशिनाभातिशशीभातित्रियामया ८४ यथावा यथोर्ध्वाक्षःपिबत्यंबुपथिकोविरलांगुलिः
तथाप्रपापालिकापिधारांवितनुतेतनुं ५॥

मध्यभागादपियत्सूक्ष्मंदृश्यतेतत्तस्मृणालसूत्रमपितवस्तनयोरंतरेमध्येनमातीत्यन्वयः॥ ॥इत्यल्पालंकारः॥ ॥अन्योन्यमिति यत्रपरस्परमुपकारः रा॰
स्यात्तत्रान्योन्यनामालंकारः त्रियामा-रात्रिः यथेति ऊर्ध्वाक्षः ऊर्ध्वनयनः प्रपापालिका-प्रपादानाधिकृताकाचिद्गनिना धारांजलधारां तनुंसूक्ष्मां ५॥ ७०

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अत्रेति प्रपापालिकायाः पथिकेनोपकारः कृत इत्यन्वयः स्तनसक्तेत्यादि प्रपापालिकाया विशेषणं संपादनेन करणभूतेन एवं प्रपापालिकयापि पथि-
कस्योपकारः कृत इत्यन्वयः यत्र स्तनमुखावलोकनमभिलषंत्या इत्यत्र स्तनशब्दस्य प्रपापालिकाबोधकत्वमेव न्याय्यं न तां प्रत्युद्बोधकत्वं यादृशविशेष-
णघटकत्वेन स्तनादिशब्दा उपात्तास्तद्बोधका इति व्युत्पत्तेरिति केचित्तदयुक्तं मुख्यविशेष्यविशेषणघटकस्यैव स्तनादिशब्दस्य तत्त्व-
विशेष्यमात्रगामित्वव्युत्पत्तेः यथा देवदत्तस्य पुत्रः स्वमातृभक्त इत्यादौ स्वशब्दस्य तादृशपुत्रगामित्वेन तद्गुणभूतदेवदत्तगामित्वं अतएवेह शास्त्र-

टी:२

अत्र प्रपापालिकायाः पथिकेन स्वासक्त्या पानीयदानव्याजेन बहुकालं स्वमुखावलोकनमभिलषंत्या विरलांगुलिकांजलि-
करणेन चिरं पानीयदानात् तृप्तिसंपादनेनोपकारः कृतः [illegible] एवं प्रपापालिकयापि स्तनमुखाव-
लोकनमभिलषतः पथिकस्याधारणेन करणेन चिरं पानीयदानात् तृप्तिसंपादनेनोपकारः कृतः अत्रोभयोर्व्या-
पारोऽभ्याश्लेषोपकारोऽपि परस्परोपकारो न निवर्त्तते ६॥

+ प्रं जवे +

ल एव निजतनुः स्वच्छलावण्यवापीसंभृतांभोजशोभां विदधद्भिनवो दंडपादो भवो भवान्या इत्यत्रापि वल्लभतत्योगात्वं तु षणमुत्कर्तं मम्मटभट्टैः काव्यप्रका-
यां अत्र वृत्तेन स्वविशेष्यगामित्वनियमः स्वाश्रितानां विषाणामयं पालकः स्वाज्ञाकारिणां भृत्यानामयं कल्पवृक्ष इत्यादौ व्यभिचारात् न चैवं त्वदा-
ररतानां विप्राणामहं भक्त इत्यत्र मदीयदाररतानामिति प्रतीतिः स्यादिति वाच्यं तात्पर्यस्य नियामकत्वेनापत्त्यभावादिति॥ ॥इत्यन्योन्यालंका-
रः ६॥ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ ७१ विशेषइति ख्यातंप्रसिद्धं तदुक्तं विनाप्रसिद्धमाधारमाधेयस्यव्यवस्थितिरिति छिंदंति नाशयंति तत्कराः सूर्यकिरणाः राज्ञावादित्यस्याग्रेप्रवेशश्रवणाद्दीप स्थत्वं कमलमिति अत्रमलत्वादिनामृणादेरध्यवसानं बोध्यं कुवलयेनेत्रे तानि कमलकुवलयानि कनककलतारूपायां कामिन्यां साच कनकलतिका च निर्दिश्यः कथं आप्रलयं प्रलयपर्यंतं दिवमिति दिवमुपयातानामपि येषामनल्पगुणगणयुक्ता गिरआकल्पं कल्पपर्यंतं जगंति भुवनानि रमयंति तान् का॰३

विशेषः ख्यातमाधारं विनाप्याधेयवर्णनं गतेपि सूर्ये दीपस्थाः ध्वांतं छिंदंति तत्कराः ८८ यथावा कमलमनंभसि कमले च कुवलये तानि कनकलतिकायां साच कुसुममात्रसुभगे तनुलतापरंपरामेयं अत्राद्ये कर्थस्यप्रसिद्धाधारस्याभावेपि तत्कराणामन्यत्र स्थितिरुक्ता द्वितीये सलिलस्यप्रसिद्धाधारस्याभावेपि कमलकुवलययोरन्यत्रावस्थितिरुक्ताः क्वचित्प्रसिद्धाधाररहितानाना

का॰४ माधारांतरानिर्देशं विनैवाप्रलयमवस्थितिर्वर्णिता यथा दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषां रमयंति जग का॰५

गंति गिरः कथमिव कवयो न ते वंद्याः अत्र कवीनामभावेपि गिरामाधारनिर्देशं विनैवाकल्पमवस्थितिरुक्ता विशेषः सो

कंवस्त्वने ६ पि यदेकं वस्तु वर्ण्यते अंतर्बहिः पुरः पश्चात्सर्वदिक्ष्वपि सैव मे यथावा हृदयान्नापयातोसि दिक्षु सर्वासु दृश्यसे वत्स राम गतोसीति संतापेनानुमीयसे किंचिदारंभतो शक्यवस्त्वंतरकृतिस्तथा त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणं यथावा स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजता नवद्यविद्यं विधिना ससृजे नवो मनोभूर्भुवि सत्यसविता बृहस्पतिश्च अत्राद्ये राजदर्शनारंभेणाकल्पवृक्षदर्शनरूपाशक्यवस्त्वंतरकृतिर्द्वितीये राजसृष्ट्यारंभे मनोभुवादिसृष्टिरूपाशक्यवस्त्वंतरकृतिः ७ ॥॥

यः प्रभेदांतरमाह यदीति तृतीयंप्रकारमाह किंचिदिति किंचित्पदार्थारंभेणाशक्यस्य वस्त्वंतरस्य कृति करणं च सः विशेषः त्वामिति प्रभुप्रतिपाद्यकोक्तिः काम॰

स्फुरदिति उत्कटः प्रतापरूपो ज्वलनो ग्निर्यस्य स त्वर्थः उक्तविशेषणं त्वां सृजता विधिना भुवि नवो मनोभवादिः ससृजे सृष्ट इति सत्यमित्यन्वयः अत्र चोक्तभेदत्रया ७१

नुगमत्वं सामान्यलक्षणं बोध्यं॥ ॥इति विशेषालंकारः ७॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चेद्व्याघात इतिमप्यपरिस्ताऽपस्ववते ॥ कार्यविशेषनिष्पादकतया केनचित्संभाव्यमानाद् यदन्येन कार्यविरोधिनी क्रि ८

स्यादिति यथाकारितत्कार्यसाधनं तत्र तत्र अन्यथाकारितत्कार्यविरुद्धकार्यसाधनं चेत् क्रियेत तदा व्याघातोऽलंकारः स्यादित्यर्थः यैरिति यैः करा कुविभ्रमादिभि र्जगत्प्रीयते संतुष्यन्ति तैरेव कुसुममायुधो हन्तीत्यन्वयः विरूपाक्षस्य हरस्य जयिनीः विजयकारिणीः स्तवे स्तौमि भेदान्तरमाह सौकर्येणेति कारणस्यानु गुणपक्षिक्येनेत्यर्थः निबद्धा कविवर्णिता कार्यविरोधिनी पराभिमतकार्यविरुद्धा दयेति दिग्विजयाय प्रस्थितं राजानं प्रति युवराजस्योक्तिः बाल इत्यतो मपि दया यौवराज्ये स्थापनरूपा चेत्र दातस्मादेव हेतोरहं त्वया परित्याज्य एव किं तु त्वेन सह नेतव्य इत्यर्थः अर्थादिति हेतौ पंचमी अन्वय स्वास्य समर्थ्यतइ

तोर

स्याद्व्याघातोऽन्यथाकारि तथाकारि क्रियेत चेत् यैर्जगत्प्रीयते हन्ति तैरेव कुसुमायुधः ॥ यद्यत्साधनत्वेन लोकैर्ज्ञातो वर्णितं तत्तेन चिकीर्षितविरुद्धसाधनं क्रियते चेत्तत्र व्याघातः यद्वा यत्साधनत्वेन केनचिद्धृतं तत्तदन्येन तत्साधनविरुद्धसाधनं क्रियेत चेत्सोऽपि व्याघातः तत्राद्यमुदाहरति ॥ दृष्ट्या दग्धं मनसिजं जीवयन्ति दृशैव याः विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः सौकर्येण निबद्धापि क्रिया कार्यविरोधिनी ॥ दया यासौ कर्येण समर्थ्यते चेत् सोऽपि व्याघातः कार्यविरुद्धक्रियायाः सौकर्यं कारणस्य सूचनतः तदानुगुण्यं यथा जेतव्या त्वो न्यूनतेन राज्ञा युवराजस्य राज्ये स्थापनेय . त्वार त्वेन संभाषितं बाल त्वं प्रकृत्या हि रुद्रस्य सहन नयत स्येव कारणं तथा युवराजेन परित्यागस्य युक्तं त्वं दर्शयता ता मर्थ्यते यथा वा लुब्धेन वितरणत्यर्थं तु दारिद्र्यशंकया दातापि वितरणत्यर्थं तयैव तु शंकया अत्र पूर्वार्धे पक्षपाते पक्षान्तिरूपणयो र्द्वैतेन इति लक्षणानुगतिः ८॥

त्यनेन अन्येन वक्त्रा जेत्रेति जयसाधनेत्यर्थः लुब्ध इति तयैव शंकया दारिद्र्यशंकयैव न तु निश्चितं अत्र पूर्वार्धे लुब्धस्य दानाभावसाधकत्वाभिमतदारिद्र्य शंकारूपपूर्वपक्षनिरूपणं दाता त्वं केवल विरुद्धदानसाधकत्वेन संमतेति पूर्वविरुद्धप्रकृतिरूपणमुत्तरार्धे यद्यपि द्व्यस्य तत्कालिकत्वेन जन्मान्तरीणत्वे न च शंकाभिन्ना तथाप्यभेदाध्यवसायात्र लक्षणसमन्वय इति बोध्यं सामान्यलक्षणं पूर्ववदन्यमतवघटितमनुसंधेयमिति दिक् ॥ इति व्याघातालंकारः ८॥

७१ ११२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कुं॰नं॰ गुंफ इति रचनेत्यर्थः केन तत्राह यथेति प्राक्प्राक्प्रान्तं प्राक्प्रान्तेते अनतिक्रमेति यथाप्राक्प्रान्तं यानि कारणानि तैः पूर्वपूर्वप्रतिकारणैरुत्तरोत्तरं प्रति कारणै
७१ रित्यर्थः एवं चोत्तरोत्तरेत्यादि मुक्तमेव नामिधानमुदाहरणक्रमानुरोधेनेति ज्ञेयं इति कारणमाला गृहीतेति व्युत्क्रमाण या गृहीतमुक्तरीत्या नितद्वा
यी पंक्तिरेकावलिरलंकारः नेत्रे इति तस्य भुज इति सर्वत्र संबध्यते दोःस्तंभयोर्भुजस्तंभयोर्दोलितं मांदोलनं ययोस्तौ दोलिनाविति पाठे दोला दोलनं ययोर
स्तीति विग्रहः रत्नमुकुरो रत्नदर्पणः दिक्कालेति दिक्कालात्मभिस्तुल्या यस्या काशस्य विभुता यस्तत्राकाशे विशेषेण द्योततेऽस्त्यर्थः यत्र चंद्रेऽमुष्य सूर्य

गुंफः कारणमाला स्याद्यथाप्राक्प्रान्तकारणैः। नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः॥ उत्तरोत्तरकारणभूतपूर्वपूर्वैः पूर्वपू
र्वकारणभूतोत्तरोत्तरैर्वा वस्तुभिः कृतो गुंफः कारणमाला आद्योदाहृता द्वितीया यथा भवंति नरकाः पापात्पापं दारिद्र
संभवं दारिद्र्यमप्रदानेन तस्माद्दानपरो भवेत्॥ गृहीतमुक्तरीत्यार्थश्रेणिरेकावलिर्मता नेत्रे कर्णान्तविश्रान्ते कर्णौ दोःस्तंभदोलितौ
॥ दोःस्तंभौ जानुपर्यंतप्रलंबनमनोहरौ॥ जानुनी रत्नमुकुराकारे तस्य हि भूभुजः उत्तरोत्तरस्य पूर्वपूर्वविशेषणभावः पूर्वपूर्वस्योत्तरो
त्तरविशेषणभावो वा गृहीतमुक्तरीतिः तत्राद्यप्रकार उदाहृतः द्वितीयो यथा दिक्कालात्मसमैव यस्य विभुता यस्तत्र विद्योतते यत्रा
मुष्य सुधीभवंति किरणा राशेः स यासामभूत् यस्तापित्तमुषः सुषोऽस्य हविषे यस्तस्य जीवातवे वोढा द्राग्गुणमेष मन्मथरिपोस्ताः पा

स्य किरणा अमृतरूपा भवंति स च चंद्रो यासामपां राशेः समुद्राद्भूत यश्चाग्निस्तासामपां पित्तं भवति सुचिरप्पित्तमिति कोशात यश्च यजमान उपलक्ष
णतः काले शुश्रूषाव कृदेहं निषेद्धा विरुद्धानां य भवति यश्च वायुः प्राणरूपस्तस्य यजमानस्य जीवातवे जीवनौषधाय भवति यस्या अश्वादिधावा गुणं
गंध एव वायुर्वोढा तारकानन्मथरिपोर्हरस्याष्टौ मूर्तयो वो युष्मान्पान्त्विति वयः॥ ॥इत्येकावली ९॥ ॥ ॥ ॥

८१

राजो ३

मालादीपकमिति मालादीपकंनामालंकारः स्रक्रमितिवाक्यद्वयान्वयीत्यनेनान्वितं अत इति एतावन्मात्रेणादीपसादृश्याद्दीपकं न तु शास्त्रदीपका
लंकारः प्रकृताप्रकृतानां सादृश्यस्यागम्यत्वेन दंगीकारादितिभावः संग्रामेति कोदंडेन धनुषा शराः समासादिताः शरैः शत्रुमस्तकं समासादितं तेन शत्रुमस्तके

त्व २

दीपकैकावलीयोगान्मालादीपकमिष्यते स्मरोग्रा हृदयेतस्यासक्तेन त्वयि कृता स्थितिः अत्र स्थितिरिति पदमेकं स्मरोग्रात स्याहृ
दये स्थितिः कृता तेन तस्याहृदयेनापि स्थितिः कृतेत्येवं वाक्यद्वयान्वयः अतो दीपकं गृहीतमुक्तरीतिसद्भावात् एकावली चेति
दीपकैकावलीयोगः यथा वा संग्रामांगणमागतेन भवता चापे समारोपिते देवाकर्णय येन येन सहसा यद्यत्समासादितं कोदंडेन श
राः शरैरिशिरस्तेनापि भूमंडलं तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयं अत्र येन येन सहसा यद्यत्समासादितमितिसंक्षे
पवाक्यस्थितमेकं समासादितपदं कोदंडेन शरा इत्यादिषु षट्स्वपि विवरणवाक्येषु तत्तदुचितलिंगवचनविपरिणामेनान्वेतीइ
ति इतिदीपकं शरादीनामुत्तरोत्तरविशेषणाभावादेकावली चेतिदीपकैकावलीयोगः १० ॥ ॥

+ येन

तापि भूमंडलं तेन भूमंडलेन त्वं पालकः समासादितः भवता कीर्तिरासादिता कीर्त्या च लोकत्रयं समासादितमित्यनुषंगेणान्वयः ॥ ॥ इति मालादीपकं १०॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु० नं० सारइति सारोनामालंकारः तस्याः सुधाम्नाः अंतरिति विस्मोरंतःउदरे त्रयाणांलोकानांसमाहारस्त्रिलोकी सोपिविस्मुरणिफाणीतांनानागानामीश्वरेशेषे
७३ शेतेनिद्राति सोपिशेषोपिसिंधोरेकदेशेतिष्ठती तिशेषः तमपिसिंधुमपिकुंभयोनिः अगस्त्यः चुलकयाचकारपीतवान् अगस्त्योपिनभसिगगने खद्योत
शोभांधत्ते इदंगगनमपिपेक्षणीयसुंदरंतत्कीर्तेः करणभूषणनीलोत्पलंविभातीत्यन्वयः तत्र्लः कार्यासः प्रकृतार्थीशायां प्रकृतार्थस्य

उत्तरोत्तरमुत्कर्षः सारइत्यभिधीयते मधुरंमधुतस्माच्च सुधातस्याः कवेर्वचः यथावा अंतर्विश्वमेत्रिलोकीनिवसतिफणिनामी
श्वरेसोपिशेतेसिंधौसोप्येकदेशेतमपिचुलुकयांकुंभयोनिश्चकार धत्तेखद्योतलीलामयमपिनभसिश्रीनृसिंहक्षितीन्द्र तत्कीर्तेः
कर्णनीलोत्पलमिदमपिचप्रेक्षणीयं विभाति अयंस्लाघ्यगुणोत्कर्षः अस्लाघ्यगुणोत्कर्षोयथाः तृणात्लघुतरस्तूलाद स्तु०लं०२
पिचयाचकः वायुनाकिंननीतोसौ मामयंप्रार्थयेदिति उभयं यथा गिरिर्महान्गिरेरब्धिर्महानब्धेर्नभोमहत् नभसोपिमहद्ब्रह्मततो
प्याशामहीयसी नेत्रब्रह्मपर्यंतंमहत्वंस्लाघ्यगुणाः प्रकृतार्थीशायामश्लाघ्यगुणाः यथासंख्यंक्रमेणैवक्रमिकाणांसमन्वयः
शत्रुंमित्रंविपत्तिंचजयरंजयभंजय यथावा शरणंकिंप्रपन्नानिविषवन्मारयंतिवा नत्यज्यंतेनभुज्यंतेकृपणेनधनानियत अत्रमु
क्रमालंकारइतिकेचिद्भ्राजक्लेः ११॥॥
निर

प्रायामाशायां इतिसारालंकारः यथासंख्यमिति क्रमिकाणांक्रमेणोक्तानांपदार्थानांतेनैवक्रमेणान्वयोयथासंख्यंनामालंकारः शरणमिति कृपणे
नधनानियतनत्यज्यंतेतत्किंतानिशरणंप्रपन्नानियच्चनभुज्यंतेतत्किंविषवन्मारयंतीतिक्रमेणान्वयः॥४ ॥इतियथासंख्यालंकारः ११॥ ॥ राम० ७३

श्लोक्प्रा २ केचिद्वा वामनादयः१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पर्याय इति पर्यायेण क्रमेणाऽनेकसंश्रयः अनेकाश्रितत्वं तदुक्तं एकं क्रमेणानेकस्मिन् पर्याय इति पद्ममिति रात्रौ पद्मसंकोचात्तत्त्यागः अत एव त्यागेन पूर्वसं
श्रयणाङ्गीकृतोपादेन श्रोणीति जघनं वधू स्तनतुतां कृशतां त्यजति मध्यभागस्तामेव तेऽश्रा श्रयति वक्षस्थलं कुचसंचितं कुचसहितत्वं धत्ते वक्रत्वं द्वितीयं
अत्र सर्वं वक्रसो द्वितीयत्वावगमात्पर्यायसंभवो ज्ञेयः अद्वितीयत्वं द्वितीयरहितत्वमद्वयमत्वं चैकत्वे नाध्यवसितं एवं चोदाहरणद्वयेऽपि सर्वेऽधारसमाश्रय

पर्यायो यदि पर्यायेणैकस्यानेकसंश्रयः पद्मं मुक्त्वा गता चंद्रं कामिनीवदनप्रभा अत्रैकस्याः कामिनीवदनप्रभायाः क्रमेण पद्मचं
द्ररूपानेकाधारसंश्रयणं पर्यायः यद्यपि पद्मसंश्रयणं कंठतो नोक्तं तथापि मुक्त्वेति परित्यागोक्त्या प्राक्संश्रयणापेक्षेण पर्याय
निर्वाहः अत एव श्रोणीं बधस्त्यजति तनुतां सेवते मध्यभागः पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्यां धत्ते वक्षः कुचसचिव
तामद्वितीयं तु वक्रं त्वद्गात्राणां गुणविनिमयः कल्पितो यौवनेनेत्यत्र पर्यायं काव्यप्रकाशकार उदाजहार सर्वत्र शाहः पर्यायो यथा
॥ नन्वाश्रयस्थितिरियं तव कालकूटकेनोत्तरोत्तरविशिष्टपदोपदिष्टा प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ कंठेऽधुना वससि वाचि पुनः
खलानां सर्वोऽप्ययं शुद्धपर्यायः संकोचपर्यायो यथा प्रातः श्रितत्वा वसुधामशेषां छायात्तविभ्रमा ततस्तरूणां प्रोदिंगते संप्रति ति
ग्मभानौ शैत्यं शनैरंतरपामयासीत अत्र शैत्यस्योत्तरोत्तरमाधारसंकोचपर्यायः १२ ॥॥ घ२

णां गम्यं तु त्तराधारसमाश्रयणांशाकृमिति सर्वत्र सर्वाधारसमाश्रयणांशे नचिति हेकालकूटउत्तरोत्तरं विशिष्टमुत्कृष्टं पदं स्थानं यस्यां ताहशी इयमाश्रयस्थि
तिस्त्वकेनोपदिष्टेत्यन्वयः हृदये अभ्यंतरे अर्णवस्येति शेषः अथानंतरं वृषलक्ष्मणो हरस्य कंठे अधुना पुनरिति संबंधः शुद्धः संकोचविकासाऽसंमिश्रितः प्रायइ
ति शैत्यं प्रापोऽशेषां वसुधां हेमंते चरित्वा ततो वसंते तरूणां छायाऽसविभ्रमसंप्रति ग्रीष्मेति गमभानौ सूर्ये प्रौढिं प्राप्ते संप्राप्ते सति शनैरपां जलानामंतरे भ्यंतरे आया

सा०ताववृत्तिक्षेपार्थः १२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुं·नं·
७४

बिंबोष्ठ एवेति बिंबफलसदृशेऽधरोष्ठे· रागो रक्तिमा अनुरागश्च· एषः रागः अनुरागस्य भेदेप्यभेदाध्यवसायादेकत्वं यत्तु एकसंबंधनाशोऽनन्तरमपरसंबंधेसत्ये
व लोके पर्यायपदप्रयोगात् श्रोणीबंध इति प्रकाशोदाहृते तत्रैव दृष्टत्वात् बिंबोष्ठ एवेत्यत्र पर्यायकथनमयुक्तमिति केनचिदुक्तं तत्प्रकाश एव बिंबोष्ठ इत्युदा
हरणोपर्यायसमर्थनात् तथांतपक्षपतनमिति बोध्ये त्याशयं आलंकारिकपरिभाषितानां शास्त्रीयानां लोकव्यवहाराविसंवादस्याकिंचित्करत्वाच्चेतिदिक् भेदांतरमाह

विकासपर्यायो यथा बिंबोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत अधुना हरिणशावाक्षि हृदयेप्येष दृश्यते अनुरागस्य सर्वाधारापरित्यागेना
धारांतरसंक्रमणमिति विकासपर्यायः एकस्मिन्यदनेकं वा पर्यायः सोपि संमतः अधुना पुलिनं तत्र यत्र स्रोतः पुराऽभवत् यथा वा
॥ पुराऽभूदस्माकं प्रथममविभिन्ना तनुरियं ततो नु त्वं प्रेयान्वयमपि हताशाः प्रियतमाः इदानीं नाथस्त्वं वयमपि कलत्रं किमपरं हतानां
प्राणानां कुलिशकठिनानां फलमिदं अत्र दंपत्योः प्रथममभेदः ततः प्रेयसी प्रियतमभावः ततो भार्यापतिभावः इत्याधेयपर्यायः ॥१३

एकस्मिन्निति पर्यायेणोत्पत्तु वर्तते एकस्मिन्नाधारे क्रमेणाऽयद्यनेकं भवति सोपि पर्यायालंकारः संमत इत्यर्थः पुरेति आस्माकमित्यस्मदो द्वयोश्चेति द्वयोरपि ब
हुवचनं पुरेत्यनेन स्थूलोऽतीतकाल उच्यते तत्रापि प्रथमं तनुरविभिन्नाऽभूत् ततो नु वितर्के त्वं प्रियतमः वयं प्रियतमाः इदानीं तु त्वं नाथः पतिः वयं भार्याः इ
तोऽपरं किमनिष्टमिति शेषः कुलिशं वज्रं अत्र त्वं प्रेयानित्येकवचनेन एकरूपप्रेमपात्रत्वं व्यज्यते प्रियतमा इत्यादिबहुवचनेनैकरूपत्वहानिरेक इति बोध्यं ॥ ॥३

पर्यायः ॥१३॥

राम
७४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिवृत्तिरिति न्यूनाधिकयोर्मिथः परस्परं विनिमयः परिवृत्तिरलंकारः जयाहेति· कराद्दूरं पूर्वकं सकं शरं मुक्त्वारिपोः श्रियं जयाहेत्यर्थः तस्य चेति· प्रवयसोऽति वृद्धस्य जरातुषोऽथ प्रविशेषस्य स्वर्गगतवतः किमिव शोचनीयं न किंचित् जर्जरं जीर्णतरं कलेवरं शरीरं तस्य व्ययो ऽवगतेन महद्युद्वेत्यागतस्मा यशः क्रीतं शरीरं दत्त्वा यशो गृहीतमित्यर्थः इति परिवृत्त्यलंकारः परिसंख्येति एकं वस्तु तत्रेति विधाय परस्मिन् वस्तुनो निषेधनं नियमनं परिसंख्यालंकारः स्नेहेति·

परिवृत्तिर्विनिमयोऽन्यूनाभ्यधिकयोर्मिथः जयाहैकं शरं मुक्त्वा कराद्वा त्वारिपुश्रियं यथा वा तस्य च प्रवयसो जरातुषः स्वर्गिणः
किमिव शोच्यते ऽभुक्ता येन जर्जरकलेवरव्ययात् क्रीतमिंदुकिरणोज्ज्वलं यशः परिसंख्या निषिध्यैकमेकस्मिन् वस्तु यंत्रणा स्नेह
क्षयः प्रदीपेषु न स्वांतेषु नतभ्रुवां यथा वा विलंघयंति श्रुतिवर्त्म यस्यां लीलावतीनां नयनोत्पलानि विभर्ति यस्यामपि वक्रि
मानमेको महाकालजटेंदुः आद्योदाहरणे निषेधः शाब्दः द्वितीये त्वार्थः विरोधे तुल्यबलयोर्विकल्पालंकृतिर्मता यथा
शिरांसि चापान्वा नमयंतु महीभुजः अत्र संधिविग्रहप्रमाणागमयोः शिरश्चापनमनयोर्युगपदनुपस्थितयोर्युगपत्कर्तुमशक्
योर्विकल्पः यथा वा पतत्यविरतं वारि नृत्यंति च कलापिनः अद्य कांतः कृतांतो वा दुःखस्यांतं करिष्यति ।प्रियस्यागमनं चे
त्तु मरणमाशंसनीयं मरणोत्तु नप्रियसमागमसंभव इति तयोराशंसयोर्विकल्पः ५४ ॥ ॥

स्नेहस्तैलादिस्निग्धद्रव्यं अनुरागश्च· स्वांतेषु चित्तेषु· विलंघयंतीति यस्यामुज्जयिनी पुर्यां श्रुतिः कर्णाः वेदश्च· वर्त्म मार्गः· वक्रिमा राजां कौटिल्यं· वक्रकार णाच· महाकाल इति तन्नैव रव्यातं शिवलिंगं ॥ इति परिसंख्यालंकारः संधिविग्रहप्रमाणेति· संधिविग्रहयोः कर्तव्यतावोधकप्रमाणोत्यर्थः इति विकल्पः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु॰ने॰ वल्लभामिति युगपत्भावो भवनं तत्रज्ञानं वल्लभानां गुंफो निबंधः वर्णनमितियावत् समुच्चयालंकारः विश्वासोति नायकं प्रतिदूत्या उक्तिरुक्तिः हे साधो त्वया
७५ त्वद्दये विनिहितं प्रेयाभिधानं शल्यं धारयंती विधुरिता विरह विक्लवा सा नायिका या हि दधाति तदा कर्णपतामित्यन्वयः। किं तदित्यपेक्षायामाह। शेते निद्र
नि॰ ता म्यति म्लानिं प्राप्नोति प्रकर्षेण स्नायति प्रेंखति॰ चलति प्रलपति नैवल्यातिशयेन मूर्छा या भवति गलति स्वेदातिशयात् उद्घाति॰
क्षीणा भवति कास्ताचित्तशयन भ्रमणादीनां शतपत्रस्य कमलस्य पत्रशतं दलशतं अहं प्राथमिकेति अहं पूर्विकेत्यर्थः अहं पूर्वमहं पूर्वमित्यहं
३२

वल्लभानां युगपद्भावभाजां गुंफः समुच्चयः न शंपंति प्रस्नात्य शयंति त्रसंति चमवाङ्मुखः अविरोधेन संभावितयोगपद्यानां समुच्चयः प
ध्यात्वा विश्राणात् हृदये त्वया विनिहितं प्रेमाभिधानं नवं शल्यं या हि दधाति सा विधुरिता साधो तदा कर्णेतां शेते स्वप्न॰ निता म्यति प
गु॰ क॰ नी॰
लयति प्रस्नायति प्रेंखति धाम्यत्सु त्रुवति प्रलपति गलत्सु मूर्छति त्रुद्यति अत्र कासांचित्क्रियाणां किंचित्काल भेद संभवे ऽपि शत
पत्रपत्रशतभेदन्यायेन योगपद्यं विरहातिशय द्योतनाय विवक्षितमिति लक्षणानुगतिः अहं प्राथमिका भाजामेक कार्यान्व
येऽपिसः कुलं रूपं च यो विद्या धनं च मदयंत्यमुं पर्वैः कार्यासिद्धिहेतुत्वेन प्रक्रांत तत्तद्वान्येऽपि यद्य अहमहमिकया खलेकपोतिका
न्यायेन तत्सिद्धिं कुर्वंति सोऽपि समुच्चयः यथा मदे अभिजात्यमेकं समयं कारणं तद्देवरूपादिकमपि तत्साधनत्वेनावतरति यथा गा
प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिर्निरुत्सेको लक्ष्म्या मनमिभव गंधा परकथा प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः श्रुते त्यक्ता सक्तिः
रिका स्त्रियामित्यमरः एककार्यान्वये एककार्यसाधकत्वे सः समुच्चयालंकारः अहमहमिकया परस्पराहंकारेण अभिजात्यं कुलीनत्वं समयं प्रच्छ
ले॰ प्रदानमिति प्रच्छन्नं गुप्तं गृहं प्रत्युपगतेऽर्थादतिथौ॥ लक्ष्म्या मत्तानिरुत्सेको गर्वाभावः अभिभवो निरादरः कं धुन्वानाः मौनं अनुद्घाटनं सदसि राम॰
सभायां परेण कृताया उपकृतेः कथनं कृतेशास्त्रश्रवणे सर्वप्रथमांतानां पुरुषमभिजातं प्रख्यतीत्यनेनान्वयः अभिजातं कुलीनं प्रख्याति॰ कथयति ७५
॥समुच्चयालंकारः १॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमिकेति क्रमिकानामर्थात्क्रियाणामेककारकगतानां गुंफो निबंधः कारकदीपकं नामालंकारः तदुक्तं सैव क्रियासु बह्वीषु कारकस्येति दीपकमिति सैव सकृद्
वृत्तिः पश्यति। सार्थं एच्छति मार्गी। निद्रातीति हे अम्बिके त्वेष भूषणमुद्यतरेडैर्हीरिस्त्रीषि कृतैर्हीर पालीरित्यसकृद्धारितानन्तरस्वदीनान्स्मान्स्मा(मिरु हद्युतीनां परम
परिचितैरपांगैः कटाक्षैः पश्येत्यन्वयः इतिकिं प्रभृतिर्द्रातीत्यादि अंतः अंतः पुरे अक्षैः पार्श्वे दीव्यति क्रीडति अथ पुनः छाया सादृश्यं मुखदीपकस्य प्र

५२ क्रमिकैकगतानां तु गुंफः कारकदीपकं गच्छत्यागच्छति पुनः पांथः पश्यति पृच्छति यथा वा निद्राति स्नाति भुंक्ते चलति कचभरान् शोषय
त्यंतरात्तो दीव्यत्यक्षैर्नचापांगदितु मवसरो भूयस्त्वा पाहि यात् हि इत्युदंडैः प्रभूणामसकृदधिकृतैर्वारितान् द्वारि दीनान्स्वप्यास्मान्क्षिकन्त्वेम
रसिरुहदृशामंतरंगैरपांगैः आद्योदाहरणे कृतस्य पांथस्य कर्तृकारकस्य गमनादिष्वन्वयः द्वितीये त्वधात्वेत्तस्य प्रभोः कर्तृकारकस्य नि
द्रादिष्वन्वय इत्येकस्यानेककारकेष्वन्वयेन दीपकछायापत्त्या कारकदीपकं प्रथमसमुच्चयप्रतिद्वंद्वी दंसमाधिः कार्यसौकर्यं कारणांतरसन्नि
धेः उक्तं विन्ताचक्रे रणीजगीमासंवभावुमार यथा वा मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितं के तदुष ५
न विदाः स्वस्य कार्यस्य कारणांतरसंनिधानाद्यत्सौकर्यं तत्सम्पाधान्ना समाधिः द्वितीयसमुच्चयप्रतिद्वंद्वी समाधिः तत्र व स्तनांपुते ५४
कसमर्थानां स्वखेकपोतिकान्यायेन युगपत्तत्साधनार्थमवतारः अत्र त्वेके न कार्यं समाधिः क्षितैत्यस्य काकतालीयन्यायेनाप्येत तत
स्य तत्सौकर्याधायकत्वमात्रमत्रोदाहरणो उक्तं वितेतु कं वेवधियामि सारोऽपुष्कलं कारणांतनत्वधकारमपेक्षते अत्रारूढो हिनारी
णामकालज्ञो मनोभव इति न्यायाद्विवादापतत्त्वं धकारेणांतरसौकर्यमात्रं कृतमिति एवं द्वितीयेपि योज्यं १॥ ॥

वैद्धषकारेणासंभवादिति भावः प्रतिद्वंद्वि विपरीतं॥ ॥ इति कारकदीपकालंकारः समाधिरिति कारणांतरसंनिधेर्वशात्कार्यस्य सुकरत्वं समाधि
रलंकारः उक्तं विता नायकस्य मीपं गंतु मानमिति मानं निराकर्तुमस्याः पादयोः पतिष्यतो मम उपकाराय दिष्ट्या भाग्येनेदं घनगर्जितमुदीर्णमुद्भुतमित्य
न्वयः समुच्चये कारणानां तुल्यकक्षत्वमिह तु तद्विपरीतमतुल्यकक्षत्वमिति प्रतिद्वंद्वित्वं तत्रेत्यादिना दर्शितं॥ ॥ इति समाध्यलंकारः १॥ ॥ ॥

कार्यसाधनार्थमवतार ८८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रत्यनीकमिति बलवतः शत्रोः पक्षेपक्रांतः पातिनिर्तदीपेयः पराक्रमस्तत्प्रत्यनीकं नामालंकारः अतीकशतिनिषिद्धरूपत्वात् जैत्रेति उत्पलाभ्यांसत्वजयकारि
नेत्राबुसारिरागोकर्णाग्रस्थः कृतौतिरस्कृतौ अत्रतेसततयानद्‌परिस्थितत्वादधस्तात्कृतौ चेति श्लेषः ममेति भुवि भूलोके मम रूपख्यातिं पोढ्ढतवान्नतस्मि
न्ननुप्रविष्टमनुरक्तं हृदयं यस्यास्तस्यानुप्रविष्टं हृदयं यस्यां वा ताद्दशीयमिति त्वयिमत्सरादिवैवल्गुनिश्चितं निरस्तदर्पो मदनस्तां शिरोगातिञ्ञी णां करोतीत्यन्व
यः अत्रमत्सरादिवेतिहेत्वंशोत्प्रेक्षामत्वेपितद्धेतुकप्रतिपक्षसंबंधिबाधनंप्रत्यनीकालंकारस्यविविक्तोविषयइतिबोध्यः तन्तरेव मम्मटभट्टैरपि तंवि

प्रत्यनीकं बलवतः शत्रोः पक्षेपराक्रमः जैत्रनेत्रानुगौकर्णौ उत्पलाभ्याममः कृतौ यथावा ममरूपकीर्त्तिमहरद्भुवियस्तदनुप्रविष्टहृदयेयमिति त्वयिमत्सरादिवनिरस्तदयः स्फुतंशिरोगोतिवल्गुतां मदनः एवं बलवति प्रतिपक्षे प्रतिकर्तुमशक्तस्य तदीयबाधनं प्रत्यनीकमिति स्थिते सा क्षात्सातिपक्षे पराक्रमः प्रत्यनीकमिति के प्युक्तिकल्पायेन फलति यथावा मधुव्रतौघः कुपितः स्वकीयमधुपपापद्मनिमीलनेन बिंबं समाक्रष्य बलात्सुधांशोः कलंकमंकेभ्रुवमातनोति ३॥

निर्जितमनोभवरूपः साचसुंदरभवत्यनुरक्ता पंचभिर्युगपदेवशरैरनंगतापनशोषणादिकामप्रदत्यनुदाहृतं स्वयं बहेतृत्प्रेक्षयैवगतार्थत्वान्नेदमलंकारांतरं भवितुमर्हतीति कस्यचिद्वचनमनादेयं केमुतिकेति तत्संबंधिबाधनापेक्षया साक्षात्तद्बाधने विशेषादिति भावः मधुव्रतौघः स्व
कीयमधुपपद्मस्य निमीलनेन कुपितः स्वसुधांशोर्बिंबं बलात्समाक्रष्य तस्यांकेमध्यभागे कलंकमं भ्रुवमाततनोतीत्यन्वयः॥ ॥इतिप्र
त्यनीकालंकारः ३॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कैमुत्येनेति कैमुत्यन्यायेनेत्यर्थः काव्येलंकाररूपार्थापत्तिः काव्यार्थापत्तिः दण्डापूपिकेति दण्डाकर्षणेन दण्डसंबद्धानामपूपानामाकर्षणं यथार्थसिद्धं तद्वदि त्यर्थः वारणायेति लक्षणवारणायेत्यर्थः अधरोयमिति बन्धुजीवं बन्धूकपुष्पं तस्य प्रभाहरः बन्धुभूतानां जीवानां प्रभाहरश्च यद्येतल्लक्षणमयुक्तं कैमुतिकन्यायस्य न्यूनार्थविषयत्वेनाधिकार्थापत्तावव्याप्तेः यथा तवाग्रे यदि दाशरथेः स्थितं भूयहि जन्मना शनैः सवितुरप्ययं तमः स्थास्यतीत्यसंशयात्र शनैः शरदमहिम्ना राजाग्रे दारिद्र स्थित्यपेक्षया तत्र्या तमोवस्थानं दुःशकमेवेत्यवगतमपि न्यायसाम्यादापाद्यते नन्वत्र कैमुतिकन्यायेनेति केनचिदुक्तं तत्रेदं वक्तव्यं केनचिदर्थेन तुल्यन्यायत्वादर्था तरस्यापत्तिरर्थापत्तिरिति त्वदुक्तलक्षणमयुक्तं का वार्ता सरसीरुहामित्यादिकैमुत्यन्यायविषयार्थापत्तावव्याप्तेः कैमुतिकन्यायस्य न्यूनार्थविषयत्वेन तुल्यन्यायत्वा

कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहां अत्र स इत्यनेन पद्मानि येन जितानीति विवक्षितं ॥
तथा च सोपि येन जितस्तेन पद्मानि जितानीति किमु वक्तव्यमिति दण्डापूपिकान्यायेन पद्मजयरूपस्यार्थस्य सिद्धिः काव्यार्थापत्तिः तांत्रिकाभि
मतार्थापत्तिव्यावर्तनाय काव्यविशेषणं यथावा अधरोयमधीराक्ष्या बन्धुजीवप्रभाहरः अन्यजीवप्रभां हन्त हरतीति किमद्भुतं स्वकीयं
हृदयं भित्वा निर्गतौ यौ पयोधरौ हृदयस्यान्यदीयस्य भेदने कृपा तयोः ॥ ४ ॥ ॥

कृ १

भावात् तत्र च कैमुत्यन्यायतामात्रं न तत्त्वलंकारत्वमिति युक्तं अलंकारतत्वाभियुक्तानां प्राचीनानां अन्यत्तहृदयतया अपामरेणासंभावयितुमश क्यत्वात् लोकव्यवहारेपि कैमुत्यन्यायस्य चमत्कारित्वानुभवे तेनैव न्यायेन तस्यालंकारतासिद्धेश्च इत्थं च तदुक्तार्थापत्तिर्दूरहसोवक्ष्यमाणः संभावना लंकारो यो यद्यर्थोक्तौ च कल्पनमिति यद्यर्थातिशयोक्तित्वेनोक्तः यद्यर्थातिशयोक्तावपद्यापादकयोर्विपरीतार्थविश्रान्तत्वमिह तत्वापादकस्य सिद्धत्वमापा द्यस्य संभाव्यमानत्वमिति वैचित्र्यं तु तादवांतरभेदतायाः साधकं न तु तद्बहिर्भूततापादकमिति तत्र व्याप्तिशंकापीत्यलं विस्तरेण ॥ ॥ इत्यर्थापत्तिः ॥ ४ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अर्थांतर १

कु.नं. समर्थनीयस्येति समर्थनापेक्षस्यार्थस्य समर्थनं काव्यलिंगमलंकारं स्यात् अवारणाय समर्थनापेक्षस्येति यदात्वर्थान्तरन्यासप्रकरणात् वक्ष्यमाणरीत्या सामान्यवि
७७ शेषभावातिरिक्तत्वं निवेश्यते तदानीमुपादेयमेवैतदिति बोध्यं दुष्करविषयत्वात् दुष्करविषयरूपत्वात् समर्थनापेक्ष्यस्यैतन्नंतरमर्थस्येति शेषः नैयायिकेति

धर्म २

समर्थनीयस्यार्थस्य काव्यलिंगं समर्थनं जितोसि मंद कंदर्प मच्चित्तेस्ति त्रिलोचनः अत्र कंदर्पजयोपपन्नाः स्यदुष्करविषयत्वात् स
मर्थनसापेक्षस्य मच्चित्तेस्ति त्रिलोचन इति स्वांतःकरणे शिवसंनिधानप्रदर्शनेन समर्थनं काव्यलिंगं व्याप्तिपक्षतादिसापेक्षनैया
यिकलिंगव्यावर्तनाय काव्यविशेषणं इदं वाक्यार्थहेतुकं काव्यलिंगं पदार्थहेतुकं यथा भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्ष
माले शिवं हा सोपानपरंपरे गिरिसुताकांतालयालंकृते अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखालोकोच्छेदिनि मोक्षना
मनि महामोहे निधीयामहे अत्र मोक्षस्य मोहत्वमप्रसिद्धमिति तत्समर्थने सुखालोकोच्छेदिनीति पदार्थो हेतुः क्वचित्पदार्थवाक्या
र्थौ परस्परापेक्षौ हेतुभावं भजतः ५॥॥

भक्त १

नैयायिकाभिमतलिंगस्य लक्ष्यतावारणायेत्यर्थः भस्मोद्धूलनेति संबोधनं सुभमस्त्विति शेषः गिरिसुताकांतस्य शिवस्यालयः शाला तदलंकारभूते सोपान
पंक्ते इत्यपि संबोधनं हेति दैन्ये विभुना प्रभुना शिवेन युष्माकं या सपर्या तज्जात सुखस्यालोकः प्रकाशस्तदुच्छेदके निधीयामहे वयमित्यर्थात् ५॥ ॥ साम० ७७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चिकुरेति चिकुरप्रकराः केशकलापाः विदुषीपंडितास्तासदमयंती ॥ अपुरस्कृतेन अनादृतेन पुरोभागेऽनिहितेन च पदार्थस्य अनेकपदार्थस्य च वपुरिति पुरारेर्बालि
न कापि जन्मनि कुचिदपि कुत्रापि भवंतं न प्रणातवान् इत्यादि वपुषः शरीरस्य प्रादुर्भावाद् अनुमितं संप्रति नमन्तं नतिं कुर्वन्तं मुक्तश्च न त्वरशरीरः अहम् अग्रेऽप्यनतिभाक्
न तिरहितः समर्थनीयं हेतुकथनेनोपपादनीयं असमर्थ्यत्वात् असमर्थहेतुकत्वात् अत्र अनयोर्वाक्यार्थयोर्मध्ये द्वितीयवाक्यार्थे अग्रेऽप्यनतिभागि

यथा चिकुरप्रकरा जयंतीति विदुषीमूर्द्धनि साभिर्भासिता यात् पश्यनार्यपुरस्कृते नतनुजनामिच्छति चामरग्राहकः अत्र चामरस्य दमयंतीकुंतल
भारसाम्याभावे विदुषीमूर्द्धनि स्थिता स्त्रीभिर्भासेतेति वा क्यार्थः पश्यनार्यपुरस्कृतेनेति पदार्थस्तेत्युभयं मिलितं हेतुः क्वचित्समर्थनीयार्थसमर्थना
र्थं वाक्यार्थं पदार्थौ हेतुः यथा वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा पुरारे न क्वापि कुत्रापि भवंतं प्रणातवान् नमन्मुक्तः संप्रत्यह
मतनुरग्रेऽप्यनतिभागीतीश कृतवान् तदिदमपराधद्वयमपि अत्र तावदपराधद्वयमपि समर्थनीयमस्पष्टार्थत्वात् तत्समर्थने च पूर्वापरजन्मनो
रनुमानाभ्यां वाक्यार्थभूताभ्यां क्रियते अत्र द्वितीयवाक्यार्थे तत्र तु समेकपदार्थो हेतुः अत्रापि संप्रति नमन्मुक्त इति वाक्यार्थोऽनेकपदार्थो
वा हेतुः क्वचित्परस्परविरुद्धयोः समर्थनीययोरुभयोः क्रमादुभौ हेतुभावं भजतः यथा असोढा तत्कालोल्लसदसहभावस्य तपसः कथा
नां विस्रंभेष्वथ च रसिकः शैलदुहितुः प्रमोदं वो दद्यात्कपटवटुवेषापनयने त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः अत्र शिवस्य युग
पत्क्रियमब्रह्मचर्यापनयनत्वरातदनुवर्तनेच्छयोर्विरुद्धयोः क्रमात् गिरिजायास्तपसोऽसहिष्णुत्वं तत्संलापकौतुकं चेत्युभावर्थौ हेतुत्वेन निब

गितावाक्यार्थे अत्रापि अत्र तु त्वेपि नमन्मुक्त इत्यस्य वाक्यत्वादाह अनेकपदार्थौ वेति असोढेति तपस्यंतीं पार्वतीं प्रति वटुवेषेणागतस्य हरस्य वर्णनं कपटेन
यो वटो ब्रह्मचारी शिरो वेषस्तस्यापनयने त्वराशैथिल्याभ्यां युगपदभियुक्तः आक्रांतः त्वराशैथिल्ये हेतुगर्भक्रमेणा विशेषणद्वयमाह तत्काले उल्लसन् प्रादु
र्भवन् सहभावो ऽसहत्वं असमर्थता यो यस्य तादृशस्य तपसः असोढा सहनासमर्थः शैलकन्यायाः कथानां विस्रंभेषु विश्वासेषु रसिकश्चेति ब्रह्मचर्यं ब्रह्मचारि,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रसमास्वादयन्मुरारिरूपं ॥ अंबुधिमथनक्लेशकलयन्निविफलत्वं च सफलत्वं च ॥ अत्र विफलत्व सफलत्वकारणतयोर्विरुद्धयोरेक
र्दवौ बुधितनयाः४

कु.नं. जीयादिति अंबुधेस्तनयाया जरूया अधररसमास्वादयन्नयं मुरारिर्जीयात सर्वोत्कर्षेण वर्त्ततां कीदृशः समुद्रमथनक्लेशं एवं विशेषांगना लाभात्सफलं कलयन्
७८ ज्ञानन् एतदधरमाधुर्ये सत्यमृतस्यैवेप्यर्थाद्विफलं च कलयन्नित्यर्थः हेगोदावरीत्वत्तार्त्तिबमशोत्यादिन्नस्नविशेषणास्यन्यसं नंस्लेषाख्योगुणाइति जयदेवेनोक्तमित्यन्वय
नावकततटेहेशैलदीयतीरभूमौ कलिंगास्वः कविः [redacted] तस्ता देशानां दर्शने सहचारिणी विरक्तिं मुक्तिं एतां सरस्वतीं ब्रस्नाणां च तिगमयन्येति संबंधः कीदृशं अ

काचित्परस्परविरुद्धयोरूभयोः समर्थनीययोरेकस्यन हेतुः यथा जीयादंबुधितनयाधररसास्वादो हेतुः इदं काव्यलिंगं हेतुलं
कार इति केचित् व्यवजह्रुः हेगोदावरिदेविनावकतटे हे शोकलिंगः कविर्धाऽदेवीवड्डदेशदर्शनसवीत्वत्का विरक्तिं गतः एनांम
र्णवमधास्त्रप्रसुजिन्नाभीसरोजासनंत्रस्नाणं गमयक्तितो कथमस्तावेकाक्किनीस्थास्यति इत्यत्र ब्रस्नणः ख्यापणं कथं गोदाव
र्याः कर्त्तव्यं इत्यसंभावनीयार्थोपपादकस्याराणवमध्येत्यादितद्विशेषणस्यत्य सतं स्लेषाख्योगुणा इति स्लेषोऽविघटमानार्थ
घटकार्थस्यवर्णानमिति स्लेषलक्षणमिति च जयदेवेनोक्तं वस्तुतस्त्वत्रापि पदार्थहेतुकं काव्यलिंगमेतत् भेदकाभावात् ७ ॥

र्णवमध्येहृत्वोयोसुरजित्सुरारिस्तन्नाभीकमलस्थं स्लेषोऽविघटमानेत्यत्राकारप्रश्लेषः अविघटमानस्यानुपपद्यमानस्यार्थस्यघटक उपपादको योऽर्थस्तस्यवर्णानं
स्लेषाख्योगुणा इत्यर्थः पदार्थः पदार्थहेतुकं समस्तपदार्थहेतुकं ७ ॥ ॥ ॥ ॥ राम०
७८.

१८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदार्थवाक्यार्थेतिद्वंद्वः प्रतीयमानोर्थः व्यंग्योर्थः प्रतिनिर्दिष्टत्वादिति निर्दिश्यते उच्चार्यत इति निर्देशः शब्दः तेन विपरीतार्थकशब्दत्वादित्यर्थः तस्यतादृ
शात्प्रतीयलोचनत्वस्य तथा चोभयत्र परिकरालंकारः स्तत्वात्काव्यलिंगोदाहरणत्वमनुपपन्नमिति भावः तयोः प्रश्नेत्याद्युक्तोदाहरणयोः तद्युत्यापि

हमतेत्नुर ग्रेष्य ३

ननु स्वाभिप्रायपदार्थवाक्यार्थविन्यासनरूपात्परिकरात्काव्यलिंगस्य किं भेदकं उच्यते परिकरे पदार्थवाक्यार्थबलात्प्रतीयमानो
५४ र्थो वाच्योपकारकतां जते काव्यलिंगे तु पदार्थवाक्यार्थावेव हेतुभावं भजतः ननु यद्यपि स्तरलालोकोच्छेदिनीत्यादिपदार्थहे
तुककाव्यलिंगोदाहरणे [illegible] तिमानित्यादिवाक्यार्थहेतुककाव्यलिंगोदाहरणे च पदार्थवाक्यार्थावेव हेतुभावं भजतः त
थापि प्रस्तुतायामुदाहृतौ नेति वाक्यार्थहेतुपदार्थहेतुकोदाहरणे मार्च्छन्नत्रिलोचन इति वाक्यार्थहेतुकोदाहरणे च प्रतीयमानार्थ
स्यापि हेतुकोटावनुप्रवेशो लभ्यते प्रश्नेति स्वविवेकित्वाभिप्रायगर्भं विदुषीत्यस्य प्रतिनिर्देशत्वात् त्रिलोचन इति च कंदर्पदाह
कतृतीयलोचनत्वाभिप्रायगर्भं कंदर्पजयोपयोगित्वात्तस्य सत्यं तथापि तयोः परिकर एव किंतु तदुदाहृत्यापि तं काव्यलिंगम
पि प्रतीयमानाविवेकविशिष्टप्रस्तुताप्युदाहृतत्वस्यानेकपदार्थस्य प्रतीयमानकंदर्पदाहकभालतृतीयलोचनविशिष्टस्य शिव
स्याचित्तसन्निधानस्य वाक्यार्थवाक्यस्यैव हेतुभावात् ८ ॥ ॥

स्यच१

तं परिकरोपपादितं व्यंग्यस्य हेतुकोटावेवानुप्रवेशादिति भावः एतदेव विवृणोति प्रतीयमानेति ८ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ वाक्यस्यैवेत्येवकारस्य चिंत्यत्वं प्राहारकत्वं न हीत्यादिना विवृतं तदयमर्थः यदि पद्मादिपदव्यंग्यकेशपाशसाम्याभावेऽर्थस्य साकांक्षानुपपादकं स्यात्तदा तत्परिकरश्लोकस्यात्र
७९ काव्यलिंगत्वं न त्वेवमस्ति पद्मपदप्रतीताविवेकितमात्रेण साम्याभावस्योपपादनासंभवात् किंतु तद्विशिष्टपद्मपुरस्कृतत्वाभावस्यैव साकांक्षानुपपादकं इति त
त्कोटिनिविष्टव्यंग्यकाव्यलिंगरूपस्य तस्यांगमेव व्यंग्यांतरं तु नोक्तकाव्यलिंगगम्यमर्थोपपादकमस्तीति निराबाधमेव काव्यलिंगमिति नतु स्वयमन्योपपादकस्य का

श्लो २

न हि तयोर्वाक्यार्थयोर्हेतुभावेनाभ्यां प्रतीयमानं मध्ये किंचिद्द्वारमस्ति यथा सर्वाश्रुचिनिधानस्येत्यादिपदार्थपरिकरोदाहरणे सर्वा
श्रुचिनिधानत्वादिनानेकेन पदार्थेन प्रतीयमानं मध्ये किंचिद्द्वारमस्ति यथा सर्वाश्रुचिनिधानस्येत्यादिपदार्थपरिकरोदाहरणे
सर्वाश्रुचिनिधानत्वादिनानेकेन पदार्थेन प्रतीयमानं शरीरस्यासंरक्षणीयत्वं यथा च वाक्यार्थपरिकरोदाहरणे पर्यायोक्तविधया
तेन हाक्यार्थप्रतीयमानं नाहं व्यास इत्यादितस्मात्पशुनेत्यत्र त्रिलोचन इत्यप्रच्च प्रतीयमाना सा च स्वैवहेतुभावोपपादकतया का
व्यलिंगस्यांगमेव यथा पद्मनेत्रेत्र समानकांतिसलिले मग्नं तदिंदीवरं मित्यनेकवाक्यार्थहेतुककाव्यलिंगोदाहरणे त्वन्नेत्रसमा
नकांतित्वादिकानिंदीवरशशिहंसविशेषणानि तेषां वाक्यार्थानां हेतुभावोपपादकानीति तत्र वाक्यार्थहेतुककाव्यलिंगे प
दार्थहेतुककाव्यलिंगमंगमिति न तयोः काव्यलिंगोदाहरणोनैका चिदनुपपत्तिः ९॥॥ पदार्थस्य वाक्यार्थस्य

नो २

व्यलिंगस्याप्युपपादकं क्वाहष्टमित्याशंक्योदाहरति यत्त्वन्नेत्रेति एतत्सतीपालंकारे प्रागुदाहृतं अनेकवाक्यार्थहेतुकेति पूर्वपादत्रयवाक्यार्थत्रयस्य चतुर्थपा
दार्थहेतुत्वमिति ज्ञेयं हेतुभावोपपादकानीति इंदीवरस्य नेत्रसमानकांतित्वं विना पदादेरितरदर्शनस्यदैवगतकांताहशप्रविनोदासहिष्णुत्वे हेतुत्वासंभ
वादिति भावः समाहितमर्थमुपसंहरति इतीति तयोः पद्मनापीतिमाचिनेनेत्यनयोः ॥ ॥ इति काव्यलिंगालंकारः ९॥ ॥ ॥ रामं॰ ७९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

५ न्नेनसहाप्रस्तुत ५
६ न्नपाद्दि ९

प्रकृतव्यंजकत्वेनेति अप्रकृतताभिधानं युज्यते इत्यनुषज्यते एवमग्रेऽपि विस्रब्धेति खलस्य विस्रब्धस्य घातस्तद्रूपो दोषः तस्यैव वधाय भवति यतो वीराणां कोपकारकः
सिंहनिद्रापहारी नवतत्कृप्तभंगजन्य ध्वनिः करिणो वधाय यथेत्यर्थः तददर्शनात् उपमानत्वादर्शनात् नन्वमहाप्रकृष्टाकृतिरियं गंभीरेयमस्याकृतिरित्यादौ सामा
उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः हनूमानब्धिमतरत् दुष्करं किं महात्मनां गुणवद्वस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवं पुष्पमाला
नुषंगेन सूत्रं शिरसि धार्यते सामान्यविशेषयोर्द्वयोरप्युक्तिरर्थान्तरन्यासः तयोश्चैकं प्रकृतमन्यदप्रकृतं भवति तत्र विशेषे प्रकृते तेन म
हाप्रकृते सामान्ये सामान्ये प्रकृते विशेषरूपस्यान्यार्थस्य न्यसनमर्थान्तरन्यास इत्युक्तं भवति तत्राद्यस्य द्वितीयार्द्धमुदाहरणं द्वितीयस्य द्वि
तीयः श्लोकः नन्वयं काव्यलिंगान्नातिरिच्यते उदाहरणद्वयेऽप्यप्रकृतयोः सामान्यविशेषयोरुक्तिः प्रकृतयोर्विशेषसामान्ययोः कथमुपकारो
५ वि नातिरेके त्वन्यत्र हि सर्वथैवाप्रकृततान्नत्वप्रकृताभिधानं युज्यते न तावदप्रकृतप्रशंसायामिव प्रकृतव्यंजकतयाप्रकृतयोरपि सामान्यवि
शेषयोः स्वरूपोपात्तत्वात् नाप्यनुमानालंकारवत्प्रस्तुतप्रतीतिजनकतया तद्धेतुहेतुमद्भावयोः पक्षधर्मताद्यभावात् नापि दृष्टान्तालंकारव
स्र दुपमानतया विस्रब्धघातदोषः स्ववधाय खलस्य वीरकोपकरः नवतत्कृप्तभंगध्वनिरिव हरिनिद्रावत्करैः करिण इत्यादिषु सामान्यविशेष
स्योपमानत्वदर्शनेऽपि विशेषे सामान्यस्य क्वचिदपि तदुदर्शनादुपमानतयाप्यसामंजस्यप्रतीतेश्च तस्मात्प्रकृतसमर्थनायैवाप्रकृ
तस्योपयोग इहापि वक्तव्यस्तत्समर्थकार्थहेतुकं काव्यलिंगमेवात्रापि स्यान्नत्वलंकारांतरस्यावकाश इति चेत् अत्रके चित् समर्थनसापेक्ष
स्यार्थस्य समर्थने काव्यलिंगं निरपेक्षस्यापि प्रतीतिवैभवात्समर्थनेऽर्थान्तरन्यासः १॥ ॥

न्यस्याप्युपमानताहृष्टेत्यरुचेराह उपमानतयेति उपमानतयाऽन्वयस्यासामंजस्येनाप्रतीतेरित्यर्थः इहापीत्यपिना काव्यलिंगस्यानुच्चयः प्रतीतिवैभवा
त्प्रतीतिदार्ढ्यरूपप्रयोजनवशात्प्रयोजनस्यापि हेतुत्वविवक्षया पंचमी १॥ ॥ ॥ ॥
तदङ्क

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु.नं. उक्तौ वैलक्षण्यमुदाहरणानि छतया दर्शयति नहीत्यादिना इत्यादिकाव्यलिंगोदाहरणे षिवक्ष्यथेत्याद्यर्थांतरन्यासोदाहरणेषु प्रकृतस्य समर्थनार्थित्वं न त्वस्ती
८० तिसंबंधः शारदाशशांके उपगूढे श्रालिंगिते सति यथा नंतरं शांतास्तद्विरूपाः कदाकाश्रयस्याः सा प्राप्तद्युयोगतवती उक्तविशेषरूपमर्थं सामान्यरूपेणार्थांतरेण समर्थ
यति परिभ्रष्टपयोधराणां कामामंगरीणां सोभाग्यगुणो न नष्टश्रेति पयोधराः कुचा मेघाश्च दिवाकरादिति कुमारसंभवे हिमालयवर्णने योहिमालयः ममत्वं
नहियत्वं नेत्रसमानकांतिसलिल इत्यादिकाव्यलिंगोदाहरणे षिवक्ष्यथोपगूढे शारदाशशांके प्राप्तद्युयोषांतनाद्दिक्कदाकाकासां न सौभा
ग्यगुणोंगनानां नष्टः परिभ्रष्टः परिभ्रष्टपयोधराणां दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवांधकारं क्षुद्रेपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः
शिरसां सतीव इत्याद्यर्थांतरन्यासोदाहरणेषु प्रकृतस्य समर्थनाकांक्षत्वमस्तीति प्रकृतस्य प्रायो वादोपमर्थांतरन्यासेपिहि विशेषस्य सामान्येन
समर्थनानपेक्षत्वेपि सामान्यं विशेषेण समर्थनमपेक्षत एव निर्विशेषं न सामान्यमिति न्यायेन बहूनामप्यसाराणां संयोगः कार्यसाधक इत्यादि
सामान्यस्य तृणैरारभ्यते रज्जुस्तेन नागोपि बध्यते इत्यादि संप्रतिपन्नविशेषावतरणं विना बुद्धौ प्रतिष्ठितत्वासंभवात् नचैतत्सामान्यस्य का
सां न सौभाग्यगुणोंगनानामित्यादि विशेषसमर्थनासामान्यस्यैव लोकसंप्रतिपन्नतया विशेषावतरणेनैव बुद्धौ प्रतिष्ठितत्वं संभवतीति सौकेन
न्यूमनं नापेक्षितमिति वाच्यं सामान्यस्य सर्वत्र लोके संप्रतिपन्नत्वनियमाभावात् नहि यो यो धूमवान् सोग्निमानिति व्याप्तिरूपसामान्यस्य लोकसंप्र
तिपन्नतया यथा महानसमित्यादिविशेषरूपदृष्टांतानुपादानसंभव मा भूदिति वाच्यं सामान्यस्य लोकसंप्रतिपन्नत्वे प्रतिष्ठाव्याप्तिरूपसामान्योपन्यासेपि तद्विशेषरूपदृष्टांतोपन्यासेपि दृष्टांतसं
संभवति नचैवं सामान्येन विशेषसमर्थनस्थलेपि क्वचित्तस्य सामान्यस्य लोकप्रसिद्धत्वाभावे तस्य बुद्ध्यारोहाय पुनर्विशेषांतरन्यासनप्रसंग इ नेर २
तिवाच्यं इष्टापत्तेः अत्रैव विषयेतिकस्वरान्तेकारस्यानुपदमेव दर्शयिष्यमाणत्वात् १॥ ॥

मदीयतानुद्विः शिरोमस्तकं शिरश्च समर्थनार्थित्वं समर्थनापेक्षत्वं अयं अर्थांतरन्यासः समर्थनानपेक्षत्वरूपः सामान्यस्यान्यस्य बुद्धौ प्रतिष्ठितत्वासंभवादित्य राम०
न्येनान्वयः संप्रतिपन्नेति वक्तृश्रोतृसंमतेत्यर्थः विशेषावतरणं विशेषागमं तत्र बहूनामित्यादौ सामान्ये इति विशेषावतरणं विनैव बुद्धौ प्रतिष्ठितत्वं सं ८०
भवतीत्यग्रिमेनान्वितं तन्न्यासनं तृणैरित्यादिविशेषन्यासनं १॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न चैवमप्यर्थान्तरन्यासे क्वचिदेव समर्थ्यनापेक्षा काव्यलिंगे तु सर्वत्रेत्येतत्कृतभेद इत्याशंक्याह किंचेति कविकुलकृतत्वेन कविसम्प्रदायप्रसिद्धत्वेन तदा
स्पदास्ये-नलमुखदास्ये पर्वणिप्ररणिमायां भवः पार्वणः शार्वरीश्वरश्चन्द्रः न विशेषिरोत्पादे-स्त्रियः कृता इत्यनेनान्वयः अपि तु स्त्रीभिरेव-यतः पतीकारपरुषि

८३

किंच काव्यलिंगेऽपि न सर्वत्र समर्थनसापेक्षत्वनियमः चिकुरप्रकरा जयन्तीत्येत्र तदभावात् उपमानवस्तुषु वर्णनीयसाम्याभा
वेन निंदायाः कविकुलकृत्वात्तेनात्र समर्थनापेक्षत्वविरहात् न हि तदास्यदास्येऽपि गतोऽधिकारिता न शारदः पार्वणः शर्वरीश्वर इत्यादे
श्च समर्थनं दृश्यते न विषेण न शस्त्रेण नाग्निना न च मृत्युना अप्रतीकारपारुष्याः स्त्रीभिरेव स्त्रियः कृता इत्यादिकाव्यलिंगविष
येषु समर्थनापेक्षाविरहेऽप्यप्रतीकारपारुष्या इत्यादिना समर्थनदर्शनाच्च न हि तत्र स्त्रीणां विषादिनिर्मितत्वाभावप्रतिपादनं समर्थन
सापेक्षं प्रसिद्धत्वात्तस्मादुभयतो व्यभिचारात्समर्थनापेक्षसमर्थ्ये काव्यलिंगं तन्निरपेक्षसमर्थनेऽर्थान्तरन्यास इति न विभागः किंतु
समर्थ्यसमर्थकयोः सामान्यविशेषसंबन्धेऽर्थान्तरन्यासस्तदितरसंबन्धे काव्यलिंगमित्येव व्यवस्थावधारणीया प्रपंचश्चित्रमीमांसा
यां द्रष्टव्यः ३॥॥

तं पारुष्यं क्रौर्यं यासां तथाभूताः उभयतः अन्वयव्यतिरेकाभ्यां समर्थनापेक्षायामपि तदास्यदास्येऽपीत्यादौ तदभावात् न विषेणेत्यादावपेक्षाविरहेऽपि समर्थ
नसत्वात् ३॥ १। ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰ नं॰ ८१

अप्रकृतेनेति। आद्येमहात्मनांसर्वस्तुकरत्वेनाप्रकृतेनसामान्येनहनूमदद्धितरणस्यप्रकृतविशेषस्यसमर्थनं द्वितीयेपुष्पमालासूत्रवृत्तांतेनाप्रकृतेनवि
शेषरूपेणाप्रकृतस्यगुणावतंसगप्रयुक्तप्रकृत्त्वस्यसामान्यरूपस्यसमर्थनमित्यर्थः यद्वातत्रेति हेपार्वतिस्वरूपंआकृतिसौंदर्यंपापवृत्तयेदुष्टाचरणायनभ
वतियत्राकृतिस्तत्रगुणावसंतीतिन्यायादिति यदुच्यतेतद्वचनमव्यभिचारियथार्थं तथाहि उदारंरमणीयंदर्शनंयस्यास्तथाभूतेपार्वतितवशीलंआचरणंत
पस्विनामप्युपदेशरूपतांप्राप्तमितिप्रकृतेनविशेषेणाप्रकृतस्यसामान्यस्यसमर्थनं दानमिति दानंवितरणं मदजलंच। जलेरुदकैर्जडैश्च लडयोरभेदात्

एवमप्रकृतेनप्रकृतसमर्थनमुदाहृतं प्रकृतेनाप्रकृतसमर्थनंयथा यदुच्यतेपार्वतिपापवृत्तयेनरूपमित्यव्यभिचारितद्वचः त
थाहितेशीलमुदारदर्शनेतपस्विनामप्युपदेशतांगतं यथा दानंददत्यपिजलैःसहसाधिरूढेको विद्यमानगतिराश्रितमु
क्तहेत। यद्दंतिनःकरकटाहतटान्निमंक्षोर्मंक्षूदपातिपरितःपटलैरलीनां ४॥॥

अधिरूढेआक्रांतेसतिविद्यमानगतिः सगतिकः बुद्धिमांश्चकः आश्रितंस्यात्उत्सहेतशक्नुयात् यस्मात्निमंक्षोर्मज्जनंकर्तुमिच्छोर्दंतिनोगजस्यकरटोग
डएवकटाहस्तस्यतटात्ग्रादलीनांपटलैःसमूहैःपरितोमंक्षुशीघ्रंउदपातिउत्पतितमित्यन्वयः अत्रापिपूर्वार्द्धोक्तमप्रकृतसामान्यमुत्तरार्द्धोक्तेनप्रकृतेनवि
शेषेणसमर्थितं॥ ॥इत्यर्थांतरन्यासालंकारः ४॥ ॥ ॥ ॥

राम॰ ८१

८।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यस्मिन्निति काव्ये इत्यर्थात् निरुध्यंत इति शेषः समर्थ्यसमर्थकभावापन्नत्वं तेन लक्षणे निवेशनीयं तद्विना चमत्काराभावेन चमत्कारित्वविशेषणेनाव्य-
यप्रकृतत्वेनैवातातिप्रसंगात् एवमेवार्थान्तरन्यासलक्षणेपि बोध्यं स नेति स प्रकृतो राजा न जिग्ये न जितो ऽर्थात् वैरिभिरिति विशेषः प्रकृतः तत्समर्थनं महा-
न्तो हि दुर्धर्षा अनाक्रमणीया इति सामान्येन तस्यापि सागरा इवेति विशेषेण समर्थ्यते इति ज्ञेयं प्रसिद्धेरनुपस्थानात् अपरितोषो बोध्यः यथाकथंचिदिति महता मनो-

यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः स न जिग्ये महान्तो हि दुर्धर्षाः सागरा इव यत्र कस्यचिद्विशेषस्य समर्थनार्थं
सामान्यं वि- न्यस्य तस्य प्रसिद्धावप्यपरितुष्यता कविना तत्समर्थनाय पुनर्विशेषान्तरमुपमानीकृत्यार्थान्तरं न्यस्यते तं
त्र विकस्वरालंकारः उत्तरार्द्धं यथाकथंचिदुदाहरणं इदं त्वत्र व्यक्तमुदाहरणं अनन्तरत्नप्रभवस्य यस्य हिमं न सौभा-
ग्यविलोपि जातं एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः इदमुपमारीत्या विशेषान्तरन्यसने उदाहरणं

क्रमणीयत्वस्यातिप्रसिद्धत्वेन तत्समर्थनापेक्षाभावाच्चेदालोकगतमेतन्न समंजसमिति भावः इदं वक्ष्यमाणं व्यक्तमिति गुणसमुदाये एकस्य दोषस्या-
नाकलनं मनतिप्रसिद्धतया समर्थनापेक्षमिंदोरित्यादि विशेषेण समर्थ्यत इत्यतः स्फुटमित्यर्थः १॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

क्राकं २

न

कु॰नं॰ कर्णेति हे काक कर्णयोरुंतुदं पीडाजनकं रणितं शब्दितं अंतरेणाविना त्वयं मकरंदः पुष्परसस्तत्शालिनं माकंदं माप्रहृष्टं गाहस्व आप्तया इहाप्रतरो
८१ तावद्वयं कोकिलं मन्महे जानीमहे यतः स्थलवैभवेन स्थानमहात्म्येन कतिचिद्वस्तूनि धन्यानि भवंतीति सामान्येन उक्तविशेषसमर्थनं अत्रापि तदाकांक्षा
या विशेषरूपमर्थांतरन्यस्यति नेपालभूमिपालस्य भालेपतिते पंके कस्तूरिकां कोन शंकेतापित्तसर्वइति मालिन्यमिति मधुलिट् भ्रमरः कलंकश्चंद्रलोऽस्त्र

रु पाल २ को १

अर्थांतरन्यसनविषये यथा कर्णारुंतुदमंतरेण रणितं गाहस्व काक स्वयं माकंदं मकरंदशालिनमिह त्वां मन्महे कोकिलं धन्या
नि स्थलवैभवेन कतिचिद्वस्तूनि कस्तूरिकां नेपालक्षितिपालभालपतितेपंकेन शंकेत कः ॥ ४१ ॥ यथा वा मालिन्यमब्जशशिनो
र्मधुलिट्कलंकौ धत्तो मुखे तदुरहक्तिलकांजनाभ्यां दोषावितः क्वचन मेलकतो गुणत्वं वक्तुर्गुणौ हि वचसि भ्रमविप्रलंभौ ॥ १ ॥

त्र शशिनोर्मालिन्यं धत्तः कुतः तः गवधुरेतदुरकुच तिलकांजनं च तयोरंशांशोभावधत्तइत्यनुषज्यते अंजनाभेइति पाठे द्वितीया द्विवचनं उक्तमर्थं सामान्येन
समर्थयति दोषावपि क्वचित्मेलकतो मिथो मिलनात् गुणत्वं इतः प्राप्नुत इति कथमेतत्तत्राह हि यतः वक्तुर्वचसि भ्रमविप्रलंभौ भ्रांतिवंचनारूपौ गुणौ
भवतः घटवति घटाभाववैशिष्ट्यपरत्वतारूपाऽयथारोऽस्तीति प्रयुक्तेः तोऽप्रमाजनकत्वात्तयोर्गुणत्वमिति भावः ॥ ॥ इति विकस्वरालंकारः ॥ १ ॥ ॥ राम॰
८१

प्रौढोक्तिरिति उत्कर्षस्याहेतावुत्कर्षहेतुत्वकल्पनं प्रौढोक्तिः कलिंदजा यमुना स्तोमः समूहः मेचकाः श्यामाः रोहणो उद्भवे कल्पेति स्वर्णराजा कल्पवृक्षा
दीनां क्रमेणारजोभरादिभिः पंचभिर्भूतैरचितत्वमन्वयः धनदः कुबेरः शंखो निधिविशेषः रजोभरः परागसमूहः पयो दुग्धं स्वासः प्रसिद्धः श्वांतरांबरं शंखाभं

प्रौढोक्तिरुत्कर्षाहेतौ तद्धेतुत्वप्रकल्पनं कचाः कलिंदजातीरतमालस्तोममेचकाः कार्यातिशयाहेतौ तद्धेतुत्वपरिकल्पनं
प्रौढोक्तिर्यथा इह कुरुगतनैल्यातिशयाहेतौ यमुनातटरोहणोत्कर्षहेतुपरिकल्पनं यथा वा कल्पतरुकामदोग्धी चिंतामणिधनदशं
खानां रचितो रजोभरपयस्तेजः श्वासांतरांबरैरेषः अत्र कल्पवृक्षादेरैकैकातिशयातिशयप्रदर्शनीयराजविततरणाहेतौ कल्प
वृक्षपरागादिरूपपंचनिर्मितत्वेनहेतुपरिकल्पनं प्रौढोक्तिः संभावनं यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये यदि शेषो भवेद्व
क्ता कथिताः स्युर्गुणास्तव यदि वा कस्तूरिकामृगाणामंडाद्गंधगुणमखिलमादाय यदि पुनरहं विधिः स्यां खलजि
ह्वायां निवेशयिष्यामि यद्यर्थोक्तौ कल्पनमतिशयोक्तिभेद इति काव्यप्रकाशिकाकारः ३॥॥

ॐ

तस्मा काशं अतिशायीत्यग्रिमवितरणोनान्वितं अहेतौ पंचनिर्मितत्वे इति सामानाधिकरण्येनान्वयः॥॥ इति प्रौढोक्तिः॥॥ संभावनमिति ऊहस्तर्कः
कस्तूरिकेति अहं यदि सृष्टिकर्ता स्यां तदा कस्तूरिकामृगाणामंडादखिलं गंधरूपं गुणमादाय खलजिह्वायां निवेशयिष्यामीत्यन्वयः॥॥ इति संभावना

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ ८३

किंचिदिति कस्यचिदर्थस्य मिथ्यात्वसिद्ध्यर्थं मिथ्याभूतार्थांतरकल्पनं मिथ्याध्यवसितिरलंकारः वेश्या मित्युदाहरणं खस्रजं गगनमालां अत्र ख
पुष्पमालाधारणमिव वेश्यावशीकरणमिति निदर्शनापि बोध्या अस्येति परार्द्धपरया परार्द्धसंख्या यदि कांत पल्लं कृता उपल क्रिताः प्रज्ञा च
कुष्ठांग्रेर्धेनाविस्मरणम् श्रुता वधिरभ्याम्भ इति कर्मधारयः कल्पयता कुर्वता प्रकारेण सम्प्रहेण कूर्मरमणी कच्छपी तेषां सितीर मिथ्याध्यवसितेस्त
स्य भेदश्चान्वयः कल्पनाविच्छित्तिविशेषाणं कल्पनाप्रयुक्तविच्छित्तिविशेषेण कल्पनात्मनेति पाठे कल्पनास्वरूपेणेत्यर्थः उपमेयसंकरे पुष्पाधेर

किंचिन्मिथ्यात्वसिध्यर्थं मिथ्यार्थांतरकल्पनं मिथ्याध्यवसितिर्वेश्यां वशा येत् खस्रजं वहन्। अत्र वेश्यावशीकरणस्यात्यंतासं
भावितत्वसिद्धये गगनकुसुममालिकाया धारणरूपार्थांतरकल्पनं मिथ्याध्यवसितिः यथा वा अस्य क्षोणीपतेः परार्द्धपरया
लक्षीकृताः संख्यया प्रज्ञाचक्षुरवेक्ष्यमाणा वधिरश्रव्याः किलाकीर्तयः गीयंते स्वरमष्टमं कल्पयता जातेन वंध्योदरान्मूकानां
मर प्रकरेण कूर्मरमणीदुग्धोदधेरोधसि अत्राधोदाहरणं निदर्शनागर्भं द्वितीयं त्वत्युक्तं असंबंधरूपातिशयोक्तितो मिथ्याध्यवसितेः
किंचिन्मिथ्यासिध्यर्थं मिथ्यार्थांतरकल्पनात्मनाविच्छित्तिविशेषेण भेदः ५॥ ॥

संकरान् विच्छित्तिविशेषेणेति वतस्यैव विशेषणं विच्छित्तेर्विशेषो यस्मादिति विच्छित्तिविशेषपतिव्यावर्त्यं तीति वा युक्तं तेन एतेन पौढोक्तौ वगतार्थता माच
क्षणाभिरस्मा विदितव्याः न च मिथ्याध्यवसितेरलंकारांतरत्वे हरिश्चंद्रेण संजग्माः प्रतीका धर्मस्तनुना खेलंति निगमोत्संगे मातर्गंगे गुणास्तवे त्यादौ हृ
रिश्चंद्रादिसंबंधाद्गुणानां सत्यपरात्पर्वतीतिः सत्याध्यवसितिरपि तया स्यादिति वाच्यं सत्यता प्रतीत्यर्थं कस्याप्यर्थस्य कविप्रतिभाकल्पितत्वाभावेन शोकमा
त्रेण लंकारता या असंभवात् कविप्रतिभामात्रकल्पिता अर्थाः का वा अलंकारपदास्पदमिति विषमालंकारश्चकारणेत्वयैवाभिधानादित्यलंवविस्तरेण॥॥३ रस॰ ८३

॥ र॰ कुवलयानन्दटीका

८३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रस्तुत इति ललितमिति जस्य निर्देशः निर्गतश्चेत्युदाहरणं दाक्षिण्येत्यादिक्तप्रत्ययांतचतुष्टयं नायकविशेषणं दाक्षिण्यं अनुरोधशीलत्वं लज्जा वारेति स
खीप्रेषणात्मकनायिकाव्यापारसरूपेत्यर्थः साम्यं चात्र तेरर्थकं अस्मात् अलंकारे प्रस्तुतं भाववमाशंक्य निराकरोति नेयमित्यादिना प्रस्तुताप्रस्तुतेति तथा च प्र

प्रस्तुते वर्ण्ये वाक्यार्थप्रतिबिंबस्य वर्णनं ललितं निर्गते नीरे सेतुरेषा चिकीर्षति प्रस्तुते धर्मिणि यो वर्णनीयो वाक्यार्थस्तमवर्णयित्वा तन्नैव तत्सरूपस्य कस्यचिदप्रस्तुतवाक्यार्थस्य वर्णनं ललितं यथा कथं विदग्धोक्तिरागसमागततत्कालोपेक्षितप्रतिनिरुद्धनायिकांतरास क्तनायकानयनार्थं सखीं प्रेषयितुकामां नायिकामुद्दिश्य सखीवचनेन तद्व्यापारप्रतिबिंबभूतगतजलसेतुबंधवर्णनं नेयमप्रस्तुत प्रशंसा प्रस्तुतधर्मिकत्वात् नापि समासोक्तिः प्रस्तुतवृत्तांते वर्ण्यमाने विशेषणसाधारण्येन सारूप्येण वा अप्रस्तुतवृत्तांत स्फूर्त्यभावात् अप्रस्तुतवृत्तांतादेव सरूपादिह प्रस्तुतवृत्तांतस्य गम्यमानत्वात् नापि निदर्शना प्रस्तुताप्रस्तुतवृत्तांतयोः शाब्दोपात्त योरैक्यसमारोपस्य तस्याः स्वरूपत्वात् यदि विषयविषयिणोः शाब्दोपात्तयोः प्रवर्तमान एवालंकारो विषयिमात्रोपादानेपि स्यात् तदा रू पकमेव भेदेप्यभेदरूपायाश्चातिशयोक्तेरपि विषयमाक्रमेत ननु तर्ह्यप्रस्तुतनायकादिनिगरणेन तत्र शाब्दोपात्ताप्रस्तुतनीराद्यभेदाध्य वसाय इति भेदेप्यभेदरूपातिशयोक्तिरस्तु एवं तर्हि सारूप्यनिबंधनाप्रस्तुतप्रशंसाविषयेपि सैवातिशयोक्तिः स्यात् ५ ॥ ॥

कृते प्रस्तुतवृत्तांतस्ये . वोपादानान्निदर्शनानवकाश इति भावः ननूभयोः शाब्दोपात्तत्वइवाप्रस्तुतमात्रस्य तत्त्वेपि निदर्शनास्त्वित्याशंक्याह यदीति प्रतिबंधातावत्प रिहरति तर्हि सारूप्येति एकः कश्चिदाशंकते उभयोरपि शाक्रान्तत्वात् चत इत्यादावित्यर्थः ५ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अप्रस्तुतेति अप्रस्तुतस्य शशांकादेस्त्वद्वर्णनीयत्वादतिशयोक्तिस्थले च वापी कापी त्यादौ वापीत्वादिना प्रस्तुततन्माध्यादेर्वर्णनत्वान्नातिशयोक्तिस्तत्रापादयितुं
शक्येति भावः असिद्धोयं हेतुरित्याह तत्रेति प्रसिद्धेति वापीकापीत्यादिसर्वसंमतेत्यर्थः तद्गतेति प्रस्तुतगतेत्यर्थः अप्रस्तुतप्रशंसायां क्वचित्प्रस्तुताप्रस्तुत
योरभेदाध्यवसानमप्यप्रस्तुतवाक्यार्थप्रतीतिकाले दृश्यते ललिते तु न क्वापीति स्तुतरामतिशयोक्तितो भेद इत्याह सोऽपूर्वैरित्यादिना रसनाविपर्ययः अग्रिमापा

अप्रस्तुतधर्मिकत्वान्न भवतीति चेत् तत्राप्रस्तुतधर्मिवाचकपदस्यापि प्रसिद्धातिशयोक्त्युदाहरणेष्विव प्रस्तुतधर्मिलक्षकत्वसंभवात्।
ननु प्रस्तुतप्रशंसायां सरूपादप्रस्तुतवाक्यार्थात्प्रस्तुतवाक्यार्थो गम्यते न त्वतिशयोक्ताविव विषयिवाचकैस्तत्तत्पदैर्विषया लक्ष्यन्ते इ
ति भेद इति चेत् तर्हि इहापि प्रस्तुतगतादप्रस्तुतवृत्तान्तरूपाद्वाक्यार्थात्तद्गतप्रस्तुतवृत्तान्तरूपो वाक्यार्थो गम्यत इत्यतिशयोक्तितो भेदो
स्ति वस्तुतस्तु सोऽपूर्वै रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं दृष्टिः सामदा विस्मृतस्वपरादिक्कं भूयसोऽङ्केन वा पूर्वं निश्चितवाना तिभ्र
मरहे यद्वाररागोऽघाप्य सार्वतः स्तन्कशो निषेव्यत इति भ्रातः कस्य धर्मः इत्याद्यप्रस्तुतप्रशंसोदाहरणे प्रथमप्रतीतादप्रस्तुतवाक्यार्थात्प्र
स्तुतवाक्यार्थो गम्यत इत्येतन्नघटते ६ ॥ ॥

त्वगिरिणां जिह्वापरिहृतिः पूर्वविपरीताभिधानं च कर्णचापलं प्रसिद्धं पिशुनप्रतार्यत्वं च मदः प्रसिद्धो गर्वश्च तेन विस्मृता स्वपरयोर्दिक्क्रमार्गः आम्नाता मु राम०
विभागश्च यस्याः दृष्टिः वारणो गजो वारकश्च अन्यः संधः धनरहितश्च करः शुण्डाः हस्तश्च ग्रहः आग्रहः ६ ॥ ॥ ८४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अप्रस्तुतप्रशंसायाः समासोक्तेः अधिकरूपेण अतिशयोक्तिप्रसंगाच्च ५२

ना॰

कुतो न घटते तत्राह अप्रस्तुतेति एतच्च भ्रमरासेव्यत्वइत्यस्य विशेषणं भ्रमरनिरासकरणस्येति च कर्णचापलमात्रस्येत्यस्य॰ क्रोडीकारः स्वार्थेन सम्बन्धे
धवसाधय: अप्रस्तुतसंबोधनादीति आदिना सारूप्यनिबंधनप्रस्तुतवाक्यार्थावगतिपरिग्रहः अत्रापि ललितालंकारेपि॰ वर्णनारूपस्येति चमत्का
रितारूपाया विच्छित्तेस्तद्वच्छेदकवर्णनारूपत्वमित्यभिप्रायः कस्यचित् नेत्रद्वंद्वादेः स्ववाचकेन नेत्रादिपदेन अनिर्दिष्टत्वात् अप्रतिपादितत्वात् अति

अप्रस्तुतेनारणस्य भ्रमरासेव्यत्वे कर्णचापलमात्रस्य भ्रमरनिरासकरणस्य हेतुत्वसंभवेपि रसनाविपर्ययांतः अन्यकरलयोर्हे
तुत्वासंभवेन मद्भस्य प्रस्तुतत्त्तसेव्यत्व एव हेतुत्वेन रसनाविपर्ययादीनां तन्नहेतुत्वा त्रयार्थवारणापदस्य दुःप्रभुरूपविषयक्रोडी
कारेणैव प्रवृत्तेर्वक्तव्यत्वादेवं तत्रापि प्रयत्नप्रस्तुतसंबोध दिविच्छित्तिविशेषात्तत्राप्रस्तुतप्रशंसायामतिशयोक्तितो भेदो घटते तदा
वापी कापि स्फुरति गगनेतत्परं सूक्ष्मा पद्येत्यादिषु प्रस्तुतस्य कस्यचिद्धर्मिणः स्ववाचकेनानिर्दिष्टत्वादतिशयोक्तेरेव एतेन गतज
लसेतुबंधनवर्णनादिष्वसंबंधे संबंधवर्णनरूपातिशयोक्तिरस्ती तेनकापि निरस्ता तथा सति कस्तु भेदः कथया मीत्यादावव
पितत्वप्रसंगात्सारूप्यानिबंधनप्रस्तुतवाक्यार्थावगति रूपविच्छित्तिविशेषेणालंकारांतरकल्पनं विहायापितत्वात्तस्मात्सर्वालंका
रविलक्षणमिदं ललितं ७॥॥

शयोक्तिरस्तीति अतिशयोक्तिरेवास्तीत्यर्थः तत्प्रसंगात् संबोध्यत्वोच्चारयितृत्वयोरसंबंधेपि संबंधेपि संबंधवर्णनादतिशयोक्तिमात्रप्रसंगात् अलंकारां
तरं कस्त्वमित्यादावप्रस्तुतप्रशंसाऽप्रस्तुतेतु ललितमिति ७॥ ॥ ॥
॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ तत्वातिविंबेति प्रकृतार्थप्रतिबिंबरूपस्याप्रकृतार्थस्येत्यर्थः आदौ पूर्वार्द्धे विषमेति स्वमतिसूर्यवंश्योरत्यंतानतुरूपत्वरूपेत्यर्थः तात्पर्यस्य तादृशम
८५ तिकरणाकसूर्यवंशवर्णने छाभिप्रायस्य अन्तर्यामीति तल्लेपातिदमयंत्याउक्तिः हे नल अधुनतया कतमोदेशः वसंतमुक्तस्य वनस्य दशा मनापि प्रापितः
त्वयि प्राप्नसंकेततया कृतार्थाभिज्ञानामासि अनेनप्रकारेण तज्जनेननयस्या श्रवणाहीश्रयितव्ये इति॰ अत्र तादृशवनदशारूपस्याप्रकृतार्थस्य प्रकृ

यथावा क्वसूर्यप्रभवोवंशः क्वचाल्पविषयामतिः तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरं अत्रापि निदर्शना भ्रांतिर्न कार्याऽईदृ
शणमत्पासूर्यवंशवर्णायित्रु मिछुरहमितिप्रकृतार्था उपन्यासान्तत्वात्ति विंबाप्रकृतार्थवर्णनादौ विषमालंकारविन्यासेन च
केवलं तात्पर्यस्य गम्यमानत्वात् यथावा अनायिदेशः कतमस्त्वयाद्य वसंतमुक्तस्य दशां वनस्य त्वदाप्तसंकेततया कृतार्थी आ
वापि नानेन जनेन संज्ञा अत्र कतमो देशस्त्वया परित्यक्त इति प्रकृतार्थमनुपन्यस्य वसंतमुक्तवनस्य दशामनायीति तत्त्वातिविंब
भूतार्थमात्रोपन्यासात् ललितालंकारः ८।।।।

ते देशे कथमात्सक्तवृत्तांतस्योक्तरूपस्य प्रतीतिः नचात्रवारणोंद्रलीलामितिवत्पदार्थनिदर्शना युक्तेतिवाच्यं तत्र पूर्वार्द्धे नप्रकृतवृत्तांतोपादानेन सादृश्य
पर्यवसानरूपनिदर्शनासत्वेपयत्र तदनुपादानेन तद्धांपतापयुक्तविच्छित्तिविशेषवत्वेन ललितालंकारस्यैवोचितत्वात् एतेन दशापदलक्षितनिःश्रीकत्वरूप राम॰
कार्यद्वारेण कारणस्य राजकर्तृकत्यागकर्मत्वस्याभिधानात्पर्यायोक्तमित्यपि निरस्तं उपधेयसंकरेप्युपाधेरसंकराच्चेति संक्षेपः।। ।।इतिललिता ८।।। ८५

८२

८५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तामेवेति दूतिकामेवेत्यर्थः निसृष्टा प्रेषिता ससंकल्पां मनोरथसहितां मेघैरिति मेदुरं तुंदिलं नक्तं रात्रिरस्तीति शेषः नंदनिदेशतः नंदस्याज्ञावशात् प्रत्यध्वकुंजद्रुमं प्रत्यध्वं संवेष्टि कुंजद्रुमं द्रुमं प्रति ग्रंथकारेण गीतगोविंदकृता चातक इति यत्तु चातकस्य त्रिचतुरकणमात्रार्थित्वात् जलदकर्तृकेण भ्रमणाविश्वपूरणेन

उत्कंठितार्थसंसिद्धिर्विना यत्नं प्रहर्षणं तामेव ध्यायते तस्मै निसृष्टा सैव दूतिका उत्कंठा इच्छाविशेषः सर्वेन्द्रियस्तु रता स्वादो यत्रास्तीत्यभिमत्यते तस्यापि इच्छां ससंकल्पामुत्कंठां कवयो विदुरिति तल्लक्षणं तद्विषयस्य तदुपायसंपादनं यत्नं विना सिद्धिः प्रहर्षणं उदाहरणं स्फुटं यथा वामे घैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय इत्थं नंदनिदेशतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुनाकूले रहः केलयः अत्र राधामाधवयोः परस्परमुत्कंठितत्वं प्रसिद्धतरं प्रागेव ग्रंथकारेणाभिव्यक्तमित्यत्रोदाहरणे लक्षणानुगतिः ९९ वांछितादधिकार्थस्य संसिद्धिश्च प्रहर्षणं दीपमुद्योजयेद्यावत्तावदभ्युदितो रविः स्पष्टं। यथा चातकस्त्रिचतुरान् पयःकणान् याचते जलधरं पिपासया सोपि पूरयति विश्वमंभसा हंत हंत महतामुदारता ९॥ ॥ ॥

हर्षाधिक्याभावादयुक्तमुदाहरणमिति तन्न उक्तहेत्वसिद्धेः नहि कुतृडुपशमाय तत्पर्याप्तमात्रार्थिनस्तदधिकान्नलाभे हर्षाधिक्यं नास्तीति वक्तुं शक्यं तदानीं तदुपयोगाभावेपि स्वस्यैव कालांतरे तदुपयोगसत्वात् न च चातकस्य जलसंग्रहाद्युपयोगाद्वैषम्यं शंकनीयं चातकदृष्टांतस्याशक्ततया तात्पर्यविषयत्वेन दातृतया चकदृष्टांते काव्यस्य पर्यवसानादिति ९॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु॰ न॰ ८६ तृतीयं प्रभेदमाह यत्नादिति। प्रहर्षणमित्यनुवर्तते। निध्यंजनेति निधिदर्शनसाधनं यदंजनं तत्साधनौषधीमूलमित्यर्थः साधितो लब्धः। उच्छ्रितेति अ-
धःस्थितं दृक्पथादेशेऽस्थितं अवस्थितमिति पाठे समीपाशोकयष्टाववस्थितमित्यर्थः। श्रिता आश्रिता विटपाः शाखा येनेति पुष्पोच्चयविशेषणं।
अदर्शनात् आहितवती यष्टिः स्कंधः तेन पादाघातेन पुनरप्यमूलं तु पुष्पिता भूदर्थादशोकयष्टिः अत्र च तदसाध्याकस्मात्प्राप्तेरिति प्रकारत्रयसाधारणं कृ॰ ला॰ ३

यत्नादुपायसिद्ध्यर्थात्साक्षाल्लाभः फलस्य च निध्यंजनौषधीमूलं खनता साधितो निधिः ६० फलोपायसिद्ध्यर्थाद्यत्नान्मध्ये
उपायसिद्धिमनपेक्ष्य साक्षात्फलस्यैव लाभोऽपि प्रहर्षणं यथा निध्यंजनसिद्ध्यर्थं मूलिकां खनतस्तत्रैव निधेर्लाभः यथा वा
उच्चित्य प्रथममवस्थितं मृगाक्षी पुष्पौघं श्रितविटपं गृहीतकामा आरोढुं पदमदधाद्दशोकयष्टावामूलं पुनरपि तेन पुष्पिता न॰ १
भूत् अत्र पुष्पग्रहणोपायभूतारोहसिद्ध्यर्थात्पदनिधानात्तत्रैव पुष्पग्रहणलाभः इष्यमाणविरुद्धार्थसंप्राप्तिस्तु विषाद-
नं दीपमुद्योजयेद्यावन्निर्वाणस्तावदेव सः यथा रात्रिर्गमिष्यति भविष्यति सुप्रभातं भास्वानुदेष्यति हसिष्यति पंकजश्रीः॥
इत्थं विचिंतयति कोशगते द्विरेफे हा हंत हंत नलिनीं गज उज्जहार॥ १० ॥ ॥

सामान्यलक्षणं बोध्यं॥ ॥इति प्रहर्षणं इष्यमाणेति इष्यमाणविरुद्धो योऽर्थस्तत्संप्राप्तिर्विषादनमलंकारः उद्योजयेत् उद्दीप्तं कुर्यात् उद्योजयेद्याव
दित्यनेन तदिच्छाभावं नवतत्करणमितिविषमाद्भेदः एवमग्रिमोदाहरणेऽपीच्छाभावेनेष्टोत्पत्त्यनुकूलाचरणमिति॥ ॥इति विषादनं॥ १० ॥ ग्रा॰ सं॰ ८६

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकस्येति एकस्य गुणदोषाभ्यामन्यस्यैतौ गुणदोषौ यदि भवतस्तदोल्लासालंकारः अपीति अपिः संभावनायां साध्वीपतिव्रता स्नात्वा मां पावये
दितिजाह्नवीइच्छतीत्यन्वयः नवधाटीषु युद्धयात्रासु कुचयोः स्पष्टं काठिन्यं पादपद्मयोर्वाञ्छत्यो रियोषितः विश्वधातारं निंदतीत्यन्वयः स्पष्टमिति पाठे

एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि अपि मां पावयेत्साध्वी स्नात्वेतीच्छति जाह्नवी काठिन्यं कुचयोः स्रष्टुं वाञ्छत्यः पादप
द्मयोः निंदन्ति विश्वधातारं त्वद्धाटीषु रियोषितः तदभाग्यं धनस्यैव यन्नाश्रयति सज्जनं लाभोऽयमेव भूपाल सेवकानां न चेद्व
धः कस्यचिद्गुणेनान्यस्य गुणः दोषेण दोषो गुणेन दोषो दोषेण गुणो वा यद्वर्ण्यते स उल्लासः द्वितीयाद्भमाघस्योदाहरणं तत्र
पतिव्रतामहिमगुणेन तत्स्नानतो गंगायाः पावनत्वगुणो वर्णितः द्वितीयश्लोके द्वितीयोदाहरणं अत्र राज्ञो धाटीषु पलायमानाना
मभियोषितां पदयोर्कण्टकपरिपंथिमार्गेव दोषेण तयोः काठिन्यमस्त्वित्याव्यर्थं कुचयोः स्पष्टवतो धातुर्निंदितत्वदोषो वर्णितः तृ
तीयश्लोके तृतीयचतुर्थयोरुदाहरणं तत्र सज्जनमहिमगुणेन धनस्य तदनाश्रयणं दोषत्वेन राज्ञः क्रौर्यदोषेण तत्सेवकानामव
धं विना निर्गमनं गुणत्वेन वर्णितं अनेनैव क्रमेणोदाहरणांतराणि यथा मद्दृशं रथसंक्षोभादंसेनांसो निपीडितः एकः कृ
ती मदंगे शेषमंगं भुवो भरः अत्र नायिकासौंदर्यगुणेन तदंसनिपीडितस्यांसस्य कृतित्वगुणो वर्णितः ॥ ॥॥

कुचयोः काठिन्यं पादयोः स्पष्टमिच्छंत्य इत्यन्वयः लाभोयमिति भूपालसेवकानामयमेव लाभो यदि वधो न भवतीत्यन्वयः यदयमिति रथस्य संक्षोभा
च्चलनाद्धृदयमंसोंसेनार्थाद्दयितायाः निपीडितः संपृष्टः मम अंगे शुभमध्ये स एवैकः कृती कुशलः अवशिष्टमंगं भूमेर्भारमात्रमित्यर्थः ॥ ॥ ॥ ५४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुर्वैशैर्दुष्टवेणुभिः दुष्कुलैश्चेत्यादिः श्लेषोबोध्यः तननाशरूपः वनसंबंधीनाशरूपः वनस्येति दुष्कृतरः पाठः तत्रापि श्लेषो भ्रमरनिरासः गजस्यदोषत्वेनेति संबंधः आघ्रातमिति मुकुः परिलीढं आस्वादितं नीरसेनमनसा करणभूतेन वानरेण कर्त्रा तत्रतस्मिन्नसति विचारव्यसनिना विचारणात्परेण अशमनापाषाणेन

न२

यथा लोकानंदनचंदनदुमसखेनास्मिन्वने स्थीयतां दुर्वंशैः कठिनैरसारहृदयैराक्रांतमेतद्वनं तेष्वन्योन्यनिघर्षजातदहनज्वालावलीसंकुलानस्वान्येवकुलानि केवलमिदंसर्वं दहेयुर्वनं ६८ अत्रवेणूनांपरस्परसंघर्षसंजातदहनसंकुलत्वेदोषेण वननाशरूपो दोषो वर्णितः दानार्थिनोमधुकरायदिकर्णतालेर्दूरीकृताः करिवरेणमदांधबुद्ध्या तस्यैव गंडयुगमंडनहानिरेषा भृंगाः पुनर्विकचपद्मवने चरंति अत्रभ्रमराणामलंकरणत्वगुणोन्याजस्यतत्त्यागेऽपि दोषत्वेनवर्णितः आघ्रातं परिचुंबितं परिमुक्तं लीढंपुनश्चर्वितं त्यक्तंचाभुवि नीरसेननमनसा तत्रममृथांसाकथाः हे सहृत्नतवैतदेव कुशलंयदानरेणादरीकृतः सारविचारणव्यसनिना चूर्णीकृतं नाश्मना अत्रवानरस्य चापलदोषेण रत्नस्य चूर्णनाभावो गुणत्वेन वर्णितः अत्रप्रथमचतुर्थयोरुल्लासः द्वितीयतृतीयमध्यमयोः छत्रिन्यायेनलासः क्रमिकः १९ ॥

न१

प्रथमचतुर्थयोः गुणेनगुणो दोषेणवागुण इतिभेदयोः उल्लासः उल्लासशब्दः अन्वर्थ इति उत्कृष्टो लासः सुवर्णयत्रेत्यर्थानुगत इत्यर्थः छत्रिन्यायेनेति केषुचिच्छत्रसंबंधाच्छत्रच्छत्रिसमुदाये छत्रिणो यांतीतिवदित्यर्थः ॥ ॥इत्युल्लासः १९॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्थं प्रस्थपरिमाणपात्रं-मद्भक्तेरिति-ममोक्तिः कविता स्तुधियोऽतः करणं स्तुधीभूयमृत्तीभूयच्चेन्मदयति तोषयति तदास्यामद्भुक्तेः अरसानां नीरसानां पुरुषा
णामनादरस्तम्नहे: किंनामस्यान्न किंचिदित्यर्थः कचिदलभेति पाठः परमरमणीयापि कैवरमणी स्त्रीयूनंतरुणस्य यथांतः करणाहरणं कुरुते तद्दत्कुमाराणां

त्वर

तारुण्यं तौ यदि न स्यातां अवज्ञालेकं तिष्ठेत्सा स्वल्पमेवांबु लभते प्रस्थं प्राप्यापि सागरं मीलंतीयादिपद्यानिकाहानिरभूतद्गु
तैः ताभ्यां गुणदोषाभ्यां तौ गुणदोषौ स्वकस्यविदुषो नान्यस्यगुणालाभो हितीयाईमुदाहरणं दोषेणादोषस्याप्राप्तौ तती
याईमुदाहरणं यथावा मद्भक्तिस्त्वेदं नमेदयति स्तुधीभूयस्तुधियः किमस्यानामस्यादरस्य पुरुषानादरभेदैः यथाऽन्नेत्तद
त्परमरमणीयापि रमणी कुमाराणामंतः करणाहरणं कैव कुरुते त्वं चेत्स्वं चरसे हृषेणलघुताकानामदिरंदंतिनाग्यालैः कं
रा[illegible]भूषणानि कुरुषे हानिर्नहेनामपि मूर्ईनां कुरुषे जलांभुमयशः किंनाम लोकत्रयी दीपस्यांबुजबांधवस्यजग
तामीशोसिकिंब्रूमहे अज्ञाये कवितारमणीगुणाभ्यां अस्वालहृदयो ज्ञानस्वरूपगुणाभावोवर्णितः द्वितीये परमेश्वरानंगी
कारदोषेणादिग्गजादीनां लघुतादिदोषाभावोवर्णितः १३॥ ॥

नव कालानांमित्यन्वयः त्वंचेदिति-शिवंप्रतिकस्यापि कवेरुक्तिः जलांभुचंद्रंपङ्केजउांभु अंबुजगांधवः सूर्यः उल्लासरूपगुणाभावः अज्ञानस्वरूपस्यगुणस्याभावः
॥ ॥इत्यवज्ञा १३॥ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु·नं· दोषस्येति अभ्यर्थना इच्छा·तत्रैव दोषएव·अनुज्ञेति लक्ष्यनिर्देशः शश्वत् निरंतरं संकीर्त्यत इत्यनेनान्वयि·मय्येवेति जीर्णतां·प्रत्युपकाराक्षमतां·हृदिशद्धेवा
८८ नरार्थः व्यतिरेकमुखेनेति वैधर्म्यमुखेनेत्यर्थः अस्यवाधिक्यत्यासेनेत्यनेनान्वयः दर्शितेति·वैधर्म्यविपर्यये प्रत्युपकारानभिलाषी विपत्तिं नाकांक्षतीत्यर्थपर्य

ता२

दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात् विपदः संतु नः शश्वत् यासु संकीर्त्यते हरिः मय्यर्पितमय्येव जीर्णतां यातु यत्त्वयोपकृतं
हृदे नरः प्रत्युपकारार्थी विपत्तिमभिकांक्षति इयं हनूमंतं प्रति राघवस्योक्तिः अत्र प्रत्युपकाराभावो दोषः ‥‥भ्युपगम्य हे तद्गु
णो विपत्याकांक्षायाः प्रसक्तिः सा च व्यतिरेकमुखप्रयुक्तेन सामान्येन विशेषसमर्थनरूपेणार्थांतरन्यासेन दर्शिता यथा
भजेम भवदंतिकं प्रकृतिमेत्य पैशाचिकीं किमित्यमरसंपदः प्रमथनाथ नाथयामहे भवद्भवनदेहलीविकटतुंडदंडाहतित्रुट
न्मुकुटकोटिभिर्मघवदादिभिर्भूयते १४ ॥॥

ड१

वसानादितिभावः भजेमेति हे प्रमथनाथ हर पैशाचिकीं पिशाचसंबंधिनीं प्रकृतिं पिशाचतामेत्य प्राप्य भवतोंतिकं समीपदेशं भजेम· अमरसंपत्तीः किमिति
प्रार्थयामहे यतो मघवदादिभिरिंद्रप्रमुखैरपि भवद्भवनदेहलीषु विकृतुंडः स्य वक्रतुंडस्य दंडाघातैः स्फुरन्मुकुटाग्रैर्भूयत इत्यर्थः ॥ ॥इत्यनुज्ञा १४॥ ॥ राम०
ड१ ८८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लेश इति लक्ष्यनिर्देशः ध्रुवमसौ इति समासिस्मृप्संतं शुकस्य निंदायां निंदाव्याजेन स्तौति चेत्सन्वयः संत इतिः सच्चरितस्योदयोदृष्टिः तद्यमनिंनस्तावराः प्रादुर्भवद्यंत्रणां त्वेच्छा
चरणनिरोधो येषां ते सर्वत्रैव विषये दुःखमिति क्रियाविशेषणं अव्युत्पन्नमतिः अनिपुणमतिः असत्समीचीनेन कृतेनाचरणेन प्राकृतो नीचः पुत्रैष इति वरार्थिनीक

लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनं अखिलेषु विहंगेषु हंत स्वच्छंदचारिषु शुक पंजरबंधस्ते मधुराणां गिरां फलं दोषस्य गुणत्वकल्पनं
गुणस्य दोषत्वकल्पनं च लेशः उदाहरणे सज्जो वज्रमते विदुषि पुत्रे चिरं राजधान्यां प्रवसति तद्दर्शनोत्कंठितस्य पितुर्वचनं अप्रस्तुतप्रशंसारूपं तत्र प्र
थमार्धे इतरविहंगानामवक्तृत्वस्य दोषस्य स्वच्छंदचरणानुकूलतया गुणत्वं कल्पितं द्वितीयार्धे मधुरभाषित्वस्य गुणस्य पंजरबंधहेतुतया दोषत्वं कल्पि
तं न चात्र व्याजस्तुतिराशंकनीया न ह्यत्र विहंगांतराणां स्तुतिव्याजेन निंदायां शुकस्य निंदाव्याजेन स्तुतौ वा तात्पर्यं किंतु पुत्रदर्शनोत्कंठितस्य दोष
गुणयोर्गुणत्वदोषत्वाभिमान एव वा श्लोके निबद्धः ध्रुवमसौ सच्चरितोदयव्यसनिनः प्रादुर्भवद्यंत्रणाः सर्वत्रैव जनापवादचकिता जीवंति दुःखं सदा ॥
अव्युत्पन्नमतिः कृतेन न सता नैवासता व्याकुलो युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः दंडी त्वत्रोदाजहार गुणेषु दोषगुणावाप्त्या जायोगणेष
तिरूढ्वर्जितः रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि चपलो निर्दयश्चासौ जनः किं तेन मे सखि आगः प्रमार्जनायैव चाटवो येन शिक्षिताः ८० अत्र
त्वाद्यश्लोके राज्ञो वीरोत्कर्षस्तु कन्याया निरंतरं भोगाभिलाषिविवर्जितत्वादोषत्वेन भासमानतामित्यभिप्रेत्य विरक्षसख्या राजकोपजिहीर्षया स एव दोषो गुणत्वे
न वर्णितः उत्तरश्लोके सात्वीभिरुपदिश्यमानं कन्यमशक्या पिता सामयतो मानपरिग्रहाद्गुणां प्रतिज्ञाय तदनिर्वाहमाशंकमानया सखीनामुपहासं
परिजिहीर्षया नायिकया तस्य चाटुकारिता गुण एव दोषत्वेन वर्णितः न चाद्यश्लोके स्तुतिर्निंदापर्यवसायिनी द्वितीयश्लोके निंदास्तुतिपर्यवसायि
नीति व्याजस्तुतिराशंकनीया राजकोपादिपरिहारार्थमिह निंदास्तुत्योरन्यो विदितं लेशत एवोद्धारनेन तत्तो विशेषादिति १॥ ॥

न्यकां प्रति सखीवचनं चपल इत्यादि नायिकायाः सखीं प्रति पाठे पुत्कर्षए वार्थः कन्याया दोषत्वेन भासमानतामित्यन्वयः निवर्जितं अभिलाषिविवर्जिषात् तद्रूपदोषत्वेनेत्यर्थः निर्वि
हरणे रतिपाठे राज्ञो विशेषणं कुतस्तर्हि गुणत्वेन वर्णनं तत्राह राजकोपेति अत एवानाविदितं यथा स्यादिति क्रियाविशेषणं लेशत एवेति तदुक्तं दंडिनैव लेशमेके विदु
र्निंदां स्तुतिं वा लेशतः कृतामिति १॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु.नं. लेशमात्रस्येतिहास्नार्थकं उदाहरणयोः अग्रिमे लेषितयोः भिन्नविषयेति अन्यनिंदयान्यस्य स्तुतिरन्यस्तुत्यान्यनिंदेत्येवमादिरूपेणार्थः ननु तथाप्येकविषया व्याजस्तु
८२ तिर्न लेशाद्भिद्येत तस्यांशं क्वापि विषये कोपीति लेशास्पर्शनादित्यर्थे तेनेनान्वयः इंदोरिति हे कुवलयतिलकरूप राजन्न त्वदीयैर्यशोभिः किं धवलितं तदुदायतोऽ
प्यपि इंदुलक्ष्मादीनि धूम्रलिमानमगणनादिति लिप्तान्याभासंते इत्यन्वयः लक्ष्माद्युदाहरणे दिक्कुनागानां दिग्गजानां मदजलमेवमषी तच्छं जिताच्छुक्लानि परिसं

वत्स्तत्स्तुइह व्याजस्तुतिसद्भावेपि न दोषः नत्वेतावता लेशमात्रस्य व्याजस्तुत्यंतर्भावः प्रसज्यते तदसंकीर्णयोरपि लेशोदाहरणयोर्दर्शन
त्वात् नापि व्याजस्तुतिमात्रस्य लेशेंऽतर्भावः प्रसज्यते भिन्नविषयव्याजस्तुत्युदाहरणेषु कस्त्वं वानर रामचंद्रभवने लेखार्थसंग्राहको यदृ
स्तुहरीक्ष्णेनधम्मिल्लेनचाटूक्तेषु त्यादिषु दोषगुणीकरणस्य गुणदोषीकरणस्य चाभावात्तत्रान्यगुणदोषाभ्यामन्यत्र गुणदोषयोः प्रतीते
र्विषये कोपि इंदोर्लक्ष्मत्रिपुरजयिनः कंठमूलं मुरारिर्दिङ्नागानां मदजलमषीभांजि गंडस्थलानि अद्याप्युर्वीवलयतिलक श्यामलिम्ना
नुलिप्तान्याभासंते वद धवलितं किं यशोभिस्त्वदीयैः इत्याद्युदाहरणेषु लेशास्पर्शनात् अत्र हि इंदुलक्ष्मादीनां धवलीकरणाभावदो
न४ षस्य गुणत्वेन पर्यवसानं किंतु परिसंख्यारूपेण ततोऽन्यत्सर्वं धवलितमिति अन्यो गुणः प्रतीयते क्वचिद्व्याजस्तुत्युदाहरणे गुणदोषीक
रणसत्त्वेपि स्तुतेर्विषयांतरमपि दृश्यते यथा सर्वदा सर्वदोसीति मिथ्या संस्तूयसे बुधैः नारयो लेभिरे पृष्ठं न वक्षः परयोषितः अत्र हि वाच्यया
निंद्यया परिसंख्यारूपेण ततोऽन्यत्सर्वमभिमतं अर्थिने दीनादिभ्यः दीयत इति स्तुत्यंतरमपि प्रतीयते एवं च येषूदाहरणेषु कस्ते शौर्यमदो योद्धु
गुणदोषादिषु १ मित्यादिषु गुणदोषीकरणादिकमेव व्याजस्तुतिरूपतया तिष्ठते अत्र लेशव्याजस्तुत्योः संकर एव इत्यमेव हि व्याजस्तुत्या प्रकृतप्रशंसारूपि कं यो१

तिः स्तुत्यात्येवं शापमानीत्येतत्स्तुतेरन्यार्थः विषयांतरे दोषीकृता द्वितीयगुणरूपमालंबनं सर्वदेति अरयः पृष्ठमर्यादाच्च न लेभिरे प्रभवंतः पलायनाभावात् दी
नारः परिमाणविशेषपरिच्छिन्ना सुवर्णमुद्रा एवं च लेशव्याजस्तुत्यो रसंकीर्णविषयसत्त्वे च गुणदोषीकरणादिकमित्यादिपदेन दोषगुणीकरणस्य सं णा १०
ग्रहः ये षित्युपक्रमात्त्वेतिपाठो युक्ततरः अन्येत्यपि युक्तम् एव इदमोऽपि अच्छस्वार्थपरामर्शकत्वात् ॥ ॥इति लेशः १॥ ॥ ८२

सूच्यार्थेति सूचनीयस्यार्थस्येत्यर्थः मुद्रेति लक्षणनिर्देशः दृग्युग्मं विपुलं यस्याः सा । अत्र ग्रंथे । अस्मिन्नलंकारग्रंथे । रत्नमालाशब्देन भगवत्स्तुतिपद्यावली विशे
षउच्यते । रत्ननामनिवेशेन प्रकृतार्थप्रसत्त्वाविपदघटनेन तत्तन्नामकजातिसूचनं तन्नामप्रवृत्तिनिमित्तरत्नजातिसूचने नक्षत्रमालाशब्दोपि पूर्वोक्त
एव अश्व्यादिदेवतानामभिर्नक्षत्रगणानां तद्देवत्यानां सूचनं बोध्यं वक्ष्यमाणेति यथाश्वन्यादिराघवेयाः इत्यादि न्यायप्रवृत्तस्याति यंचोपि सहायतां अपंथानं तु गच्छंतं सा

सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः । नितंबगुर्वी तरुणी दृग्युग्मविपुला च सा ॥ अत्र नायिकावर्णनपरेण युग्मविपुलापदेनास्या
नुष्टुभो युग्मविपुला नाम कत्वरूपसूच्यार्थसूचनं मुद्रा । यद्यप्यत्र ग्रंथे छन्नाम्नो नास्ति सूचनीयत्वं तथाप्यस्यान्तराद्देरस्य लक्षणलक्ष
णायुक्तं छन्दःशास्त्रप्रयातित्वेन तस्य सूचनीयत्वमस्ति इति तदभिप्रायेण लक्षणं योज्यं । एवं रत्नमालायामपि तत्तद्रत्ननामनिवेशने
न तत्तन्नामकजातिसूचनं नक्षत्रादिमालायामश्व्यादिदेवतानामभिर्नक्षत्रसूचनमित्यादावयमेवालंकारः । एवं नाटकेषु वक्ष्यमाणा
र्थसूचनेष्वपि । क्रमिकं प्रकृतार्थानां न्यासं रत्नावलिं विदुः । चतुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते ॥ अत्र चतुरास्यादिपदैर्वर्ण
नीयस्य ब्रह्मविष्णुरुद्रात्मतापि प्रतीयत इति प्रसिद्धसहपाठानां ब्रह्मादीनां क्रमेण निवेशनं रत्नावली ३ ॥ ॥

नं२

दोपि विसृंचतीति तत्त्रपापरेण वक्ष्यमाणरागणदृष्टान्तसूचनमिति बोध्यं ॥ । इति मुद्रा क्रमिकमिति प्रकृतार्थानां क्रमिकं प्रसिद्धक्रमानुसारिन्यसनं प्रति
पादनं रत्नावलिरलंकारः प्रकृतत्वं च यथा कथंचित्प्रकृतसंबंधित्वं बोध्यं चतुरेति चतुरमास्यं यस्य सः चतुर्मुख ब्रह्म ३ ॥ ॥ ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु० नं० रत्यासेरिति हेवालेभवत्याःस्तनेश्रीरमणस्यविष्णोरवतारदशकंभातीत्यन्वयः कीदृशे रत्याकामपत्न्याःप्रियस्यलांछनंचिह्नंनखक्षतांगरागादिकंयेनतथा
९० भूते कठिनतायाआवासेस्थानभूते रमेनालिंगिते प्रकृष्टाह्लादेएकरसे तत्परे क्रमाद्दृढदामलकादिपरिमाणाभ्यामेनोपचितेप्रवृद्धे भूभृतांपर्वतानां
गुरुत्वमपहंतिनाशयतीतितादृशे ततोपिमहत्वात् चक्रवाकस्पर्द्धाशीले तत्सदृशत्वात् भोगः स्त्र्यावेशरीरंवातज्जाजिज्ञानितमदने तेषिंद्रियेषुलीलाया
सक्ताउन्मुखायस्मिंस्तादृशे एतैरेवविशेषणैरवतारदशकरूपतापिस्तनस्यबोध्या तद्यथा रत्याश्रयः प्रियः कामस्तस्यलांछनंमत्स्यस्तद्रूपे कठिनता

यथा रत्याःप्रियलांछनेकठिनतावासेरमालिंगितेप्रह्लादैकरसेक्रमादुपचितेभूभृद्गुरुत्वापहे कोकस्पर्द्धिनि भोगभाजि
जनितानंगे खलीनोन्मुखे भाति श्रीरमणावतारदशकंबाले भवत्याःस्तने प्रसिद्धसहपाठानांप्रसिद्धक्रमानुसरणोपायमे
वालंकारः ५॥ ॥

याआवासेकूर्मेरसयापृथिव्यात्योद्धृतया कालआलिंगितेवराहे प्रह्लादएकोरसः प्रीतिर्यस्यतस्मिन्नृसिंहे क्रमःपादविक्षेपस्तदनुसारेणोपचितेप्रवृद्धेवा
मने भूभृतांराज्ञांगौरवनाशकेभार्गवे कोकस्पर्द्धिनिसीताविप्रयोगातुरतयाचक्रवाकशापदेरामे भोगःफणातज्ज्ञाजिश्शेषावतारेबलभद्रेजनितम
नंगंअंगस्पर्शोरीरस्यविरुद्धंमौनंभोगत्यागसमाधिप्रभृतियेनतस्मिन्बुद्धेखलीनमश्वस्यवल्गातदुन्मुखेकल्किनीति क्रमानुसरणेपीति तथा राम०
चप्रसिद्धसहपाठानामर्थानांन्यसनंरत्नावलिरितिसामान्यलक्षणं सक्रमाक्रमत्वेनतस्यभेदावितिभावः ५॥ ॥ ॥ ९०

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यस्येति यस्य प्रत्यग्रः निहता तां प्रतिसामंतानां शत्रुभूपानामंतः पुरेषु पंचमहाभूतमयो मूर्त्त इवाहूयते तस्य नृपः पंचमहाभूतमयत्वमेव विशेषणैर्दर्शयति वह्निमय इत्यादि अंगेषु क्ष्मामयः पृथ्वीमयः पीडाभरसहिष्णुत्वात् स्वांतेषु अंतःकरणेषु आकाशमयः तेषां शून्यताश्रयत्वात् यथा कथंचिदित्यस्य प्रपंचः प्रकृतोपमानेत्यादि उपमानं चोपरंजकं चोपमानोपरंजके तयोर्भावस्तत्ता प्रकृतस्य उपमानता उपरंजकता चेत्यर्थः उपरंजकता चारोप्यमाण

यथा यस्य वह्निमयो हृदयेषु जलमयो लोचनप्रदेशेषु मारुतमयः श्वासितेषु क्ष्मामयो अंगेषु आकाशमयः स्वांतेषु पंचमहाभूतमयो मूर्त्त इवाहूयत निहतप्रतिसामंतांतःपुरेषु प्रताप एव महिलोकपालनव्यग्रहादीनां प्रसिद्धः सहपागानां यथा कथंचित्प्रकृतोपमानोपरंजकतादिप्रकारेणातिवेशने रत्नावल्यलंकारः प्रकृतान्वयं विनाक्रमिकतत्त्वात्प्रस्येष भंग्या निवेशने त्वयमेवालंकारः ५॥ ॥

ता तदुक्तं उपरंजकतामेति विषयी रूपकं तदेति तत्रोपमानतारति रिवप्रादिवन्नोपजायमानोदय इत्यादिवत् उपरंजकता तु चन्द्रास्य इत्योद्योदाहरणे वह्निमय इत्यादिप्रतापवर्णने चास्पष्टेति प्रकृतान्वयं विनेति मित्रचंद्रमुखी बाला लोहिताधरपल्लवेत्यादावितिभावः क्रमिके त्वपलक्षणात् तदभावेपि गुरु रागान्नयघनेन बाला तरुणीमंदगामिनीत्यादावप्ययमलंकार इति बोध्यं॥ ॥इति रत्नावली ५॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰ ने॰ तद्गुण इति स्वगुणत्यागादनंतरं अन्यदीयगुणग्रहणं तद्गुणालंकारः पद्मेति तव नासामौक्तिकमधरकांत्या पद्मरागवदाचरतीत्यर्थः वीरेति हे वीर त्वद्
४१ रिकामिनी वनभुवि परिश्रान्तं कर्तृ पल्लवानि करेण संस्पृशत्पाण्डुपत्रबुध्या न हरति नगृह्णाति करे हस्तानि निजकररुहाणां नखानां रुचा श्वेतकांत्यारं
चितानि श्यामानीत्यर्थः ॥ ॥इति तद्गुणः॥ ॥पुनरिति स्वगुणत्यागानंतरं पुनः स्वगुणप्राप्तिः पूर्वरूपमलंकारः ह्रेति नीलोपीति युक्तः पाठः विभिन्ने
ति माघे रैवतकगिरिवर्णनं गंरुडाग्रजेनारुणेन विभिन्नवर्णा मिश्रितवर्णाः रथ्यस्य रथ्याश्वाः यत्र गिरौ वंशांकुरस्वत्नीलैः परितः स्फुरं त्या रुचा त्वां रुचं ध्रुवं रत्न० ४
मन्वितानि पांडुपत्रधिया २

तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः पद्मरागायते नासामौक्तिकं ते धरत्विषा यथा॰ वीर त्वद्रिपुरमणी परिश्रान्तं पल्लवानि
संस्पृश्य न हरति वनभुवि निजकररुहरुचिरैः पुनः स्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतम् हरकं ठांशुलिप्तोपि शेषस्त्वद्यशसा सितः यथा
॥ ॥विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरंत्या रत्नैः पुनर्यत्र रुचा रुचं स्वा मानिन्यिरे वंशकरीरनीलैः अयमेव तद्गु
ण इति केचिद्धाजगुः ६॥ ॥

नीलद्युतिं आनिन्यिरे॰ आनीतवंतः रुचा विभिन्नवर्णा इति वा न्वयः केचिदित्यस्वरसबीजं तु पद्मरागायत इत्युदाहरणे तद्गुणालंकारेण स्यात् न चे प्राप्तिः अ
नुभवसिद्धचमत्कारस्य निरालंबनत्वापत्तेरित्यस्य हनीयं अथवा यं तद्गुण एवेत्येव कारक्रमभंगेन काव्यप्रकाशकारादिमतोपन्यासपरत्वेन व्याख्येयं॰ राम०
तेरत्र तद्गुणस्योदाहृतत्वात् अत्र हि पूर्वमश्वानामरुणगुणत्वं अनंतरं रैवतकरत्नैरुभयेषां तद्गुणत्वमिति तद्गुणद्वयमिति तेषामभिमतं ६॥ ॥ ९१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्वेति वक्तृ निविकृते विगते सत्यपि पूर्वावस्थायाश्चतुरत्वेनैरपि पूर्वरूपमलंकारः महः प्रकाशः द्वारमिति हेराजन्नूतव विद्विषां मंदिरेष्वन्योपि चिरंतनः शाणो यस्मात् सैव राज्यस्थितिर्मर्यादास्तीति शेषः यतो हारं रत्नघटितमिर्गं इकारव्याप्तभुमिरेव रत्नधारिभिरा हन्ते बहिरपि भूमयः मदप्रासिन्नगौर्डेर्ग जैरध्यासिताः अंतः पुरभूमयः विलसन्मणिधारिभिः कंचुकिभिः सर्पैरेव सो विदं तैरध्यासिताः शयनं तल्पं महिषीभिर्वनिताभिरेव महिषस्त्रीभिराक्रांतमित्यत्र

व्याख्या २

पूर्वावस्थां तु हन्ति श्च विकृते सति वक्तृनि दीपे निर्वापिते ध्यामीत्यांचीरत्नैर्महन्महः लक्षणोच्चकारात्पूर्वरूपमिति लक्षणा वाचकपदात्तु हन्तिः यद्द्वारं रत्नधिभिरा हन्नं बहिरपि प्रसिन्नगौर्डेर्गजैरंतः कंचुकिभिर्लसन्मणिधरैरध्यासिताद्भूमयः ॥ आक्रांतं महिषीभिरेव शयनं त्वद्विद्विषां मंदिरे राजन्सैव चिरंतनप्रणापिनी अन्येपि राज्यस्थितिः संगता त्वगुणानंगीकारमाश्रत द्गुणं चिरंरागिणिमश्चितेनिहितो पिनरज्यसि ७॥ ॥

पः ॥ इति पूर्वरूपं ॥ ॥ संगतेति संगतः सम्बद्धो यो यः पदार्थस्तद्गुणानंगीकारमतद्गुणालंकारमाहुः चिरमिति रागिणि अनुरागिणि मंजिष्ठादिरंजनद्रव्ययुक्ते च निहितोपि त्वं नरज्यसि रक्तो अनुरक्तश्च न भवसीति श्लिष्टं ७ ॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰ तं॰ गंडेति हे श्रीमन्नृसिंहाख्य भूपते एषा नव कीर्त्तिः मदैः पिच्छले यं किल दिग्गजानां गंडप्रदेशे यद्यपि विहरति तथा वैरि स्त्रीणां नयनकमलेषु स्थितान्यंजनानि प्र
९१ मार्ष्टि प्रोंछति तदपि तथापि दिक्षु हिमकरस्य चंद्रस्य ... पतन्किरणा हेतं तस्य सो वर्त्तिका त्वस्तीत्याहि हेत्वर्थे तदा हेति माशदादिभ्यः इत्यनेन तव
कृपत्ययः तत्स दृशी तिपार्वे स्फुरति प्रकाशते इत्यर्थः विशेषाकारेणेति प्राक्तनकीर्त्तिविशेषरूपेणेत्यर्थः इत्यननुगुणः प्रागिति परसंनिधिवैशात्तद्वंस्ति

कीर्त्तिः५ यथा गंडाभोगे विहरति मदैः पिच्छले दिग्गजानां वैरिस्त्रीणां नयनकमलेष्वंजनानि प्रमार्ष्टि यद्यप्येषा हिमकरकरादैन्तसौवास्ति
कीर्त्तिर्दिक्षु स्फुरति तदपि श्रीनृसिंह क्षितीश नन्वत्रानुगुणो नान्यत्र गुणोदयात्तुदय रूपाभ्यामुल्लासावज्ञालंकार रूपाभ्यां तद्गुणातद्गु
णयोः को भेदः उच्यते उल्लासावज्ञालक्षणयोर्गुणशब्दो दोषप्रतिपक्षवाची अननुगुणे नान्यत्र गुण इयतदगुदयो न तस्यैव गुणस्य संक्रम
णसंक्रमणे किंतु सद्गुणोपदेशेन सदसच्छिष्ययोर्ज्ञानोत्पत्त्युत्पत्ती वतद्गुणाजन्यत्वेन संभावितयोर्गुणांतरयोरुत्पत्त्यनुत्पत्ती तद्गुणातद्गु
णयोः पुनर्गुणशब्दो रूपरसगंधादिगुणवाची तत्रान्यदीयगुणग्रहणाग्रहणगोचरः स्फटिकवस्त्रमालिन्यादिन्यायेनान्यदीयगुणेनैव
रंजनारंजने विवक्षिते तथैव चोदाहरणानि दर्शितानि यद्यप्यवज्ञालंकृतिरतद्गुणस्य विशेषो न विशेषावेव कार्याजनि विशेषो नि मति
शुष्कलकारो इति न सामान्यलक्षणाक्रांतत्वात्तथापि उल्लासतद्गुणप्रतिद्वंद्वितया विशेषाकारेणालंकारांतरतया परिगणितानि विनिध्येयं
प्राक्सिद्धस्य गुणोत्कर्षोऽनुगुणः परसंनिधेः नीलोत्पलानि दधते कटाक्षैरतिनीलतां कपिरपि च कापिशायनमदमत्तो वृश्चिकेन संदष्टः अपि च
पिशाचग्रस्तः किं ब्रूमो वैकृतं तस्य ९५ अत्र कपित्वजात्या स्वतः सिद्धस्य वैकृतस्य मद्यसेवादिभिरुत्कर्षः ८ ॥ ॥

द स्पत्वगुणस्योत्कर्षः अननुगुणो नामालंकारः नीलोत्पलानि कर्णावतंसीकृतानि कपिरिति कापिशायनं मद्यं॥ ॥इत्यननुगुणः ॥ ७ ॥ ७ ॥ राम॰ ९१

पपवार

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

मीलितमिति लक्ष्यनिर्देशः। स्पष्टमिति। स्वभावलोहिते चरणे लाक्षारसो न लक्षित इति तात्पर्यम्। मल्लिकेति। क्षौमं दुकूलं तद्धारिण्यः॥ ॥इति मीलितम्॥ ॥सामान्य
मिति लक्ष्यनिर्देशः। विशेषो व्यावर्तकधर्मः। पद्मानामाकरः पद्माकरः। तालिस्तु तेन अङ्गदेन प्रकृतेन चरणज्योत्स्नादिना स्वपरस्य लाक्षारसा। अभिसारिका

मीलितं यदि सादृश्याद्भेद एव न लक्ष्यते। रसो नालक्षि लाक्षायाश्चरणे सहजारुणे॥ मल्लिकामाल्यभारिण्यः सर्वाङ्गीणार्द्रचन्दनाः। क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः॥ अत्राद्ये चरणलाक्षारसयोररुणिमगुणसाम्याद्भेदानध्यवसायः द्वितीयोदाहरणे चाद्रिकाभिरभिसारिकाणां धवलिमगुणसाम्याद्भेदानध्यवसायः ११४ सामान्यं यदि सादृश्याद्विशेषो नोपलक्ष्यते। पद्माकरप्रविष्टानां मुखं नालक्षि सुभ्रुवाम्॥ कर्णोत्तंसं भेषु संक्रान्तप्रतिबिम्बशतेष्वपि। लङ्केश्वरः सभामध्ये न ज्ञातो वालिसूनुना॥ मीलितालंकारे एकेनापि परस्याभिन्नस्वरूपानवभासरूपमीलनं क्रियते सामान्यालंकारे तु भिन्नरूपावभासेऽपि व्यावर्तकविशेषो नोपलक्ष्यत इति भेदः॥ मीलितोदाहरणेऽपि चरणादेर्वस्त्वन्तरत्वेनाङ्गं तु कथं वक्तादिर्भासते। सामान्योदाहरणे तु पद्मानां मुखानां च वस्त्वन्तरतयाभानमस्त्येव तथा रावणादेरपि। तत्र प्रतिबिम्बानां च किंचिदं पद्ममिदं मुखमयं प्रतिबिम्ब इति विशेषः परं नोपलक्ष्यते अत एव भेदतिरोधानान्मीलितं तदतिरोधानेऽपि साम्येन व्यावर्तकानवभासे सामान्यमित्युभयोरप्यन्वर्थता ९॥ ॥

न३ स्व४

दे। भिन्नरूपेति। मुखपद्मादेर्भिन्नस्य स्वरूपस्यावभासेऽपीत्यर्थः। उक्तमेवार्थमुदाहरणारूढतया विशदयति। मीलितोदाहरणे हीत्यादिना वस्त्वन्तरत्वेनान
भासत इत्यन्वयः। तत्र प्रतिबिम्बानां च वस्त्वन्तरतयाभानमस्त्येवेत्यनुषङ्गः ९॥ ॥ ॥ ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु. टी. केचिदिन्द्रियस्याङ्गैरिन्त्यग्रिमेणान्वयः केचित्तु काशकाशादयः तदुक्तं समेनलक्ष्मणावक्तवस्तुनायन्निगूह्यते । निजेनागन्तुना वापि तन्मीलितमिति स्मृत
८३ मिति । तयोर्मध्ये । एवं चेत्यस्येत्यत्र मीलिताऽलंकार इत्यग्रेतनेनान्वयः अपांगेति । अपांगस्तरलो यथोक्तो । तरलाः सत्वरोच्चारणात् वक्रावक्रोऽञ्चिता भ्रूः ग्री
वा हुता गिरो वाक्यरूपाः इति प्रकारेणाम्लग हृशामेम केलीलपास्वतः स्वभावास्फुरितं प्रकटीभूतं तेन तस्माद् दंगके कृतपदः कृतस्थितिः भेदाध्यवसाये
पीति । सुरवपत्रयोर्भेदेऽवभासेपीत्यर्थः व्यावर्तकास्फुरणेन हेतुना । अलंकारांतरेणेति स्वरूपातिरोधानेनमीलितासंभवात् भेदातिरोधाने न च सामा

केचिद्दलद्वयस्य लक्षणसामञ्जस्यं तयोः केनचिद्दलीयसा तदन्यस्य स्वरूपतिरोधानेमीलितं स्वरूपप्रतीतावपि गुणसाम्याद्भेदतिरोधाने
सामान्यं एवं च अपांगतरले दृशौ तरलवक्रवर्णा गिरो विलासभरमंथरा गतिरतीव कांतं मुखं इति स्फुरति संगके मृगदृशां स्वतो लील
यातदत्र न मदोदयः कृतपदोपि संलक्ष्यते ४०० इत्यत्र मीलितालंकारः अत्र हि दृक्तारल्यादीनां तारीव पुषः सहजधर्मत्वान्मदोदयका
र्यत्वाच्चात्तदुभयसाधारणत्वाद् दृक्तारल्यादियोगिना वपुषा मदोदयस्य स्वरूपमेवतिरोधीयते लिंगसाधारण्येन तद्ज्ञानोपयाभावा
त् मल्लिकामालभारिण्य इत्यादिवत्सामान्यालंकार इत्याहुः तन्मते पद्माकरप्रविष्टानामित्यादौ भेदाध्यवसायेपि व्यावर्तकास्फुर
णेनालंकारांतरेणाभावं सामान्यालंकारावांतरभेदेन वा प्रवृत्तिमिच्छन्ति स्वरूपतिरोधाने नालंकारांतरेणाभावं मीलितावांतरभेदेन वा (घो

न्यस्यापासंभवादिति भावः सामान्येति तथाच गुणसाम्याद्विशेषाग्रह इति सामान्यालंकारसामान्यलक्षणं । विशेषाग्रहश्च क्वचिद्भेदेऽप्यध्यवसायमाणो क्वचि ॥ २०॥
च्चाध्यवसायमानाऽव इत्यादिप्रकारांतरणीतिरत्रतन्मते स्यादिति भावः अवांतरभेदेन वेत्यनंतरं भाव्यमित्यनुषज्यते प्रवीणास्मि इति मीलितं च दिसाहश्य
दित्यादिप्रवीणश्चन्द्रालोककृन्मतं इत्यर्थः स्वरूपतिरोधाने अपांगतरल इत्यादिस्वरूपतिरोधानस्थले अलंकारांतरेणेत्यादि स्वरूपतो ज्ञाय टि
मानेसादृश्याद्भेदाग्रहणमीलितमित्यंगीकारे प्रथमः पक्षः सादृश्याद्भेदाग्रहणमित्येतावन्मात्रं मीलितलक्षणांगीकारे तु द्वितीय इति भावः ॥ ॥ इति सा टि राम ९३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रू

भेदेति वैशिष्ट्यं वैजात्यं उन्मीलितं विशेषकश्च क्रमेणालंकारौ मग्नं भेदाग्रहात्तदंतर्गतं लक्षितानीति संकुचितत्वादिति भावः सामान्यरीत्या सामान्यालं
कारन्यायेन एवंच वेत्रत्वचातुल्यरूपं च वदंत्यन्ये कार्ण्यग्रंतौ गंडतलागतानि भृंगाः सहेलं यदि नापतिष्यन् कोवेदयिष्यन्नवचंपकानीत्यपि विशेषकोदाह
रणं बोध्यं यत्तु अनुमानालंकारे गतार्थत्वान्नानयोरलंकारांतरत्वमिति तदयुक्तं उदाहृतस्थले भेदविशेषस्फूर्तौ विशेषदर्शनहेतुकप्रत्यक्षरूपत्वा
त् अथापि स्वकपोलकल्पितपरिभाषयानुमानालंकारत्वं ब्रूषे तथापि माहेश्वरमहिम्ना प्रागनवगतयोर्भेदवैजात्ययोः स्फुरणात्मना विशेषाकारेण

भेदवैशिष्ट्ययोः स्फूर्तौ तून्मीलितविशेषकौ हिमाद्रित्वद्यशोमग्नं सुराः शीतेन जानते लक्षितान्युदिते चंद्रे पद्मानि च मुखानि च मीलितन्यायेन
भेदानध्यवसाये प्राप्ते कुतोऽपि हेतोर्भेदस्फूर्तौ मीलितप्रतिद्वंद्व्युन्मीलितं तथा सामान्यरीत्या विशेषास्फुरणे प्राप्ते कुतश्चित्कारणाद्विशेष
स्फूर्तौ तत्प्रतिद्वंद्वी विशेषः क्रमेणोदाहरणद्वयं तद्गुणरीत्यापि भेदानध्यवसायप्राप्तावुन्मीलितं दृश्यते यथा नृत्यद्भर्गाट्टहासप्रसर
सहचरैस्तावकीनैर्यशोभिर्धावल्यं नीयमाने त्रिजगति परितः श्रीनृसिंहक्षितींद्र नेदृग्गंधेषु नाभीकमलपरिमलप्रौढिमा स्याद्यदि स्याद्देवा
नां नाभविष्यत्कथमपि कमलाकामुकस्यावबोधः काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः वसंतकाले संप्राप्ते काकः काकः
पिकः पिकः इदं विशेषस्योदाहरणं अत्र द्वितीयौ काकपिकशब्दौ काकत्वेन ज्ञातः पिकत्वेन ज्ञात इत्यर्थांतरसंक्रमितवाच्यौ ॥११॥ ॥

मीलितसामान्यप्रतिद्वंद्विना युक्तमेवालंकारांतरत्वं अत एव गुणाद्वर्णयोरिव विशेषोऽप्यलंकारादित्यलं विस्तरेण नृत्यदिति नृत्यं कुर्वतो भर्गस्य हरस्या
ऽट्टहासः स्मितं तत्प्रसरस्य समन्नहस्य विस्तारस्य वा सहचरैः सदृशैरित्यर्थः ईदृक् कीर्त्तिधवलत्वे एषः कमलाकामुकः नाभीकमलपरिमलस्य प्रौढिम
प्र द्विपदिनासादयिष्यत् नाधारयिष्यदित्यन्वयः यत्तु तद्गुणस्यात्र निर्वाहः तत्कथं तत्प्रतिद्वंद्वित्वमुन्मीलितस्येति तदयुक्तं गुणालंभरूपत्वादुपेक्ष्यं तद्गु
णेन भेदानध्यवसायमात्रस्योक्तत्वात् ॥११॥ ॥

व

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुं॰नं॰ वाराणसीति लांछने तृतीयलोचनादिचिह्ने साधारणोऽपि तत्रीलत्वयः पार्थोऽर्जुनस्तेन कृतो यः प्रहारस्तेन व्रणोऽयतादृशमुत्तमांगं शिरः सर्वं त्वया भाविकमु
९४ रागसाम्यं इत्येतावगतं केशयुगसाम्यमिति भेदः॥ ॥इत्युन्मीलितविशेषकौ॥ ॥किंचिदिति किंचिदभिप्रायसहितं गूढमुत्तरं उत्तरं नामालंकारः वेतसी वेतस

यथा वाराणसीवासवतां जनानां साधारणोऽशंकरलांछनेऽपि पार्थप्रहारोद्भवव्रणमुत्तमांगे प्राचीनेऽमीशं प्रकरीकरोति किंचिदाकूतसहितं स्यात्
ग्रामोऽत्रोत्तरं यत्रासौ वेतसी पांथ तत्रेयं सुतरा सरित् सरित्तीरवर्गमार्गे प्रच्छन्नं पतिकामयमाना प्रत्युत्तरमिदं वेतसीकुंजे त्वां छेद्यमित्याकूतं।
ग्रामेऽस्मिन्प्रस्तरप्राये न किंचित्पांथविद्यते पयोधरोन्नतिं दृष्ट्वा वस्तुमिच्छसि चेद्वस। आस्तरणादिकमर्थयमानं पांथं प्रत्युक्तिरियं तत्र नोन्नतिं दृ
ष्ट्वा रंतुमिच्छसि चेद्वस अविदग्धजनप्रायेऽस्मिन्ग्रामे न कश्चिदवगमिष्यतीत्येतादृशं प्रतिबंधकं किंचिदपि नास्तीति हृदयं इदमुत्तरे प्रश्न
प्रस्योन्नरस्योदाहरणं निबद्धप्रश्नमुत्तरं यथा कुशलं तस्याः जीवति कुशलं पृच्छामि जीवतीत्युक्तं पुनरपि तदेव कथयसि मृतां तु कथयामि या
श्वसिति ईर्ष्याभिमानेन तत्र मनुष्यमायाता पथिका याः सखीमागतां प्रति कुशलं तस्या इति नायकस्य प्रश्नः जीवतीति सख्या उत्तरं जीवंत्याः कु
तः कुशलमिति तदभिप्रायः अन्यत् स्पष्टमन्य दुत्तरमिति नायकस्य पुनः कुशलं पृच्छामीति नायकस्य प्रश्नः जीवतीति सख्या उत्तरं जीवंत्याः कु
तः कुशलमिति सख्यावचनं सखीवचनोद्घाटनार्थं पुनरपि तदेव कथयसीति नायकस्याक्षेपः मृतां तु कथयामि याश्वसितीति सख्यभिप्रायो हृ
दये मरणोऽसति तस्याः कुशलं भवति मदागमनसमये पि श्वासेऽसंचरत्सु कथं मृतां कथयेयमित्यभिप्रायः १२॥ ॥

लतास्तलेनत वितुं योग्यास्तरा या ग्रामइति प्रस्तरप्राये पाषाणबहुले पाषाणतुल्ये च प्रायो बाहुल्यतुल्ययोरिति कोशात् ।किंचिदास्तरणादिकं
॥समागमप्रतिबंधकं च पयोधरो मेघः स्तनश्च कश्चिदवगमिष्यति ज्ञास्यतीत्येतादृशं इत्यास्वरूपं उन्नेयः कल्पः प्रश्नो येन तादृशस्योत्तरस्य ईर्ष्या राम॰
मानेति ईर्ष्याहेतुकमानेनार्थः अत एव प्रायाः पश्चात्तापयुतायाः १२॥ ॥ ॥ ॥ ९४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रश्नोत्तरेति प्रश्नस्य उत्तरान्तरं च प्रश्नोत्तरान्तरे ताभ्यामभिन्नमुत्तरं चित्रमित्युच्यत इत्यर्थः केदारेति दारणां पोषणे रताः के इति प्रश्नः केदारस्य क्षेत्रस्य पोषणे रताः इति तद्देवोत्तरं के खेटाः खे आकाशे अटन्तीति प्रश्नस्य यदुत्तरं वयः पक्षिण इति तत् किंचलमिति प्रश्नस्य यदुत्तरं तद्वयस्तात्फराणादीति तेनाभिन्नं इत्युत्तरं स्वेष्टमिति पराशयाभिज्ञस्य इतरस्मिन्नपरविषये साभिप्रायं चेष्टितं सूक्ष्मालंकारः पराशयाभिज्ञस्याप्रासावितरज्ञातस्य साकूतचेष्टितमर्थान्तरविषय इति वार्थः संकेतेति संकेतकालमनो यस्य तज्जिज्ञासुमिति यावत् विटं ज्ञात्वा नेत्राभ्यामर्पितमाकूतं यस्मिंस्तादृशं लीलापद्मं नेत्रेत्यादि क्रिया

प्रश्नोत्तरान्तराभिन्नमुत्तरं चित्रमुच्यते केदारपोषणरताः के खेटाः किंवलं वयः अत्र केदारयोषणरता इति प्रश्नाभिन्नमुत्तरं के खेटाः किंवलमिति प्रश्नद्वयस्य वय इत्येकमुत्तरं उदाहरणान्तराणि विदग्धमुखमण्डने द्रष्टव्यानि सूक्ष्मं पराशयाभिज्ञेतरसाकूतचेष्टितं मयि पश्यति सा केशैः सीमन्तमणिमावृणोत् काम्युकस्यावलोकनेन संकेतकालप्रश्नभावं ज्ञात्वा तया खेटेयं अस्तंगते सूर्ये संकेतकाल इत्याकूतं यः संकेतकालमनसं विटं ज्ञात्वा विदग्धया आसीन्नेत्रार्पिताकूतं लीलापद्मं निमीलितं १० पिहितं परवृत्तान्तज्ञातुः साकूतचेष्टितं प्रिये गृहागते शातः कान्ता तल्पमकल्पयत् राज्ञो सपत्नीगृहे आगतो सीति तत्कल्पनाकूतं वक्रस्यन्दिस्वेदबिंदुप्रबंधैर्दृष्ट्वाभिन्नं कुंकुमं कापि कंठे पुंस्त्वं तन्व्याः व्यंजयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख अत्र खेदादुन्मितं पुरुषायितं पुरुषोचितखड्गलेखालेखनेन प्रकाशितं १२ ॥ ॥

विशेषणं वा इति सूक्ष्मं पिहितमिति लक्षणं निर्दिशति तल्पं शयनं वक्रेति वक्रे प्रस्रवणशीलानां स्वेदबिंदूनां प्रबंधैर्धाराभिः कंठे भिन्नं लग्नं कुंकुमं दृष्ट्वा कापि तयस्या सखी स्मित्वा स्मितं कृत्वा पुंस्त्वं व्यंजयन्ती सती तन्व्याः पाणौ खड्गलेखां लिलेखेत्यन्वयः सूक्ष्मालंकारे पराभिप्रायमात्रस्य साकूतचेष्टितेनोत्तरसमर्पणं पिहितालंकारे तु गूढं परवृत्तान्तं ज्ञात्वा साकूतचेष्टया तत्प्रकाशनमिति भेदो बोध्यः ॥ ॥इति पिहितं १३ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु.नं. व्याजोक्तिरिति लक्षणनिर्देशः चौर्यरतेऽकृतं यत्संकेतभूतभूमिपृष्ठलुंठनमित्यन्वयः उपपतिना जारेण तस्यां छेकापह्नुतौ आयांतमिति प्रतोल्यां रथ्या

९५ व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनं सखि पश्य गृहारामपरागैरस्मि धूसरा अत्र चौर्यरतकृतसंकेतभूपृष्ठलुंठनलग्नधूलिजालस्य गो

पनं कस्यचिदनभिज्ञो षः प्रियायाः सखीगोष्ठे सखि रंगोपवनमागताली वारितापि मयाधुना उपपतिना खंडिताधरायां नायिकायाः सकाशमाग

च्छंतं प्रियमपश्यंत्य इव सख्या नायिकां प्रति हितोपदेशव्याजेन तं प्रति नायिकापराधगोपनं छेकापह्नुतेरस्याश्चायं विशेषः यत्र सा वचन

स्यान्यथा नयनेनापह्नवः अस्यामाकारस्याहेत्वंतरवर्णनेन गोपनमिति लक्षणे लक्षणाभिव्याप्तिर्व्याजोक्तिर्गृहरागसाकारस्य गोपनार्थहेत्वंतर

प्रत्यायकव्यापारमात्रोपलक्षणं ततश्च आयांतमालोक्य हरिं प्रतोल्यामाल्याः पुरस्तादनुरागमेका रोमांचकंपादिभिरूचुमानेभा

मान्यगृहद्वारणं[illegible]स्वेदेनेत्यत्रापि व्याजोक्तिरेव तत्रत्यानुरागकृतस्वेदरोमांचाद्याकारस्य भक्तिरूपहेत्वंतरप्रत्यायकेन प्रणामेन गोप

नेकृते सत्यपि हितालंकारयोरपि चेष्टितगृहरागगुप्तिसाधारणव्यापारमात्रोपलक्षणं ततश्च नलिनीदलेवला काममरकतपात्र इव

दृश्यते शुक्तिः इति मम संकेतभुवि ज्ञात्वा भावं तदा वदीदाली मित्यादिष्वपि सूक्ष्माद्यलंकारः प्रसरति अत्र श्लोके नायिकामा वयोः सं

केतस्थानं भविष्यतीति आशयं सूचयति कामुके तदभिज्ञया विदग्धया तदा सखीं प्रति कृतमुक्तं इति सूक्ष्मालंकारो भवति यतो अत्र

का वल्लीया मरकतपात्र इवेति स्थितशुक्त्युपमतया स्या निश्चलत्वेन आशुत्वेनेन तस्य प्रदेशस्य निर्जनत्वं तेन तदेतावयोः संकेतस्थानमिति रू ९

कामुकं प्रतिसूचनं लक्ष्यते न चात्र ध्वनिराशंकनीयो दूरे व्यञ्जनमात्रस्यापि संकेतस्थानप्रश्नोत्तररूपत्वेनैव विस्फुटत्वात् १४॥ ॥ रामं०

यो एको विज्ञसखीनितांसखाः पुरस्तात् रोमांचकंपादिभिरनुभावैर्व्यंजयमानमनुरागं प्रणतं हरिं प्रणमतीसतीति जगूहे गोपितवतीत्यन्वयः लक्ष्यते व्यज्यते १५॥ ९५

का

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रूपमिति सूक्ष्मालंकारवदुक्तिरूपव्यापारवर्णनमित्यर्थः उदाहृतेत्यमिति यथा वक्रसंदीतियदा एव पुंस्त्वेन व्याव्यंजयंतीव यस्याप्तामाह्लादयत्तांप्रपश्यामि ना
थं अथवा आलीवालांसस्मितं प्राहमंदं पुष्पाह्रित्वा मम पश्यामि नाथमित्युत्तरा इ निर्माणो नाथमित्युक्त्या प्रकाशनमिति बोध्यं वक्तृसौंदर्येति चेत समिक्रुंज
रूपवक्तृसौंदर्येत्यर्थः ध्वनिभावास्पदत्वात ध्वनित्वाश्रयत्वात उपसंहरति अतइति येषित्यस्य भावाविष्करणमस्तीत्यनेनान्वयः॥ ॥इति व्याजोक्तिः॥ ॥

सर्वेपिहितालंकारेषूदाहृतेष्वयं इदंचान्यदवधेयं यत्रासौ वेतसीयांथेत्यादिष्वगूढोत्तरसूक्ष्मपिहितव्याजोक्त्युदाहरणेषु भावो न स्वोक्त्या
विष्कृतः किंतु वक्तृसौंदर्यवलाद्व्यक्तो वक्ष्यविशेषविशेषिताक्रम्यः तत्र वक्तृतो नालंकारत्वे ध्वनिभावास्पदत्वात्प्राचीनैः स्वोक्त्या विः
करणोमत्यलंकारास्पदतास्तीत्युदाहृतत्वादस्माभिरप्युदाहृतानि शाकं हि यत्रासौ वेतसीपांथ तत्रेयं सुतरामसरिदितिएछंतमध्वानं कामि
न्याहसुस्त्वमेमित्याद्यर्थांतरकल्पनया भावाविष्करणमिष्टतःशाक्षेलिरितेषूदाहरणेषु संकेतकालमनसंपुंस्त्वं तत्त्वाव्यंजयंतीभा २५
मा न्यूरहेति भावाविःकरणमस्ति तेष्वेव तत्तदलंकारइति गूढोक्तिरन्योद्देशपंचेद्वस्त्वं प्रतिकथ्यते वृषाऽपेहि परक्षेत्रादायाति क्षेत्ररक्षकः
यं प्रति किंचिद्वक्तव्यं तत्तटस्थैर्मा विज्ञायीति तदेव तदन्यं कंचित्प्रति श्लेषेणोच्यते चेत्सा गूढोक्तिः वृषेत्याद्युदाहरणं इह परकलत्रमुपभुं
जानं कामुकं प्रति वक्तव्यं परक्षेत्रे सस्यानि भक्षयंतं पुङ्गवं किंचित्समीपे चरंतं निर्दिश्य कथ्यते नेयमप्रस्तुतप्रशंसा कार्यकारणत्वादेरव्य
यपत्वाभावात नापि श्लेषमात्रं प्रकृतार्थान्वयित्वेनाविवक्षितत्वात्॥१५॥ ॥

गूढोक्तिरिति यदन्योद्देश्यकं वाच्यं तत्तदन्यं प्रतिकथ्यते चेत गूढोक्तिरलंकारः क्षेत्रं सस्यादेः कलत्रं च अपेहि दूरीभव अविवक्षितत्वादिति अयं भावः प्रकृताप्र
कृतश्लेषेऽस्तावुदयमारूढ इत्यादाव प्रकृतार्थस्य प्रकृतार्थोपमानतया न्वयः स्वीक्रियते सर्वथैव प्रकृतासंबंधस्याप्रकृतार्थस्य कथने संबंधार्थाभिधायकत्वा
पत्तेरतः प्रकृतेपि श्लेषवादिना प्रकृतस्य प्रकृतसंबंधो वाच्यः स च नसंभवति विवक्षाविरहादिति १५॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अ१

कु०नं० कुतस्तर्हि श्लिष्टतार्थकथनं तत्राह तमसेति अश्लिष्टतार्थमेत्यर्थः ननु तादृशाविवक्षाविरहेऽपि नानार्थत्वात्समाङ्गेणाश्लेषएवेत्याशंक्याह विच्छित्तिविशेषे
९६ ति तथा च श्लेषसत्वेऽपि विच्छित्तिविशेषाद्गूढोक्तिरेव स्वप्रसंगीकार्येत्याशयः अत एव श्लेषमात्रमिति तन्मात्रनिराकरणमेवोपक्रान्तं न तु श्लेषनिराकरणमिति ना
यइति विपणिः पण्यवीथिका उष्णिणी रजस्वला आगमेन वेदेन लालनीयः स्तुत्यः आगमेन तन्त्रेण लालनीयस्य रजनी व्याप्य तत्संतत संयोगोऽहितीयाः
॥ ॥इतिगूढोक्तिः॥ ॥श्लिष्टगुप्तमिति श्लिष्टेत्युपलक्षणं अर्थशक्तिमूलगुप्तस्यापि गच्छामच्युतेत्यादौ संग्राह्यत्वात् वत्सेइति वत्से लक्ष्मि विषादं खेदं

तस्य केवलमितरवंचनार्थं निर्दिष्टतया विच्छित्तिविशेषसद्भावात् यथा नाथो मे विपणिं गतो न गणयत्येषा सपत्नी च मां त्वं कामामिह पुष्णि-
णीति गुरवः प्राणाः शहारभ्यंतरं वर्णम्यामात्र सहायिनी परिजनः श्रान्तो न मां सेवते तस्मात् मित्त्रागमेन लालनीय रजनीं लक्ष्मीपते रक्ष मां १६ अत्र
लक्ष्मीपतिनाम्नो जारस्यागमनं प्रार्थयमानाया स्तरिथं वंचनाय भगवंतं प्रति स्त्राक्रोशस्य प्रतायनं विहितोक्तिः श्लिष्टगुप्तं किं विना विष्कृतं
यदि हृषायेहि परद्वेष्ट्रादितिवक्तिसमत्वचनं १८ श्लेषेण गुप्तवस्तुपृथाकथं वित्तविना विष्कृतं चेदिहितोक्तिः हृषायेहीत्युदाहरणे पूर्ववत् गुप्तं व-
स्तु सस्त्वचनमितीं किं विना विष्कृतं यथा वत्से मा गाः विषादं श्वसनं मुरुजवं संत्यजोर्ध्वप्रवृत्तं कंपः को वा गुरुस्ते किमिह वलभिदा जृंभितेनात्र
याहि प्रत्याख्यानं सुराणामिति भयशमनच्छद्मना कारयित्वा यस्मै लक्ष्मीमदाद्वः स दहतु दुरितं मंथमुग्धां पयोधिः १९ इदं च परवंचनाय
गुप्ताविष्करणं १६॥ ॥

हरं च गुरुजवं महावेगं ऊर्ध्वप्रवृत्तं श्वसनं श्वासं पवनं च संत्यज कंजलं दात्तीति तथा वरुणः कंपस्य गुरुर्महान् बृहस्पतिश्च वलं पसिद्धं तद्भिदा नाशकेन च
लाख्यदैत्यनाशकेनेंद्रेण च अत्र स्त्रीहास्य सन्निधौ याहि इति प्रकारेण भयनिवारणव्याजेन सुराणां प्रत्याख्यानं वर्जनं कारयित्वा मंथोमनं तेन मुग्धः पयो- राम०
धिर्यस्मै लक्ष्मी मदात्स वो दुरितं दहत्वित्यन्वयः परेति परवंचनाय गुप्तस्याविष्करणमित्यर्थः १६॥ ॥ ॥ ॥ ९६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

त्र्येति· लज्जयागुप्तस्येत्यर्थः दृष्टेति गोपेत्यपियो रागस्तस्मात्किंचित्त्हृतया अपहृतयागवांपरागैर्धूलिभिर्व्याप्तयाचगोपेतिसंबोधनंवा किंचित्समविषमं·पु
न्नागुक्तं·च·इह· त्वयि·प्रेमो·व·पत्युर्भावःपतितानां·पततंद्वाषोच विषमेषुः पंचशरस्तेनखिन्नमनसां विषमेषुसंकटेषुखिन्नमनसांच·अवलानांस्त्रीणांवल
रहितानांच·सलेशंसस्तृवनं·गोष्ठंगोस्थानं·चेतोनलंभिति लोकांतस्त्रयतेगच्छतीत्यर्थ तनलंकामयते इच्छंती थ्रीगुप्तःतदाविष्करणंचव्रीगाहृष्ट·वेत्यनेनेति

त्र्यागुप्ताविष्करणंयथा दृष्ट्वाकेशवगोपरागहृतयाकिंचिन्नदृष्टंमयातेनेहस्खलितास्मिनाथपतितांकिंनामनालंबसे एकस्त्वंविषमे
षुखिन्नमनसांसर्वाबलानांगतिर्गोप्यैवंगदितःसलेशमवताद्गोष्ठेहरिर्वश्चिरं १० अत्रेकस्मस्यउरतोविषमेपरिस्खलनमभिहितवत्या
लंकामयमानयागोपिकायावचनेविषमपथि स्खलनयतनन्त्राणशार्थनारूपेणउद्दिष्टितृतीयमानेनार्थेनगुप्तंविवक्षितमर्थांतरे
गुप्तंसलेशंसस्तूचनमित्यनेनाविष्कृतं एवंनेषधादिषु चेतोनलंकामयतेमदीयंनान्यत्रकुत्रापिचसाभिलाषमितिदमयंतीगाक्या
दिकमेषुदाहरणंसर्वमिदंशाद्दशक्तिकोडीकृतगुप्तार्थाविष्करणं अर्थशक्तिमूलगुप्तार्थाविष्करणंयथा गच्छाम्यच्युतदर्शनेनम
वतःकिंतृप्तिरुत्पद्यतेकिंत्वेवंविजनस्थयोर्हतजनःसंभावयत्यन्यथा इत्यामंत्रणभंगिसूचितहृथा[redacted]वस्थानखेदालसामाश्लि
ष्यत्पुलकोत्करांचितमनुगोपींहरिःपातुनः अत्रगच्छाम्यच्युतेत्यादावामंत्रणोनत्वयारंतुमेतावत्कालंस्थितंतत्रलब्धमित्यर्थशक्ति लभ्य
वस्तुतृतीयपादेनाविष्कृतंसर्वमिदंकविनिबद्धवक्तृगुप्ताविष्करणोदाहरणं १७॥॥ सह२

बोधं शब्दशक्तीतिःशब्दस्येषवशेनेत्यर्थःक्रोडीकृतःसंगृहीतःगच्छामीति अच्युतमाहि षयेअस्खलितेतिगुप्तोर्थःचिरकालंत्वद्दर्शनेनापिनतृप्तिरित्यर्थे सा.द.टी. १२१॥
न दर्शनेनतृप्तिरपितुसंभोगेनेत्यर्थोगुप्तःविजनस्थयोरेकांतगतयोःहतश्चासौजनःअन्यथाःरत्यर्थंस्थितावितिसंभावयति तेनहृयोरकीर्तिर्जातैव
इथैवात्मानंवंचयावइतिगुप्तोर्थःआमंत्रणस्याच्युतेत्यादेर्भंग्यारचनयासूचितोयोवृथावस्थानखेदस्तेनालसां कविनिबद्धेति कविनिबद्धेनवक्त्रागुप्त

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

म१

कु॰नं॰ ऽत्र पुरुषत्वमिति। शौनभ्रूर्दयिता दृष्टिश्च तयोः संबोधनं कोपो रोषः विकारश्च रागिणि पत्त्रगिरागी विभ्रम्भवनतेन भ्रे इति च सयीत्यस्या विशेषणं। पक्ष्मणि गिरिरञ्जि
९७ मणी ले। न भ्रे इति दिकं संबोधनं एवं हृष्ट इत्यपि उच्चारणेनेति स्वरविशेषसहकृतोच्चारणेनेत्यर्थः॥ ॥इति विहृतोक्तिः युक्तिरिति स्वस्य मर्मगोपनाय
क्रियया यत्परस्यातिसंधानं वंचनं सा युक्तिरलंकारः त्वामिति नायकं प्रतिदूतिवचनं उपपस्वेदं पोषं दर्पणोरिति तस्य पुरुकस्य अतिमात्रं अत्यर्थं नि

स्व२ स्तूतो३ मान२

कविगुप्ताविःकरणं यथा त्वमुत्वं कापि ते स्वपास्त्वमश नं त्वन्न कथा योषितां हृरादेव विवर्जिताः स्मरभयः स्वगंधमूपादयः कोपेरा गिरिणिंदु
च सम्प्रवनते हृष्टे प्रसीदा धुनास्त्वं त्वद्विरहा इवंति दयिते सर्वा मम मांधादिशः ७७ तत्र तावदीर्ष्याकलुषितदयिताप्रसादनव्यापारे फरिति मान२
प्रतीयते हृष्टेरोगार्तस्य दृष्टिं मत्वा क्रोशो विवक्षितार्थः हृष्टे इत्यस्य पदस्योच्चारणे न संवृद्धिरूपत्ता मलगमप्पा विष्कृतः कविनिबद्धवक्तृ
गुप्तपरवंचनायां यत्कविगुप्तस्वप्नेदि प्रकरणार्थमिति भेदः युक्तिः परातिसंधानं क्रियया मर्मगुप्तये त्वामालिखंती दृष्ट्वान्य धनुः पो
ष्पं करे लिखत् अत्र पुष्पचापलेखनक्रियया मन्मथो मया लिखित इति भ्रांत्युत्पादनेन स्वानुरागरूपमर्माप्रकाशनाय परवंचनं क
३ पपावा तं दर्पणोरिति जल्पतो गृहस्थकेन कारिणं यहच्च स्वस्य तगृहसंनिधौ निगदतस्तस्यातिमात्रं वधूः कर्णावलंबितपद्मरागसक
जं क्षिप्स्य चंचूपुटे क्रीडा स्त्री विदधाति दाडिमफलव्याजेन वागवंधनं अत्र शुकवाक्य मुदर्णयातन्मुखेन स्वकीयरहस्यनिर्वचनमुक्तं
भुजनवचनं कृतं व्याजोक्तावाकारगोपनं युक्तौ तदन्यगोपनमिति भेदः यद्वा व्याजोक्तावुक्त्या गोपनमिति भेदः स्वचार्यातेमालोक्य
हरिंचतोल्पामिति स्लोके पि युक्तिरेव १८॥॥ सिद्धुक्रियया गोपन१

गदत इति संबंधः फलश्रुतो बीजपरः गोपनीयविषयभेदस्य विच्छित्तिभेदाप्रयोजकत्वादाह यद्वेति नन्वेवं सत्यायांतमालोक्योत्पादो व्याजोक्तिरेवे राग॰
तिप्रयुक्त विरुध्येत्तेत्यां शक्याह एवंचेति यद्वेतिपक्षांगीकारे चेत्यर्थः एवंच पूर्वग्रंथ आद्यपक्षाभिप्राये ज्ञोतिभावः॥ ॥इति युक्तिः १८॥ ॥ २७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नुकृतिः॥यथा॰मदीयेवरदराजस्तवे॥नाम्नैव ५

[illegible]

लोकेति अत्रत्वत्तोरेतुकारणं सहस्तेति अर्थाद्विरहे मामानाभिः व्याप्येत्यर्थः नाम्नैवेति हेवरदत्तवनाम्नैववांछितदातृत्वमाख्यातिकथयतित्रतस्त्वंवरदानमुद्रामि
तरदैवतवन्नधारयसि॰यतोविश्वप्रसिद्धतराविप्रकुलेश्वरत्वेत्यर्थः॥ ॥इतिलोकोक्तिः॥ ॥छेकोक्तिरितिलक्ष्यनिर्देशः अर्थांतरवांजकत
स्मीपस्थं यद्वृत्तांतः एष्टतत्सामीपस्थं॰मज्ञातव्यंचेति॰एच्छामात्ररूपांतस्तत्समीपस्थमित्यर्थः तेन॰लोकोक्त्यनुवादेन॰मलयेति॰ व्राताः समूहाः ध्याताः गताः वि

लोक [illegible] प्रवादानुकृतिर्लोकोक्तिरितिभण्यते सहस्वकतिचिन्मासान्मीलयित्वाविलोचने अत्रलोचने
मीलयित्वेतिलोकप्रवादोक्तेवरदवांछितदातृभावंख्यात्यतोनवहसेवरदानमुद्रां।विश्वप्रसिद्धतरविप्रकुलप्रसूतेयज्ञोपवीतवहनं नस्तिखल्वपेक्ष॥
अत्रोत्तरार्द्धेलोकप्रवादानुकारः छेकोक्तिर्यत्रलोकोक्तिःस्यादर्थांतरगर्भिता भुजंगएवजानातीतिभुजंगचरणांसखे केनचित्कस्यचिद्वृत्तांतएष्टस्यसमी
पस्थंनिर्दिश्यायमेतस्यवृत्तांतंजानातीत्युक्तवतोयमहेःपादान्हिरेवजानातीतिलोकोक्त्यारोत्नुवादः यल्लोकविदितेधनार्जनादिव्यापारेसहचा
रिणाविदितविषयतयालोकोक्त्यनुवादस्यप्रयोजनेस्थितेरहस्येव्यांतव्यापारेपितस्याऽयंसहचरइतिमर्मोद्घाटनमितितेनगर्भीकृतं य॰मलयम
रुतां व्राता याता विकासितमल्लिकापरिमलभरोभग्नो ग्रीष्मस्त्वमुत्सहसे यदि घनघटां नितांतनिस्नेहं य एव निवर्तनेप्रभवतिगवांकिंनःछिन्नःस एव
धनंजयः॥अत्रधनलिप्सयाप्रोषितांगनासखीवचनेयएवगवांनिवर्तनेप्रभवतिसएवधनंजयइत्यौभजातिप्रसिद्धलोकवादानुकारः॥अत्रातिसौंदर्य
शालिनीमिमामपहायधनलिप्सयाप्रस्थितोरमानमित्रइतिगोप्रायएवत्स्यानिवैकस्तस्यतेताधनेनाकृष्टस्तद्धि मुखीकरणोप्रत्याकर्षकत्वादि
त्यर्थांतरमपिगर्भीकृतं १ ॥॥ र्त्र १

का॥सितांमल्लिकाकुसुमस्तांपरिमलस्यभरोयस्मिन्नताहशोग्रीष्मोभग्ननष्टः हेघनत्वंयद्युत्सहसेउत्साहकान्भवसितदातंनिःस्नेहंनायकंघटयअनयासहसंयोजय॰
गवांनिवर्तनेपराचह्लतानांव्यावर्तनेयएवप्रभवतिसएवधनंजयोर्जुनइत्यन्वयः लिप्सयाप्रोषितस्यांगनातत्सखीवचनइतिसंबंधः अांप्रासैलंगाः इमांमत्सदृशी॰गो
प्रायोगोतुल्यः॥ ॥इतिछेकोक्तिः ६॥ ॥ ॥ ॥ ॥

स्य॰पा॰४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कृ.तं. वक्रोक्तिरिति काकुध्वनेर्विकारः अपरार्थस्य अभिप्रेतादर्थादर्थान्तरस्य नंदीहरस्य गणविशेषः दारुणाङ्कुरेत्यभिप्रेतं काष्ठेनेति कल्पनं विकृतत्वं वक्रस्य चिह्नं स्य
९८ वायोर्द्वाभ्यां भवित्रीति सीतां प्रति रावणोक्तिः पादद्वयं च तदर्थं स्वपतिसीतायाः तेनैव पतिः स रामो युधि संग्रामे पुरतोऽग्रतो न स्थाता नास्थास्यतीत्यर्थः अतिशये
नलघुर्लघिष्ठस्तत्संबोधनं इदं पादद्वयं षष्ठाक्षरात्परेषां समानां त्रिनवीति वर्णानां विलोपो यत्र तादृशं पुनः पठेत्यर्थः श्लेषेति श्लेषस्य परिहृत्य सहृत्वा
दितिभावः भिक्षेति जलनिधिस्त्वं हिमवांश्च तत्कन्ययोर्लक्ष्मीपार्वत्योः क्रमेण इत्थं लीलया संलापो मिथो भाषणं नोऽस्मान् त्रायतामित्यन्वयः इत्थं कीदृक् तद्

वक्रोक्तिः श्लेषकाकुभ्यामपरार्थस्य कल्पनं मुंच मानं दिनं प्राप्तं नेह नंदी हरांतिके १९ अत्र मानं मुंच प्रणतानामहिरित्यभिप्राये गणेनापि वाचितं दि
यथा२ नेप्राप्तं मा मुंचेत्यर्थान्तरं श्लेषेण परिकल्पितं अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित् इदमविकृतश्लेष
वक्रोक्तेरुदाहरणं विकृतश्लेषवक्रोक्तिर्यथा भवित्रीरंभोरु त्रिदशवदनग्लानिरधुना स ते रामः स्थाता न युधि पुरतो लक्ष्मणसखः इयं यास्यत्युच्चैर्वि
पदमधुना वानरचमूर्लघिष्ठेदं षष्ठाक्षरपरविलोपात्पठ पुनः सर्वमिदं शब्दश्लेषमूला वक्रोक्तेरुदाहरणं अर्थश्लेषमूला यथा भि. क्षार्थी क्व प्रया श्लेष४
तः सुतनु बलिमखे तांडवं क्वाद्य भद्रे मन्ये वृन्दावनान्ते क्व नु स मृगशिशुर्नैव जाने वराहं बाले कच्चिन्न दृष्टो जरठवृषपतिर्गोप एवास्य वेत्ता लीलासंलाप इ
त्थं जलनिधिहिमवत्कन्ययोस्त्रायतां नः काकुर्यथा असमालोच्य कोपस्ते नोचितोऽयमितीरिता नैवोचितोऽयमिति तं ताडयामास मालया अत्र
नैवोचितमिति काक्वा स्वरविकारेणोचितमेवेत्यर्थान्तरकल्पनं १॥॥ ह२

ह. भिक्षार्थीति हरमभिप्रेत्य लक्ष्म्या वाक्यं बलेर्दैत्यस्य मखे यज्ञे इति वामनाभिप्रायं पार्वत्याः भद्रे शोभने तांडवं नृत्यमद्य क्व वर्तत इति लक्ष्मीप्रश्नस्योत्तरं वृन्दावनस्थं
ते मध्ये इति श्रीकृष्णाभिप्रायं मृगशिशुः महादेवेन करे धृतः परस्तु मृगवराभीति हस्तं प्रसन्नमिति ध्यानश्रवणात् इदं लक्ष्म्या वाक्यं नैवेति पार्वत्याः मृगः पशौ
कुरंगे चेति विश्वः क्वचिदिति श्लोकः जरठो जीर्णः वृषपतिर्वृषश्रेष्ठ इति हर वृषभाभिप्रायं लक्ष्मीवाक्यं गोपो गवां पाल इति कृष्णाभिप्रायस्तूत्तरमिति अत्र भि राम०
क्षादिपदानां परिवृत्तिसहत्वादर्थश्लेषमूलत्वं असमालोच्येति अविचार्येत्यर्थः मालया पुष्पमालया॥ ॥इति वक्रोक्तिः १॥ ॥ ॥ ९८

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वभावोक्तिरितिलक्षणनिर्देशः जात्यादिस्थस्य जात्यादिसंबंधिनः आदिपदेन क्रियादिपरिग्रहः उत्तरंगानिति रंगायमानान्यङ्गानि येषां तैः तादृशैरिति गोष्पदक्षान्तैर्वक्ष्य वरैः खुराणां समीपे अन्योन्याभिमुखं वंशचलितौ परस्परस्य मार्गप्रदाने यो रभसो वेगस्तेन संवलितं युक्तं सावधानं सावधानत्वं ययोस्तादृशौ उभावपि भिन्नदिक्कं वामदक्षिणरूपदिक्संबंधि परस्परपार्श्वभागोपसर्पणं मुहुर्मुहुः कृत्वा सलज्जं यथा स्यात्तथा योपासरतां उपसर्पणं चक्रतुरित्यर्थः पूर्वोदाहरणे कुरंगजाति स्वभाववर्णनं अत्र सलज्जक्रियास्वभाववर्णनमिति भेदः॥ ॥इति स्वभावोक्तिः॥ भाविकमिति लक्षणनिर्देशः अद्यापीति ममनयनं नयनमिति तस्या वाचं

स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनं कुरंगैरुत्तरंगाक्षैः स्तब्धकर्णैर्मुदीक्षितं यन्तौ संमुखप्रचलितौ सविधे गुरूणां मार्गप्रदानरभसस्खलितावधानौ पार्श्वोपसर्पणमुभावपि भिन्नदिक्कं कृत्वा मुहुर्मुहुरुपासरतां सलज्जं भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनं अद्यापि तिष्ठति दृशोरिदमुत्तरीयं धर्तुं पुरः स्तनतटात्पतितं प्रवृत्ते वाचं निशम्य नयनं नयनं ममेति किंचित्तदा यदकरोत्स्मितमायताक्षी उदात्तमृद्धेश्चरितं श्लाघ्यं चान्योपलक्षणं सानौ यस्याभवद्युद्धं तद्धूर्जटिकिरीटिनोः इदं श्लाघ्यचरितस्योपलक्षणत्वे उदाहरणं समृद्ध्युदाहरणं यथा रत्नस्तम्भेषु संक्रान्तप्रतिबिम्बशतैर्वृतः ज्ञातो लंकेश्वरः कृच्छ्रादाञ्जनेयेन तत्त्वतः ३॥ ॥

निशम्य स्तनतटात् उत्पतितमुत्तरीयं धर्तुं पुरः प्रवृत्ते मयि सति तदा आयताक्षी यत् किंचित्स्मितमकरोत् इदमद्यापि मम दृशोः पुरस्तिष्ठतीत्यन्वयः अत्र नयनपदेन स्वकीयचकान्तरूपशक्यसंबंधेन नेत्रपदं लक्ष्यते तस्माच्च वस्त्रप्रतीतिः किंतु स्ववाचकवाच्यत्वरूपशक्यसंबंधेन वस्त्रमेव लक्ष्यत इति वचो गौणीत्यादिवल्लक्षितलक्षणा बोध्या नेत्रं मम स्थितं वस्त्रमिति विमृश्य॥ ॥इति भाविकं॥ ॥उदात्तमिति ऋद्धेः समृद्धेश्चरितं उदात्तालंकारः तथा श्लाघ्यं चरितं अन्यस्योपलक्षणमंगं चेत्तदपि तथा सानौ शिखरे यस्य पर्वतस्य किरीटी अर्जुनः कृच्छ्रात् कष्टात् आञ्जनेयेन हनूमता॥ ॥इत्युदात्तं ३॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु.नं. अत्युक्तिरितिलक्षणनिर्देशः अद्भुतं चातथ्यं मिथ्यारूपं अकूपाराः समुद्राः आर्द्रीभवन्ति स्वमनोऽत्युतप्तत्वात्तव त्यागात्तासां मेद इति भावः अन्तर्येऽद्भुतत्वविशेषणस्य कृत्यं श्ल १
९९ दर्शयति अनयोरित्यादि रसास्वादयोगे प्रयोगोऽसंबंधातिशयोक्तिरित्यत्र पाठ्यदाहृतं असदुक्तितारतम्येनेति अनयोरित्यत्र असदुक्तिमात्रं अन्यमिति
पद्योत्तरत्वं तासदुक्तिरितितारतम्येनेत्यर्थः तथा चाद्भुतविशेषणादत्यंताऽतथ्यरूपत्वलाभात्तातिशयोक्तावतिव्याप्तिरिति भावः अतएवानयोरितिपद्या
नंतरं दंडिनोक्तं इतिसंभाव्यमेवेत्तद्विशेषाख्यानं संस्कृतमिति एवं लोकातीत इवात्यर्थमध्यारोप्य विवक्षितः योऽर्थस्तेनातितुष्यंति विद्यानेतरे यथेत्युक्ता

अत्युक्तिरद्भुतातथ्यशौर्योदार्यादिवर्णनं त्वयि दातरि राजेंद्र याचकाः कल्पशाखिनः ॥ इयमौदार्यात्युक्तिः शौर्यात्युक्तिर्यथा राजन्स
प्तप्यकूपारास्त्वत्प्रतापाग्निशोषिताः त्वद्वैरिराजवनिताबाष्पपूरेण पूरिताः संपदत्युक्ता उदात्तालंकारः शौर्यात्युक्तावत्युक्तालंका
र इति भेदमाहुः अनयोरनवकाशो गिरतनयोर्जृंभमाणयोः अवकाशो नपर्याप्तस्तव बाहुलतांतरे ॥ अल्पं निर्मितमाकाशमनालोच्यै
व वेधसा इदमेवंविधं भावि भवत्याः स्तनमंडलमिति सदसदुक्तितारतम्येनातिशयात्युक्त्योर्भेदः निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रक
ल्पनं ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान् ॥ पुरा कवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासा अद्यापि तत्तुल्यकवेरभा
वादनामिका सार्थवती बभूव ॥ ॥

अल्पं निर्मितमित्याद्युदाहृतपद्ये दमत्युक्तिरित्युक्तमिति त्विच इत्युक्तिः निरुक्तिमितिलक्षणं योगवशान्नाम्नामर्थविशेषाभिधायिनामर्थांतरोपवर्णनमिति
लक्षणं ईदृशैरितिचेदं प्रति विरहिण्या उक्तिः ईदृशो जनसंतापनरूपैः दोषाया रात्रेः कर्ता दोषाणामाकरश्च त्वमसीति कनिष्ठिकांगुलिविशेषः अ रामः
धिष्ठितः कालिदासो यस्यां सा सार्थांगुलिविशेषरूपा अर्थवती नविद्यते कविनाम यस्यां सेत्यन्वर्थनामवती ॥ ॥इति निरुक्तिः ५॥ ॥ ९९

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कितवो द्यूतकारः धूर्तोऽक्षदेवी कितव इत्यमरः ननु प्रसिद्धानुवादस्य चमत्कारित्वात्कथमलंकारत्वमत आह निर्ज्ञात इत्यादि शकुनैः पाशकैर्दीव्य
तीति शाकुनिकः आविष्कृतमिति धूर्तत्वशंकानिवारणं एवमग्रेपि ॥ इति प्रसिद्धनिषेधः ॥ ॥ पंचमस्वरविशेषस्योदंचनमाविष्करणं यत्र तादृशे काले को

प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्तनं न द्यूतमेतत्कितव क्रीडनं निशितैः शरैः निर्ज्ञातो निषेधः स्वतोनुपयुक्तत्वाद र्थांतरं संभावीकरोती
ति तेन चारुताविच्छित्तियं प्रतिषेधालंकारः उदाहरणं युद्धरंगे प्रत्यवतिष्ठमानं शाकुनिकं प्रति विदग्धवचनम् नैतद्द्युतं दुरोदरस्य द्यूतत्वाभावो निर्ज्ञा
त एव कीर्त्यमाने शिवत्वप्रागल्भ्यं न युद्धेषु युक्तिग्रहोक्तीति उपहासं गर्भीकरोतीति तत्र कितवेत्यनेनाविष्कृतं यथा वा न विशेषेण न श्वाने
गणनाग्निनाह्न चन्द्रेन्दुना अप्रतीकारपारुष्याः स्त्रीभिरेव स्त्रियः कृताः अत्र स्त्रीणां विषादिनिर्मितत्वाभावः प्रसिद्ध एव कीर्त्यमानस्तासु विषा
दातिशायि क्रौर्यमिति अनुमर्थं व्यक्तीकरोति सर्वाप्रतीकारपारुष्या इति प्रतीकारवद्भ्यो विषादिभ्यस्तासां विशेषं दर्शयता विशेषणेन विष्कृ
तः सिद्धस्यैव विधानं यत्र तादृग्विधालंकृतिः पंचमोदंचने काले कोकिलः कोकिलो भवेत् निर्ज्ञात विधानमनुपयुक्तिं व्याक्षिप्तं सदर्थांतरंग
र्भीकरोति न चारुतरमिति तं विधिनामानमलंकारमाहुः उदाहरणे कोकिलस्य कोकिलत्वविधानमनुपयुक्तं सदतिमधुरपंचमध्वनिशा
लितया सकलजनहृद्यत्वं गर्भीकरोति तच्च पंचमोदंचने इति कालविशेषणेनाविष्कृतं ५ ॥ ॥

कोकिलः कोकिलो मधुरध्वनिरभवदित्यर्थः द्वितीयकोकिलपदस्यानुपयुक्तार्थत्वेनार्थांतरे संक्रमितत्वात् सकलजनहृद्यत्वप्रतीतिः प्रयोजनं एवं च शालि
नयेत्यनंतरं च कृतयेति शेषो बोध्यः पूर्ववत् धूर्तत्वशंकानिवारणाय तच्चेत्याद्युक्तं ५ ॥ ॥ ॥ ॥

कु०नं० हे हस्तेति शूद्रतपस्या जनिताधर्मवशादप्राप्तायुषि द्विजबालके मृते तद्दोषोद्धतस्य रामस्य स्वहस्तं प्रतीयमुक्तिः जीवातवे· जीवनाय शूद्रएव तपश्चरणान्मुनिरि-
१०० व मुनिः तस्मिन्कृपाणं खड्गं विसृज निक्षिप· यतो रामस्य करुणाशून्यं गात्रं शरीरमसि निर्भरमतिशयेन गर्भखिन्नायाः सीतायाः प्रवासने निर्वासने तत्परोऽसि इत्य-
स्यैत्यर्थः अत्र रामपदमकरुणत्वरूपार्थान्तरसंक्रमितं तदतिशयो व्यंग्यः स चात्यंतमित्यनेनोक्तः ध्वनिभावस्पदानि· ध्वनित्वप्रयोजकानि व्यवस्थितत्वादिति

यथा वा हे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य जीवातवे विसृज शूद्रमुनौ कृपाणं। रामस्य गात्रमसि निर्भरगर्भखिन्नसीताविवासनप-
टोः करुणा कुतस्ते अत्र रामस्य स्वहस्तं प्रति रामस्य गात्रमसीति वचनमनुपयुक्तं सद्रामस्येत्यनेन तस्यात्यंतं निष्करुणत्वं गमीक-
रोति तच्च निर्भरेत्यादिविशेषणेनाविष्कृतं यद्यप्यनयोर्विधिनिषेधयोरुदाहरणे व्यंग्यान्यर्थान्तरसंक्रमितवाच्यरूपाणि तथा-
पि न ध्वनिभावास्पदानि स्वोक्ते च व्यंग्यविशेषाविष्करणात् व्यंग्याविष्करणे वालंकारत्वमेवेति प्राक्प्रस्तुतांकुरप्रकरणे व्यवस्थितत्वा-
त्सर्वथाभिहितौ विधिप्रतिषेधौ आक्षेपभेदत्वेनोक्तौ इह तु प्रसिद्धौ विधिप्रतिषेधौ तत्प्रतिद्वंद्विनावलंकारान्तरत्वेन वर्णिताविति भेदः ६॥

शब्दार्थशक्त्याऽऽक्षिप्तोऽपि व्यंग्योऽर्थः कविना पुनः यत्राविष्क्रियते स्वोक्त्या सान्यैवालंकृतिर्ध्वनेरिति ध्वनिकारवचनेन निर्णीतत्वादित्यर्थः उक्ताविति निषेधाभासमा-
क्षेपं बुधाः केचन मन्वते आक्षेपोऽन्यो विधौ व्यक्ते निषेधे च तिरोहिते इत्येताभ्यां नाहं दूती· गच्छ गच्छसीत्युदाहरणयोः प्रतिपादिताविस्यर्थः प्रसिद्धत्वात्साधितप्र- राम०
तिद्वंद्वित्वं॥ ॥इति विधिः॥ ६॥ ॥ ॥ ॥ १००

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हेतोरिति हेतुमता कार्येण सार्धं मानच्छेदः कार्यं एष इति · विद्रुमच्छायः प्रवालकान्तिः विगततत्स्थानायस्य मरुर्निर्जलदेशः मानेइति · मानेनेच्छति अभिच्छति सति एषु
पशमेवारयतिसति क्रियां लज्जायां स्मामभूमिमालिरवंतां भूमस्थलेरवन स्पतद्भावत्वात् स्वातंत्र्यं च परिहस्य परामृशति अयति इति सति धैर्यं करी वा पात्र्यममनातुम
तमितिस्तु चनायह स्तभूनमंकृत्वा गतेसति हेतुलक्षणामवसरता पुरोगजत्तेनैतावत्फलं प्राप्तं यत्नादेनापियो तत्र एवं एव चरणोऽस्तीयोमस्तु एवं तस्मकृमत्वाते अत्र
जानातीत्यन्वयः अत्र तस्मात्स्वहेतुतत्कार्ययोः स्वरूपमभिधानं भेदांतरमाह हेतुहेतुमतोरिति केचित् भट्टोद्भटप्रभृतयः तदुक्तं हेतुमतासह हेतोरभिधान

हेतोर्हेतुमता सार्धं वर्णनं हेतुरुच्यते असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवां ५० यथा एष ते विद्रुमच्छायो मरुमार्ग इवाधरः कस्य नो तनुते तन्वि
पिपासाकुलितं मनः मानेनेच्छतिवारयन्नुपशमेस्मामाजिवेत्तां क्रियां स्तंतेपरि हृत्य तिष्ठति करौ वा पुष्यथैर्यंगते तस्मै तामनुवप्रतापफल
मियत्साप्रंजनेनाप्नुनायः स्पष्टेभनपदास्पदं वचरणोऽस्त्येवं संमन्यते इत्याद्युदाहरणं हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते लक्ष्मीविलासा वि
दुषां कटाक्षा वेङ्कटप्रभोः ५१ अत्र च कार्यावश्यंभावत्वं द्योतयितुमादिशब्दनामत एव कार्यकारणाभेदव्यपदेशः यथा आयुर्दानमहोत्सवस्य वि
नतक्षोणीभृतां भूभृत्प्रियविश्वासो नयनोत्सवो मृगदृशां कीर्तेः प्रकाशो परः आनंदः कलिता कृतिः सुमनसां वीरश्रियो जीवितं धर्मस्यैकनिके
तनं विजयते वीरः कलिङ्गेश्वरः अत्र दानमहोत्सवायुष्ट्वादिना ध्यवसितेराज्ञितदायुष्ट्वादिव्यपदेशः १॥॥

स भेदतो हेतुरिति लक्ष्मीति कटाक्षा विदुषां लक्ष्मीविलासा इत्यन्वयः अत्र विलासहेतोर्विलासाभिन्नत्वेनाभिधानं एवं विधलक्षणायाः प्रयोजनमाह अत्र
चेति कार्यावश्यंभावद्योतकस्त्वेवकारश्चेतिविग्रहः आ देतास्त्रपथ्यापातंरोगादित्याद्युपादेयत्वादिसंग्रहः आयुरिति वीरः कलिङ्गेश्वरः कलिङ्गदेशाधिपो विजयत इ
त्यन्वयः कीदृशः दानरूपस्य महोत्सवस्य आयुरिति कार्याभिन्नत्वेनाभिधानं एवमग्रेऽपि विशेषेण नतानां क्षोणीभृतां राज्ञां कजिता कृतिः धृताकारः वी
रश्रियः वीरजरूपाः निकेतनस्थानं॥ ॥इति हेत्वलंकारप्रकरणं समाप्तम्॥ १॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रसभावतदाभासभावशांतिनिबंधनाः ६

कु०नं० भावस्येति निर्वेदादेर्व्यभिचारिभावस्येत्यर्थः प्रत्यक्षप्रमुखाः प्रत्यक्षाद्याः तेच प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिसंभवैतिह्याख्याः विभावेत्यादि रत्या
१०१ देरालंबनोद्दीपनरूपाणि नायिकाचंद्रोदयादीनि कारणानि काव्ये वर्ण्यमानानि विभावयंतीति व्युत्पत्त्या विभावपदेनाभिधीयंते कार्याणि चकटाक्ष
रोमांचादीनि तथाविधान्येवानुभवं प्राप्नुवंतीति व्युत्पत्त्या अनुभावपदेन एषामेव कार्याणां रत्यादिनोत्पादने कर्त्तव्ये सहकारिभूतान्युक्तं गत्वा निर्वेदादीनि च व्यभिचा
रिपदेन विशेषादभितः समंततः कार्यस्यापि नं चारयंतीति व्युत्पत्तेः एवं रतिर्नाम रक्तपुरुषगाविपर्यायतो ध्यांतःकरणवृत्तिः विकृतविदूषकादिचेष्टादर्शनज
न्याचित्तस्य विकासरूपा वृत्तिर्हासः इष्टनाशानिष्टलाभादिजन्या चित्तवृत्तिः शोकः इत्यादि इत्यादिपदेन क्रोधोत्साहभयजुगुप्साविस्मयनिर्वेदाख्यानां च

इत्थं शतमलंकारा लक्षयित्वा निदर्शिताः प्राचामाधुनिकानां च मतान्यालोच्य सर्वतः चत्वारो रसवत्प्रेय ऊर्जस्वि च समा
हितं भावस्य चोदयः संधिः शबलत्वमिति त्रयः अष्टौ प्रमाणालंकाराः प्रत्यक्षप्रमुखाः क्रमात् एवं पंचदशान्यानप्यलंकारा
न्विदुर्बुधाः तत्र विभावानुभावव्यभिचारि(भि)रभिव्यंजितो रतिहासशोकादिचित्तवृत्तिविशेषो रसः स च यत्र परस्यांगं भवति तत्र
रसवदलंकारः १ ॥ ॥

णांपरिग्रहः विशेषपदेन चरत्यादेः स्थायित्वप्रयोजकं परिपुष्टत्वं कांताविषयत्वमितरानंगत्वं च विवक्षितं तदुक्तं रत्यादिश्चेन्निरंगः स्याद्देवादिविषयोऽ
थवा अन्यांगं भावभाग्वा स्यान्न तदा स्थायिशब्दभागिति स्थायिन एव चाभिव्यक्तिस्पर्शत्वं यदाहुः कारणान्यथ कार्याणि सहकारीणि यानि च
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः विभावा अनुभावास्तत्कथ्यंते व्यभिचारिणः व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृत इति अभि
व्यक्तानां च रत्यादीनां रसरूपाणां क्रमात् शृंगारहास्यकरुणरौद्रवीरभयानकबीभत्साद्भुतशांतरूपविशेषसंज्ञा बोध्याः १ ॥ ॥ ॥ राम० १०१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰ तं॰ कदेति निमिषमिवदिवसान् कदा तेषामीत्यन्वयः कीदृशाः काशगंगातीरे वसन्त अयेइत्यादेरीतिक्रोशन्तिप्मेदान्वयः अस्तिचाइति स्फाराः विस्तीर्णाः प्रोतो
मित्रसंजयामि भुवः पृथिव्याः इमां ध्रुवं विधत्तधारयमाणाः त्वत्सुत्यर्थीति हे वीरसत्त्वामतो भयात वने सत्वरं गच्छंतीः तव प्रत्यर्थिनः शत्रवो वसुंधरे शाभूपणास्तेषां
१०२ तरुणी विलुठितेयाताः किरातामिल्लास्तासां तरुणीनां मुक्ताः रत्नैः रतिवपलैः स्तनैः रतितरामतिशयेन लोलेश्चंचलैः रपांगैर्नेत्रप्रांतैः स्मृते स्मिमिताः सुधाः शोहृतरो

प्रेयोलंकार एव भावालंकार उच्यते यथा कदावाराणस्याममरतटिनीरोधसि वसन् वसानः कौपीनं शिरसिनिदधानोंजलिपु
टं अयेगौरीनाथत्रिपुरहरशंभोत्रिनयनप्रसीदेतिक्रोशन्निमिषमिवनेष्यामिदिवसान् अत्रशांतिरसस्यकदेतिपदस्तचितस्मृता
रव्यो व्यभिचारिभावोंगं यथा अस्तु चाः परितस्फुरंतिगिरयः स्फारास्तथांभोधयस्तानेतानपिबिभ्रती किमपिनश्रां
तासितुभ्यंनमः आश्चर्यं गायुक्त मुक्त स्तनौ मिथ्यावकुवत्ता वहिश्रदिमां स्मृतस्तवभुजोवाचस्ततो मुद्रिताः अत्रभूविष ७
रतिभावस्यवस्तुमतीति विषयरति भावेंगं ऊर्जस्वियथा त्वत्प्रत्यर्थिवसुंधरेशतरुणीः संत्रासतः सत्वरं यांतीर्वीरविलुंठितुंसर
भसंयाताः किरातावने तिष्ठंतिस्तिमिताः प्रकूटप्रलकास्ते विस्मितोपक्रमास्तासां मुक्तारत्नैस्तनैरतितरांलोलेरपांगैरपि अत्रभूविषयरति
भावस्यशृंगाररसाभासोंगं व॰ त्वयिलोचनगोचरं गते सफलं जन्मनृसिंह भूपते अजनिष्टममेतिसादरं युधिविज्ञापयति द्विषांगणाः
अत्रकवेः प्रभुविषयस्य रतिभावस्य तद्विषया द्विषद्गणा रतिरूपो भावाभासोंगं ३॥॥

प्रांचाः विस्मृत तपक्रमीलुंठनस्तेये स्तादृशाः तिष्ठंतीत्यन्वयः अत्रशृंगाररसानन्तुरक्ताराज्ञे नितान्तविषयत्वादनौचित्येन प्रवृत्तेस्तामाषरूपत्वं त्वयीति अज राम॰
निष्टा अस्तत युधिसंग्रामे तद्विषयेति प्रभुविषया द्विषतगणस्य पारतिस्तद्रूप इत्यर्थः अत्रशत्रुविषयकत्वरूपानौचित्येन प्रवर्तितत्वाद्भावस्याभासत्वं ३॥ १०१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰ नं॰ कदेति निमिषमिवदिवसान्कदानेष्यामीत्यन्वयः कीदृशः काश्यंगंगातीरे स्मरन्‌ अयेइत्यादेरितिकोशान्निषमेदान्वयः अस्तं चाद्रदति स्फाराः विस्तीर्णाः प्रतो
१०२ मिप्रसंजयामि भुवः पृथिव्याः इमां भुवं बिभ्रत्‌धारयमाणाः तत्सुत्पथीति हे वीरसंग्रामसंतोभयानवने मत्करंगछंतीः तवप्रत्यर्थिनः शत्रवो वसुंधरे शाभूपालेषां तरुणीर्विलुंठितंयाताः किराताभिल्लास्ता सांतरुणीनां मुक्ताहारलेरतिचपलैः स्तनेरतितरामतिशयेनलोलेस्मुंचलेरपांगैर्नेत्रप्रांतेस्मुतेस्मिमितास्सधाः शेक्षतरो

प्रेयोलंकारएवभावालंकारउच्यते यथा कदावाराणस्याममरतटिनीरोधसिवसन्वसानः कौपीनंशिरसिनिदधानोंजलिपु
टे अयेगौरीनाथत्रिपुरहरशंभोत्रिनयनप्रसीदेतिक्रोशन्निमिषमिवनेष्यामिदिवसान्‌ अत्रेशांतिरसस्यकदेतिपदस्तचितश्चिंता
ख्योव्यभिचारिभावोंगं यथा अस्तं चाः परितस्फुरंतिगिरयः स्फारास्तथांभोधयस्तानेतानपिबिभ्रती किमपिनश्रां
तासितुभ्यंनमः आश्चर्येणमुहुर्मुहुःस्तुतिमितिप्रस्तौमियावद्विभोस्तावद्विभ्रदिमांस्मृतस्तवभुजोवाचस्ततोमुद्रिताः अत्रप्रभुविष
२१ रतिभावस्यवसुमतीतिविषयरतिर्भावोंगं ऊर्जस्वियथा त्वत्प्रत्यर्थिवसुंधरेशतरुणीः संत्रासतः सत्वरंयांतीर्वीरविलुंठितुंसर ७
भसंयाताः किरातावने तिष्ठंतिस्तिमिताः प्ररूढपुलकास्तेविस्मितोपक्रमास्तासामुन्नरलैस्तनैरतितरांलोलैरपांगैरपि अत्रप्रभुविषयरति
भावस्यशृंगाररसाभासोंगं यथा त्वयिलोचनगोचरंगतेसफलंजन्मनृसिंहभूपते अजनिष्टममेतिसादरंयुधिविज्ञापयतिद्विषांगणः
अत्रकवेः प्रभुविषयस्यरतिभावस्यतद्विषयाद्विषद्गतारतिरूपोभावाभासोंगं ३॥॥

प्रांचाः विस्मृतउपक्रमोलुंठनरूपो यैस्ताः दृशास्तिष्ठंतीत्यन्वयः अत्रशृंगाररसानन्तरक्तराजतेनिताविषयत्वादनौचित्येनप्रवृत्तिरित्याभासरूपत्वं त्वयीति अज रामं॰
निष्टाअभवत्‌ युधिसंग्रामे त्वद्विषयेति प्रभुविषयाद्विषद्गताभ्यासस्यरतिस्तद्रूपइत्यर्थः अत्रशत्रुविषयकत्वरूपानौचित्येनप्रवृत्तितत्वाद्भावस्याभासत्वं ३॥ १०१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

प्रणयमयइति नायकस्यस्वामिनं प्रतिनायिकाहन्तांतोक्तिः मयित्व सखीभूते किमियं प्रपद्यते कुतस्तेतत्प्रणयमयइत्यभिप्रायेणामयास्थैर्यं मौनमवलंबितमंगी
कृतं प्रणयमइति वक्रवचनं सखीसमाज्ञाभिप्रायं एवंतयाप्रियंखलुशठोमां किमितिनालपतिभावतइतिकोपमाश्रितः इत्यन्योन्यपरस्परं विलक्षालक्ष्य
रहितायादृष्टिस्तत्रचतुरे सख्याजने निभिन्नांतरव्याजमहितं तादिति ध्वि भगवानिनीषामि नेतुमिच्छामि यतस्त्वैवरूपेणाहमः समालिंगनलः पत्रिशाग
हेसेनपादेनविलिख्यन्नदर्शि दर्शितः एकेति हे वीरकृणमात्रेणायुद्धप्रस्थाना ज्ञातीयोविरहक्लेशस्तदमाहिस्तुलोलाक्षीदयितांप्रणतात्तथाप्रौढसंग्राम

बा २

समाहितंयथा प्रणयमः किमियं प्रपद्यतइति स्थैर्यमयालंविनं किंमांनालपतीत्येयं खलुशठः कोपसत्त्वयाप्याश्रितः इत्यन्योन्यवि
लक्ष्यदृष्टिचतुरे तस्मिन्नवस्थांतरेसख्याजेहासितमयाप्रेतिहरो गुह्यकस्कतीष्यस्त्वया अत्र शृंगाररसस्यकोपशांतिरंगं भावोदयोय
था तदद्यविभ्रमपदयात्वरे धिमेदितंनितीषामिभवाहिलोकिनी अदर्शिपादेनविलिख्यपत्रिणान्तैवैवरूपेणाममः समालिंग्यः॥
अत्रलक्ष्यतिदमयंत्याश्चो त्सुक्यरूपभावस्योदयः शृंगाररसस्यांगं भावसंधिर्यथा एकाभ्रुत्कुसुमायुधेषुधिरिव
प्रव्यक्तपुंखावलीजेत्रमंगलपालिकेव पुलकैरन्या कपोलस्थली लोलाक्षीक्षणमात्रभाविविरहक्लेशासहापश्यतो ह्यगाकर्णय
तस्त्ववीरभवतः प्रौढाहवाडंबरं अत्रामणीश्रमरणोत्सुक्ययोः संधिः प्रभुविषयभावस्यांगं ४॥ ॥

डंबरमाकर्णयतस्त्वभवतः एकाकपोलस्थली प्राक्षणीघ्रं पुलकैः कुसुमायुधस्यमदनस्येषुधिस्तूणामिवप्रव्यक्ताऽपुंखावलीशरपुंखपंक्तिर्यत्रतथाभूता
ऽभूत अन्याद्वितीयाजेत्रंजयशीलस्यमंगलपालिका॥ मंगलरूपापालिका कुशकाशादिनिर्मिता उभयपार्श्वस्थितंभवेद्धादिषुवहामार्गपालीति
प्रसिद्धा तद्वदभूदित्यर्थः अत्र प्रेमपदोत्कायारतेरपरिपुष्टत्वाद्भावरूपत्वं बोध्यं ४॥ ॥ ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु०नं० क्वाकार्यमिति शुक्रा कन्यां देवयानीं दृष्ट्वा नोराज्ञोययातेरियमुक्तिः अकार्यं ब्राह्मणकन्यासक्तिः शशलांछनस्य चंद्रस्य कुलं सोमवंशः अयं वितर्कः तद्गुणम
१०३ हिनभूयोपीत्यौत्सुक्यं स्वमर्थेपि । क्वालेशा स्तु सुवर्णमितिमतिः अहो कोपेपीति स्मरणं अपगत कल्मषाः कृतेस्त कृते धीर्यषांते किं वदिष्यंतीति शंका
स्वप्नेपीति दैन्यं हे चेतः स्वास्थ्यमुपेहीति धैर्यं कः खलु धन्यो युवा तत्कृतोऽधरं धास्यतिपास्यतीति चिंता । विश्लंभो वियोग इति पर्यायो क्वांतेति इंद्रियाणां
कार्यशास्त्र तत्त्व संकुल

भावशावलत्वं यथा कौंचकुलं भूयोपि दृश्येत सादोषाणां प्रशमाय मे श्रुतमहो कोपेपि कांतं मुखं । किं वक्ष्यंत्यपकल्मषाः कृतधियः
स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्योऽधरं धास्यति अत्र वितर्कौत्सुक्यमतिस्मरणं शंकादैन्यधृतिचिंतानां शब
लता विप्रलंभशृंगारस्यांगं प्रमाणालंकारेऽत्युक्तं यथा कांतकांतवदनप्रतिबिंबे भग्नबालसहकारसुगंधौ स्वादुनि प्रणदितालि
ति शीतेनिर्ववार मधुनीन्द्रियवर्गः यथा किं तावत्सरसि सरोजमेतदारादाहोस्वित्सुखमवभासते युवत्याः संशय्य क्षणा
मिति निश्चिकाय कश्चिद्बिब्बोकैर्बकसहवासिनां परोक्षैः पूर्वं संदेहमात्रं तद्विशेषदर्शनजन्यसंशयोत्तरमत्युक्तमिति भेदः ५॥

वर्गः समूहः मधुनि मद्ये निर्ववार निर्वृतिं प्राप कथं भूते । संक्रांतप्रियमुखप्रतिबिंबे भग्नकोमलाम्रपल्लववत्सुगंधौ स्वादुनि आस्वाद्ये प्रकृष्टनाद
युक्तभ्रमरयुते शीतस्पर्शे चेति अत्रेंद्रियतृप्त्या तज्जन्यप्रत्यक्षमलंकारः किमिति आरात्तदूरे इति कृशांगं दित्य कश्चित्बकसहवासिनां कमला राम
नां परोक्षैरहर्षपेविब्बोकैर्मानास्त्रिय कथालापे विब्बोको नादरः क्रियेत्युक्तलक्षणो हावविशेषैर्मुखमिति निश्चिकाय निर्णीतवान्॥॥ इति प्रत्यक्षं ५॥ १०३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथेति यथाशब्दात्रानुमानार्थाः यथाशब्दस्तु निर्दिष्टत्वात्यपयोगानुमानयोरितिविश्वकोशात् तथा च चपलजलदरूपो धूमः व्योम्नश्चाकाशस्य रं
मवकाशं यस्मात्स्थगयति यस्माच्च कीरमणयः खद्योताः स्फुलिंगानां रूपं दधति धारयंति यस्माच्च विद्युद्रूपा निर्ज्वालाभिरुल्लसिताः प्रकाशीभूताः प
रितः पिंगवर्णाश्च ककुभो दिशस्तस्मात्पथिकरूपाणां तरूणां खंडेषु नूहे स्मरजरणो दवाग्निर्लग्न इति मन्ये इत्यन्वयः प्रयोगात्पथिकतरुखंडे स्मरदावानल
वत् व्योमव्यापिजलदधूमवत्वादित्यादि बोध्यः यद्वैता इति लहरीवच्चलाचलाश्चचलादृशो यासां ताः एताः कामिन्यो यत्र जने भ्रूलतां व्यापारयंति तत्रैव भ्रूलताविं

यथा १

अथानुमाने यथा । रंध्रं व्योम्नश्च जलदधूमः स्थगयति स्फुलिंगानां रूपं दधति च यथा कीरमणयः यथा विद्युज्ज्वालोल्लसितपरि
पिंगाश्च ककुभस्तथा मन्ये लग्नः पथिकतरुषंडे स्मरदवः यथा यद्वैता लहरीचलाचलदृशो व्यापारयंति भ्रुवं यत्तत्रैव पतंति संत
तममी मर्मस्पृशो मार्गणाः तच्चक्रीकृतचापपुंखितशरश्रेणीक्वणत्कारः क्रोधनो धावत्यग्रत एव शासनधरः सत्यं तदासां स्मरः व्रजेंद्र
पकसंकीर्णं इदमतिशयोक्तिसंकीर्णमितिभेदः ६॥ ॥

यथ एव यद्यस्मादमीमर्मस्पर्शिनो बाणाः सततं पतंति तत्तस्मात्मंडलीकृते चापे पुंखिता योजितपुंखा ये शरास्तेषु श्रेणिवत् चपलः करोयस्य तादृशः क्रोधनः स्मरः
शासनमाज्ञा तद्धारकश्चासौ मयतो धावतीति सत्यमित्यन्वयः अतिशयोक्तीति मार्गणात्वेन मनोविकाराणामध्यवसानादिति भावः प्रयोक्त एताः चक्री
कृते चापसदाग्रतो धावदाज्ञाकरमदनकार्मर्मभेदिबाणपाताश्रय भ्रूसंचालास्थानकत्वादिति बोध्यः ६॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कु॰नं॰ एवंनिलीयमानैरित्यत्रापिअयंकालःस्वर्पोक्तमयत्नरूपंकिंनिलीयमानताघाश्रयत्वादिति रविरस्तगमनवान्तादृशकालसंबंधत्वादितिवाप्रयोगोज्ञेयः
१०५ सोमित्रेइतिविरहातुरस्यरामस्यलक्ष्मणंप्रत्युक्तिःअत्रापिअयंचंद्रःकुरंगधारित्वादितिप्रयोगः॥ ॥इत्यनुमानं॥ ॥ताम् इति॰ तारकाणांन्यासःसंनिवेशःशाक
टस्याकारसंस्थानंआश्रितवन्तांरोहिणींविजानीहीत्यतिदेशवाक्यार्थज्ञानमिहोपमानं इयंशकटाकारनक्षत्रपंक्तिःरोहिणीपदवाच्येत्युपमितिप्रतिकरण

सुखानुमानंयथा निलीयमानैर्विहगैर्निमीलद्भिश्चपंकजैः विकसंत्याचमालत्यागतोस्तंज्ञायतेरविः यथा सौमित्रेनत्व
मेवतातनकृतलंवेडंस्व कृतान्तःपुत्रेचेतसोनिशिकाकथारघुपतेचंद्रोयमुन्मीलति वर्तेतहिदितंकथंतुभवताधन्नेकुरंगंय
तःकामिषेपमिहाकुरंगनयनेचेद्गानतेज्ञानकिं उपमानंयथा तांरोहिणींविजानीहिज्योतिषामत्रमंडले यस्तन्विता
रकान्यासःशाकटाकारमाश्रितः यथावा अत्रमन्मथमिवातिसुंदरंदानवारिमिवदिव्यतेजसं शैलराजमिवधैर्यशालिनंवे
त्थिवेंकटपतिंमहीपतिं सूर्वोसाहरणंतुउपमानमूलभूतमतिदेशवाक्यंदर्शितं अत्रातिदेशवाक्यार्थसादृश्यप्रत्यक्षरूपमुप
मानंफलत्वेनदर्शितमितिविशेषः ७॥ ॥

त्वात अत्रेति अत्रएतुराजसुमध्येमन्मथमिवातिसुंदरंमहीपतिंवेंकटपतिंसंज्ञंवेद्मीत्याद्यन्वयःदानवारिर्विष्णुःशैलराजंहरं धैर्यशालिनंमदनशासक राम॰
त्वात प्रत्यक्षत्वमिति सादृश्यविशिष्टपिंडप्रत्यक्षस्यापिफलायोगव्यवच्छिन्नत्वेनकरणत्वादितिभावःफलेन उपमितिरूपेण॥ ॥इत्युपमानं ७॥ १०५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विहरणव्रतेति॰ कुमारसंभवेवडुवेषंहरंप्रतिपार्वत्याइयमुक्तिः वरदोषप्रकाशयताऽपि त्वल्लिङ्गान्तःकरणेनत्वयाईशंमहादेवंप्रतिएकंश्रलक्ष्यजन्मत्वंसाधकं
।यतोयमीशमात्मभुवोब्रह्मणोऽपिकारणमामनंतिवेदाःसकथंलक्ष्यःप्रभवउत्य न्निस्थानंयस्यतादृक्प्रभविष्यतीत्यन्वयः विवक्षितेतिक्वचित्पाठःवक्तुमि
ष्टेतितदर्थःवलादिति नास्तिकोक्तिरियं हेजनाःपापानिवलात्कृतानि तानिचपापानिदोषाकंश्रुतान्येवभवंत यतोवलात्कारेणकृतान्सर्वान्प

शब्दप्रमाणंयथा विवक्षितादोषमपिच्युतात्मनात्वयैकमीशंप्रतिसाधुभाषितं यमामनंत्यात्मभुवोऽपिकारणंकथंसलक्ष्यप्रभवोभविष्यति अ
त्रशिवःपरमेष्ठिनोऽपिकारणमित्यत्रश्रुतिरूपंशब्दप्रमाणमुपन्यस्तं एवंस्मृतिपुराणागमलौकिकवाक्यरूपाण्यपिशब्दप्रमाणान्युदाहृ
र्णीयानि तत्रस्मृतिर्यथा वलात्कारकृतपापानि संवृतान्यकृतानिच सर्वान्वलकृतानर्थानकृतान्मनुरब्रवीत् श्रुतिश्रुतिरभिमतार्थप्र
माणत्वेनोपन्यस्ताइहतुस्मृतिरनभिमतार्थेनदूषणपरेणप्रमाणतयानीतेतिभेदः आचारात्मकश्चोरपिमीमांसकोक्तधर्मप्रमाणयोर्वे
दशास्त्रमापकतयाशब्दप्रमाणएवांतर्भावः तत्राचारप्रमाणंयथा महाजनाचारपरंपरेदृशीस्वनाममनामाददतेनसाधवः अतोऽभिधा
तुंनतदुत्सहेपुनर्जनःकिलाचारमुचंविगायति ७८ असंशयंक्षत्रपरिग्रहक्षमायदार्यमस्याममभिलाषिमेमनः सतांहिसंदेहपदेषुवस्तु
षुप्रमाणमन्तःकरणप्रवृत्तयः अत्रदुष्यन्तेनात्मनःशकुन्तलापरिग्रहस्यधर्मत्वंश्रुत्वानीतमुन्नीयते एवंश्रुतिलिंगादिकमपिमीमांसो
क्तप्रमाणसंभवदिहोदाहर्तव्यं ८॥।

दार्थान्मनुरकृतानब्रवीदित्यन्वयःअत्रदूषणपरेणः स्वाभिमतार्थदूषणपरेण आत्मनस्तुष्टिःप्रीतिर्वैकल्पिकेविषयेगर्भाष्टमेऽष्टमेवाद्वे ब्राह्मणस्योपनाय
नमित्यादौप्रमाणमित्युक्तं महाजनेति दमयंतीप्रतिनलोक्तिःनामवितर्के नाददतेनरहंतीति॰ आचारस्तुवं आचारत्यागिनं विगायति निंदति असंश
यमिति दुष्यन्तेनक्षत्रियेणपरिग्रहेक्षमायोग्यायदार्यंश्रेष्ठंममनोऽस्यांशकुंतलायामभिलाषशीलं पदेषुविषयेषु॰ ८॥ ॥ ॥

आत्मतुष्टिप्रमाणंयथा ५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शब्दशक्तिकृतिगमिति वेदस्थले १

कु॰नं॰ त्वंहीति वरमुद्रिकांवरदमुद्रां नाथत्वेनधारयसि अक्तिर्वरदसंज्ञारूपा लिंगंगमकं पदे अनुत्पाद्यतीयादिरूपया प्रकर्षेणशीघ्रसिद्धे अर्थे अगंगिभावेमतिलिं
गमर्थप्रकाशनसामर्थ्यरूपंनाद्रियते यथैवागार्हपत्यमुपतिष्ठतइतिआग्नेयागार्हपत्योपस्थानेविनियुक्तस्यमंत्रस्येंद्रप्रकाशनसामर्थ्यरूपेणलिंगेनेंद्रो
१०५ पस्थानेविनियोगोनाद्रियतेइत्यर्थः करिगिरीश्वरः हस्तिगिरीश्वरः विदितमिति इत्थंभूतः परार्थैकप्रवृत्तिकः अतइत्यस्यचेष्टारूपप्रमाणांतरंनाशंकनी

का॰२

तत्रश्रुतिर्यथा त्वंहितानेत्रवरदो विघ्नेश्वरमुद्रिकां नहिश्रुतिप्रसिद्धार्थेलिंगमाद्रियतेबुधैः प॰ अत्रकारिगिरीश्वरस्यवरदह
स्तमभिधानश्रुत्वासर्वाभिलषितदातृत्वेसमर्थितं लिंगंयथा विदितंवोयथास्वार्थानमैविस्तृतमवयः अंगुमूर्ध्निशिरसामिरित्यंभ
साप्पि॰२ तोऽस्मिसूचितः अत्राशिवस्यश्रुतिप्रसिद्धसर्वोपकारकपृथिव्याद्यष्टमूर्तिपरिग्रहलिंगेनतत्सहृत्तीनांलोकानुग्रहैकप्रयोजनत्वंसमर्थितं
।लिंगश्रुतवेदानुमापकतयावैदिकशब्दप्रमाणांतर्भावः एवंलौकिकलिंगानामपिलौकिकशब्दानुमापकतयालौकिकशब्द
प्रमाणांतर्भावः अतोलोलुः लतयाविपक्षादिगुपत्यासेविधूतंशिरस्तहृत्तांतपरीक्षणेकृतेनमस्कारेविलक्षस्थितः ईषन्नाम्र
कपोलकांतिनिमुखेदृष्टिं ततः पादयोरुत्स्पृष्टोगुरुसन्निधावपिविधिर्ह्रीभ्यांनकालोचितः इत्यादिचेष्टारूपंप्रमाणांतरंनाशंक

छा॰१ कृ॰२

यमित्यभिप्रेतंतेनान्वयः लोलदृशि गुरुणांसंनिधावपिह्रीभ्यांनायकाभ्यांसमयोचितोविधिर्नोसृष्टः यथालोलदूलतयानिपिकयाविपक्षस्यसपत्न्यादेर्दि
शउपन्यासेतत्सकाशादागतोसीतिसत्वनेकृतेनायकेतन्नेतिसूचनायशिरोविधूतंसंचालितं तत्तस्तहृत्तांतपरीक्षणेनायिकयाकृतेसत्यकृतन राम॰
मस्कारः विलक्षस्यवस्थितः ततईषन्नाम्राकपोलकांतिर्यस्यतादृशेनायिकायामुखेकोपातिशयाज्ञातेसतितत्पादयोर्दृष्टिपातेनैवाततःप्रणतइति ॥ १०७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

किमस्तुभिरिति व्याख्यातं प्राक् तथेति नलमुखचंद्रविषयत्वव्याख्यातः स्मरस्येत्यर्थः तच्चासिद्धत्वात्कल्पितमिति भावः॥ ॥इति शङ्का॥ ॥निर्णी-
तमिति अस्तीति निर्णीतं शक्यमित्यन्वयः प्रयुक्तमिति हेतुस्तर्कः यदि प्रयुक्तं प्रकटं वर्त्म यातु तदा सा जाह्नवी जलधिं नाश्रयेत् अन्यथा स्रोतसामित्यर्णः स-
मुद्रस्य जलं गांगौघैर्निर्भासिताभस्मरहितीकृता या शंभुकंधरा तत्समानवर्णा नीलं कथं स्यादित्यन्वयः॥ ॥इत्यर्थापत्तिः॥ ॥स्फुटमिति हेतुं वितर्कयंतस्त-

क्वचिदूह्यमाणकल्पनया चमत्कारः यथा किमस्तुभिर्ग्लपितैर्जड मन्यसे मयि निमज्जतु भीमसुतामनः मम पुनः श्रुतिमाहत
दर्थिकां नलमुखेंदुपरां विबुधः स्मरः अत्र म्रियमाणानां मनस्त्विंदुं प्रविशतीत्येतदर्थिकायाः श्रुतेर्नलमुखचंद्रविषयत्वेकल्पिते त-
थाव्याख्यातस्मरस्य वाक्यप्रमाणातपोषणत्वं अर्थापत्तिर्यथा निर्णीतं शक्यमस्तीति मध्यं तव नितंबिनि अन्यथा नोपपद्येत पयो-
धरभरस्थितिः ८४ यथा वक्त्रावलीयास्यादिह्नेतु रागमादध्ययत्सा जलधिं न जाह्नवी गांगौघनिर्भासितशंभुकंधरा सवर्णामर्णः
कथमन्यथा स्यात ८५ अनुपलब्धिर्यथा स्फुटमसद्वलग्नं तन्वि निश्चिन्वतेते तदनुपलभमानास्तर्कयंतोपि लोकाः कुलगि-
रिवरयुग्मं प्राग्विनाधारमात्तेन दिह मकरकेतोरिंद्रजालं प्रतीमः ८६॥ ॥

र्कशीला अपि लोकाः सद्वलग्नं अनुपलभमाना अपश्यंतस्तत्वावलग्नं मध्यमसदिति स्फुटमेव निश्चिन्वते। कुलपर्वतश्रेष्ठयुग्मं स्तनेनाधावस्थितं स्तनद्वंद्वमाधारं वि-
नाय दास्येन विह मकरध्वजस्येंद्रजालं मायाचरितं प्रतीम इत्यन्वयः॥ ॥इत्यनुपलब्धिः ८७॥ ॥ ॥ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

कु०नं० अभूतेति ईश्वरं प्रति भक्तस्योक्तिः पूर्वमभूतं अभूतपूर्वं तादृशं मम किं वा भावि न किंचित् सर्वशीलात् तयादि द्वंद्वं सहे हि यतो मम सहजमेव दुःखमस्ति किंतु हे ना
१०६ थ ते तव शरणागतानां भक्तानां त्वदग्रे पराभवो नानुरूपो नोचित इत्यन्वयः अथ वा तव नानुरूपः इत्यन्वयः अत्र दुःखादेः संभवात् प्रमाणसिद्धस्य कथनं येनाभ
ति भवभूतेरुक्तिः नामेति कुत्सने नाम प्रकाशसंभाव्यक्रोधापगमकुत्सने इत्यमरः किमपीति काकुः न किमपीत्यर्थः एषः काव्यनिर्माणरूपः मम कोपि स
मानधर्मा सदृशो य उत्पत्स्यते अस्ति वा तं प्रति यत्नः हि यस्मान्निरवधिरयं कालः पृथ्वी च विपुलेति क्रमेणान्वयोत्र अत्र कालोत्ययमित्यादिना सोपपत्तिकं संभ

उ१ संभवो यथा अभूतपूर्वं मम भावि किं वा सर्वं सहे मे सहजं हि दुःखं किंतु त्वदग्रे शरणागतानां पराभवो नाथ न ते तु रूपः ये नाम केचिदि
ह नः प्रथयंत्यवज्ञां जानंति ते किमपि तान् प्रति नैष यत्नः उत्पत्स्यते स्ति मम कोपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी भ्रातः पांथ कु
तो भवान् नगरतो वार्त्ता नवा वर्त्तते वाढं ब्रूहि युवा पयोदसमये त्यक्त्वा प्रियां जीवति सत्यं जीवति जीवतीति कथिता वार्त्ता मयापि स्मृता विस्मयो
पृथिवीजनोपि विंध्यः किं किं न संभाव्यते ७९ अत्राद्योदाहरणे अभूतपूर्वं मम भावि किं वेति संभवप्रमाणसिद्धोर्थो दर्शितः द्वितीयोदाह
रणे संभवोपपादकं कालानंत्यादिकमपि दर्शितं तृतीयोदाहरणे संभवोपि कंठोक्त इति भेदः ऐतिह्यं यथा कल्याणी वत गाथेयं लौकिकी
प्रतिभाति मे एति जीवंतमानंदो नरं वर्षशतादपि अत्र लौकिकी गाथेयमित्यनिर्दिष्टप्रवक्तृकप्रवादपारंपर्यं तादृशीत्ता ११॥ ॥
वि२ तु२ रू४१

वाक्यप्रमाणमुपदर्शितं भ्रातरिति पथिकं प्रति ग्रामस्थस्य प्रश्नः कुत इत्यनंतरं आगत इति शेषः नगरादित्युत्तरं वार्त्तेति पुनः पूर्वस्य प्रश्नः वाढमित्युत्तरं अंगीका
रे सत्यमित्यर्थः ब्रूहीति पूर्वस्योक्तिः युवेत्यादि पांथवचनं सत्यं जीवतीति पुनः पूर्वस्य प्रश्नः जीवतीत्यादि सर्वं पांथवचनं इति संभवः अनिर्दिष्टप्रवक्तृकेति राम०
॥अनिर्दिष्टो विशेषतो वक्ता प्रवक्ता यस्येत्यर्थः एवं चैतदैतिह्यलक्षणमिति दर्शितं॥ ॥इति प्रमाणालंकारप्रकरणं ११॥ ॥ ॥ १०६

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection